Digitized by Arya Samaj Foundation Chennai and eGangotri

BHARTI JAN-MAR 1960 G.K.(I)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

a Foundation C

Gurukul Kang

Digitized by Arya Samaj Foundation Chennai and eGangotri

113538

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गीरवाणी

संस्कृतस्य प्रमुखं मासिकपत्रम्

GURUKULA KANGRI LIBRARY HARIDWAR

विलासः कवितादेव्या विकासः कल्पनाततेः ।
निवासः प्रतिभायाः श्रीकालिदासः प्रणम्यताम् ॥ १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

वर्षम् १०
द्वितीयाङ्कः
वार्षिकमूल्यम् ४) चतस्रो मुद्राः एकप्रतेः
चत्वारिंशत् नवपणाः (४० नये पैसे)

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वश्रेष्ठ मालवा फेब्रिक
कोरा, धुलाहुवा कोरी, रंगीन तथा
धुली हुई
दी इन्दोर मालवा युनाइटेड मिल्स लि.
पताः मिल प्रेमिसेस इन्दोर, (मध्य भारत)
फोनः जनरल ऑफिस - ६०६३
" सेल्स मैनेजर - ६००६
तारः मालवामिल
रजिस्टर्ड ऑफिसः सेकसरिया चेम्बर्स, १३९, मेडोज स्ट्रीट, फोर्ट, बम्बई १.
फोनः २५-३२१४-५-६
तारः इन्दोरमिल

राजस्थान-मद्रास-मध्यप्रदेश-सौराष्ट्र-भूपाल-उत्तर-प्रदेश-बिहार-पञ्चनद-आन्ध्र-बम्बई-सर्वकारै-स्वीकृता

विषय-सूची

क्रम संख्या	लेखाः	लेखकाः	पृष्ठ संख्या
१.	वनदेवतायाः सौभाग्यश्रीः	श्रीसीतारामशास्त्री, आन्ध्रप्रदेशः	२७
२.	उमा	श्रीवृद्धिचन्द्रशास्त्री, जयपुरम्	२८
३.	द्राक्तरजीवागो एकमध्ययनम्	श्रीगणेशरामशर्मा, झालावाड़	३०
४.	संमानाय विद्वद्गोष्ठी	स० सम्पादकः	३३
५.	भारतस्य आर्षसंपदः	सी० श्रीदामोदरमेनोन्, केरलम्	३४
६.	हा हन्त शोकप्रदो दुःसंवादः	सम्पादकः	३९
७.	जीवनस्य पृष्ठद्वयम्	स० सम्पादकः	४०
८.	सम्पादकीयम्	सम्पादकः	४२
९.	व्यायाम-सेवनम्	श्रीहरिशास्त्री दाधीचः, जयपुरम्	४४
१०.	मानवोचिता सहृदयता	श्रीकमलानाथशर्मा, जयपुरम्	४५
११.	सूक्ति सुधा	सम्पादकः	४६



च्यवनप्राश
सुवर्ण, मकरध्वज, अभ्रक इ. युक्त
बल-पुष्टिवर्धकं रसायनम्
धूतपापेश्वर इण्डस्ट्रीज् लि०
पनवेल चोप चिन्ह मुंबई
पणिकः श्री हाथिबंधुश्च गणः
(अ) जौहरी आपणः, जयपुरम्
(आ) जालोरिद्वारम्, जोधपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

113538
Digitized by Arya Samaj Foundation Chennai and eGangotri

प्र० सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादकः—
देवर्षिकलानाथशास्त्री
साहित्याचार्यः, एम. ए.
जयपुरम्

भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

प्रबन्धसम्पादकः—
गिरिराजशर्माशास्त्री
भारती-भवन
गोपालजी का रास्ता,
जयपुर

वर्षम् १० | मार्गशीर्षमासः सं० २०१६ | अङ्कः २

57
1959

वनदेवतायाः सौभाग्यश्रीः

कवयिता :—"भाषाप्रवीण, साहित्यभूषण," पी० श्रीसीतारामशास्त्री, आन्ध्राध्यापक,
पुरपालकोन्नतपाठशाला, आदोनिकर्नूल जिला आन्ध्रप्रदेशः

113538

मन्दम्मन्दम्मलयपवनः पुष्पसौगन्ध्यहारी,
सायं सायं प्रविमलसरश्शीकरालेर्विमुक्तः ।
वीजन्वीजन्विरहविवशान् गाढतापानुभोक्तॄन्,
कुर्वन्नास्ते हतविधिवशाद्दीर्घनिश्वासपात्रान् ॥१॥

ताम्बूलिकावेल्लितपूगखण्डम्,
एलालतावेष्टितकुञ्जपुञ्जम् ।
रम्भाद्रुमाऽऽच्छादितचारुदेशम्,
आपाटलं रक्तसुमैर्वनं हि ॥२॥

विनूत्नचूताङ्कुरभक्षणेन,
दृप्तः पिकोयं कलनिस्वनेन ।
गायन् वियुक्तान् प्रणयेषु रुष्टान्,
चक्रे समाश्लिष्टतनून् प्रियाभिः ॥३॥

आरामवीथीषु विनीलकण्ठाः
क्रेङ्कारनादं हृदयानुमोदम् ।
तन्वन्ति नृत्यन्ति सवर्हिभारम्,
झङ्कारनादं च द्विरेफसङ्घाः ॥४॥

सतीपती तत्र निकुञ्जयुक्तौ,
रतीशसौख्यान्यनुभूयमानौ ।
परीमलञ्चम्पकजातिपुष्पे,
शोभायमाने रमणीयदृश्यैः ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



[आख्यायिका]

(ले० श्रीवृद्धिचन्द्रशास्त्री, व्याकरण-धर्म्मशास्त्राचार्यः,जयपुरम्)

आसीत् शारदी राका । सायाह्न एव भगवतः कुमुदिनीनायकस्य सुविपुलं वर्तुलं च बिम्बं घनीभूतः सुमनसामाह्लादराशिरिव पूर्वक्षितिजे समुदियात् । यथा यथा पश्चिमक्षितिजोपरि प्रसृताः कमलिनीनायकस्यारक्ता रश्मयो गगनं पर्यत्यजन् तथा तथा कलापरिपूर्णस्य कलानाथस्य शीतलाः शुभ्राश्च कान्तिमन्तः किरणाः समस्तेऽपि विहायसि यथेच्छं प्रासरन् । स्वयमानन्दाप्लावितो यथासौ चन्द्रो जगदिदमाह्लादयति चिरं च रजन्या साकं निवसति, तथैव चिरपरिणीतया पाणिगृहीत्या श्रीमत्या उमया मधुयामिनीः सेवमानश्चन्द्रमौलिरपि दिवसेष्वेषु सुचिरं तस्याः सन्निकट एव स्थितिमकरोत् । उभावपि हर्म्यपृष्ठे आस्तां समुपविष्टौ । तस्मिन्नेव काले कथाप्रसङ्गेन मन्दस्मितमभाणि उमया—प्रियतम, भगवत्या गङ्गायास्तरङ्गाः समाह्वयन्तीव मां स्नेहेन । ते तरङ्गाः, यैः सर्वतः पूर्वं त्वदीयः सुकोमलः स्पर्शः प्रापितो मत्सविधे, ये ह्यावां प्रणयसूत्रे ह्यबध्नन्, येषां च सविधे क्रीडां कुर्वतोः—"को जानीते निभृतमुभयोरावयोः स्नेहसारम्।" संवत्सराः व्यत्यगुर्नाथ ! किन्तु तद्दिनमद्यैव व्यतिगतमिति प्रतीयते ! आवाभ्यां कियत्यश्चन्द्रिकाचुञ्चवः सुशान्ता रजन्यः सुरसरितोऽस्या रूप्यप्रतिमासु रेणुकासु अनीयन्त । अहो, कीदृश्यस्ताः समभवन् मधुराः अद्य पुनरपि समागता सा मधुमयी शारदी सुकौमुदी । हृदयवल्लभ, चलाव, किञ्चित् कालं भगवत्यास्तस्या भागीरथ्यास्तीरे ।

मन्ये, नैतद् वक्तव्यं यदुमा च चन्द्रमौलिश्चास्तां दम्पती । आसीदनयोः परस्परम् अतिशयः प्रेमा । आनन्देनाचलदनयोः सुचारु गार्हस्थ्यम् । गेहेऽभूदाभ्यामतिरिक्ता केवलमर्भकद्वयी चन्द्रमौलेर्वृद्धा जननी च । सा हि निवृत्ततर्षा सती स्वकीये परिणते वयसि भगवन्तं यदुनन्दनमेवाराधयन्ती प्रायेण पूजागृह एव समयाकरोति स्म ! बालकावास्तां शिशू । चन्द्रमौलेर्वेश्म वाराणस्या एकस्यां वीथिकायां विद्यमानमासीत् । सौभाग्यात् तस्य श्वशुरालयोऽपि तस्यामेव नगर्यां ततो नातिदूर एवावर्तत ।

उभावचलतां गङ्गाया दिशमुद्दिश्य । तयोर्गेहादासीद् गङ्गाप्रवाहः किञ्चिद्दूरे । समवालोक्यत जाह्नव्या जगत्पावनी जलधारा । चन्द्रिकया चमत्कृतायां धवलतमबालुकायामेतौ सुदूरं चलन्तावास्ताम् । पादतलयोः सिकताया मृदुमृदुः स्पर्शोऽतीव सुखद इति कृत्वा उमया स्वकीये चपलोपानहौ गृहीते स्वीये करे । मध्येमार्गं चन्द्रमौलेर्मुखकमले स्निग्धां चलापाङ्गां च दृष्टिं निक्षिपन्ती जगाद उमा—मन्मानसमराल ! अस्याः सुरसरितः शर्करायाः सुकोमलः स्पर्शः कियान् खल्वाह्लादकः !

उत्तरितं चन्द्रमौलिना—चरणौ गुद्गुदयत्ययम् । हर्षातिरेको रोमाञ्चश्चानेन संजायेते । जगत्पावयित्री श्रद्धास्पदमावयोरियं सुरसरित् । अस्यास्तटे समुपविष्टेनैकाकिना असकृन्मयका विचारितं प्रिये, यदावां सकलमपि वैवेशिकं परित्यज्य सुदूरे कस्मिंश्चिदेकान्ते निवसाव, अस्यास्तटे यत्रावयोः प्रेम्णो न भवेत् कश्चिदीर्ष्यालुः । यत्र भवती प्रेरणां प्रदद्यात्. अहं गीतानि रचयेयम्, उपवीणयाव चावाम् । अत्र बालुकामये प्रदेशे रजन्यां मदीया सा मनोहारिणी वीणा नानेतुं शक्या । अन्यथा वीणावादनसुख चिरमनुभवेवेह । किन्तु तस्याः सुमधुरं स्वरमाकर्ण्य जनाः समापतेयुरित एवेति मन्ये । तेषु बहूनामक्षिणी ईर्ष्यया भवेतां कलुषिते । को लाभः ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"कान्त !" मध्य एव वार्तायां रसभङ्गं विदधती समुवाच उमा। "अनुचितं न मन्तव्यम्। विचारयामि कदाचित् यद्यहं स्मृतिशेषतां गच्छेयम् ?" चन्द्रमौलिना सुदृढमालिङ्ग्य सुचिरं हृदि प्रवेशितासौ। प्रोक्तं च ततः, नहि नहि प्रिये, आवामेवमेव निवत्स्यावः।

अन्येनैवाभिप्रायेण निवेदयामि नाथ ! मन्यताम्— भवानेव कदाचित् कथाशेषतां व्रजेत् ? अहमेकाकिनी जातैव न खलु तदा ? ब्रवीतु, नश्वरेऽस्मिन् संसारे एवं संभवति न वा ?

चन्द्रमौलिना शिरश्चालनपूर्वकमुररीकृतम्। उक्तं च अघटितघटनास्थलीभूतायामस्यां धरित्र्यां किं न संभवति। प्रिये।

अस्मिन् वारे संतप्ते नकुलस्थितं ते न समजायत स्वामिन्. भवतः कथाशेषतायां शोकसागरनिमज्जनं केवलं मामकीनमेव। अथवा विपत्पर्वतस्तदा मय्येव निपतेदिति कृत्वा नु ?

कीदृशीं निष्ठुरतां दर्शयसि कठिनहृदये ! मया सह तवेदृशो व्यवहारो न कदाचिदनुभूतः।
स्नेहार्द्रदृष्ट्या समवलोकयन्ती तमुवाच उमा—प्रियतम जीवनस्य भवन्त्यनेकाः खलु दिशाः। न हि सदैव विद्यते पूर्णिमा। कदाचिदमावस्याप्युपसर्पति। अस्तु, अहमेवं कथयन्त्यभूवम्--यदेकस्याभावे दम्पत्योरपरेण किं विधेयम्। जानकीजानिर्न विदध्यात्, परं कदाचिदेवं भवेत्, तदा भवतोऽभावे जानाति भवान् किमहं करिष्यामिति।

ग्रीवां किञ्चित् पातयित्वा दीर्घमुच्छ्वस्यावोचच्चन्द्रमौलिः...भणतु भवती, यदभावे किं विधास्यतीति ? उमया वक्तुमारेभे-भाव, स्वजीवनस्यान्तं न सर्वथा विधास्यामि। न हि विद्यते आत्महत्यासदृशं मूर्खतापूर्णं निन्दनीयं च दुष्कर्मेह जगति। भवता विलोकितं नु, दिवसेष्वेषु मयका विणावादने कीदृक् साफल्यमासादितं भवतः प्रसादात्।

अवश्यम् अवश्यम्, प्रिये दर्शनीयं ते हस्तकौशलम्। अनेकवारं त्वदीयकरे वीणां समर्प्य निश्चिन्ततामनुभवामि, उमे ! जगाद चन्द्रः।

आम्, कराले तस्मिन् सुविषमे काले मदीयोऽशाश्वतश्चन्द्रमौलिरवश्यं मत्तश्छिन्नो भवेत् किन्त्वहं शाश्वतं युगयुगीनकविं स्वस्थं चन्द्रमौलिमाराधयिष्यामि। तवेमां वीणां गृहीत्वा तवोपज्ञानि गीतानि गास्यामि तावद् यावदावयोर्जीवनप्रवाहः कस्मिंश्चिदन्यस्मिन् देशे काले च साकारो भूत्वा न पुनः सम्मिलेत्। किन्तु पृच्छामि नाथ मदभावे भवता किं विधास्यते ?

एतान् स्वरतः सुकोमलानपि अर्थतो वज्रोपमान् शब्दानाकर्ण्य चन्द्रमौलेरन्तस्तलादारभ्य सकलो हि कायः प्रवाते वेत्रलतेव भृशं प्राकम्पतेति स्वयमक्षिगोचरीकृतमुमया। चन्द्रमौलिरुत्तरणे यत्नवानासीत् किन्त्वसीदन् तस्य गात्राणि मुखं च पर्यशुष्यत्। लोचने तस्य आसतां वर्षितुकामे। चिरं प्रयत्य, साहसं चैकीकृत्य क्षीणक्षीणस्वरेण सगद्गदं सोऽवादीत् अहो, कीदृशी निष्ठुरतमा स्यात् सा वेला ! परमुमे, आत्महननं त्वहमपि न विधास्यामीति प्रतिजाने। त्वदीयया प्रणयप्रेरणया मदीयेऽन्तस्तले यानि प्रादुर्भविष्यन्ति गीतानि, तानि गास्यामि जीवनान्तम्। अहमपि तव चन्द्रमौलेरिच..... इति ब्रुवन्नेव तस्य कण्ठोऽभवत् रुद्धः। जीवनस्यानित्यतां प्रकटयन्तीव पतितानि भुवि चक्षुषोर्मौक्तिकानि द्वित्राणि। अन्यत्र तमाक्षिपन्ती अवादीदुमा—

अनुमिनोमि, मन्मानसमराल ! दयितेयमावयोर्जाह्नवीधारा शयितेव। आवामपि चलाव गेहम्।

* *

गच्छता कालेन समायातो वसन्तः। सोपि क्षणं स्थित्वैव विनिर्गतः। वस्तुतः सुखस्य दिनानि न ज्ञायन्ते पलायमानानि। तानि खलु अणोरणीयस्त्वं भजन्ते। ततः प्राप्तः किल प्रचण्डो ग्रीष्मः। चण्डांशुना बुभुक्षितस्य शार्दूलस्येव विकटं किमपि चेष्टितं समारब्धम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्राक्तरजीवागो एकमध्ययनम्

मूललेखकः – श्रीरामकृष्णमहाभागः
अनुवादकः – विद्याभूषण श्रीगणेशरामशर्मा,
साहित्यरत्नम्, झालावाड़ (राजस्थान)

साहित्यं नाम राष्ट्रचेतनायाः प्रतीकम्। पशुबलेनास्य निरोधनं कठिनम्। यस्मिन् देशे काले चैतत् कुण्ठितं भवति, तत्र मानवीयानां गुणानां वा स्वयं मानवतायाः कृतेऽनिष्टभयमुत्पद्यते। रूसदेशस्य साहित्य अकादमीति संस्थया, या हि तत्रत्यानां साहित्यसेविनां प्रतिनिधिभूता संस्थास्ते, श्रीपेस्तरनायकं प्रति या मनोवृत्तिरङ्गीकृता, सातीव नैराश्यं जनयति। इत्थं ज्ञायते, यत् तत्रत्येषु साहित्यसेविषु कुण्ठा व्याप्तास्ति व्याप्नुवाना वा विद्यते, नो चेत् 'द्राक्तरजीवागो' उपन्यासे तादृशं किमपि तत्त्वं न वर्तते येन कोऽपि लज्जामनुभवेत्। आम्, उपन्यासोऽसौ 'प्रचारात्मके साहित्ये' नान्तर्भूतो गणयितुमशक्यत। सत्ये खल्वन्तर्ज्वाला भवति। पञ्चत्रिंशद्वा चत्वारिंशद्वर्षाणि यावत् तामिमां ज्वालां निगूढमन्तर्गोपायितायां सत्यां यदा—

कवेरुद्गारकाठिन्यं, मौनं काठिन्यवत्तरम्।

क्षामीकृताः क्षपाः अपहृताः प्रसन्नं सरितामापः, प्रतापिता हि पृथिवी, तरवो गहनानि च सम्यगुच्छोषितानि। तदभयादेव न निःसरति गेहान्मनुजो नीडाच्च पतत्री। दिनान्तं परं भवति किञ्चिदुच्छ्वासयोग्यं, लोकान्तरं गते हि तस्मिन्।

चन्द्रमौलेर्जननी यशोदा बभूव रुग्णा। चन्द्रमौलिरहर्निशं मातुश्चरणयोरेव निवसति। उमापि रात्रिंदिवं सेवमाना श्वश्रूं न जगाम मध्ये कदापि पितृगृहम्। अनेकाः खलु कृताश्चिकित्साः। न तासां किञ्चिदपि प्रभावः समवालोक्यत। यशोदायाः स्थितिश्चिन्तनीयैव जाता। समागता ज्येष्ठमासस्य पूर्णिमा। दुग्धधारेव ज्योत्स्ना सर्वत्र प्रासरत्। यशोदया शनैः प्रोक्तम्—अद्य किञ्चित् कालं हर्म्यपृष्ठे नयत माम्। चन्द्रिकायामुपवेष्टुकामास्मि। तस्याः पर्यङ्किका हर्म्यपृष्ठे प्राप्यत। विसूचिकया तस्याः शरीरं केवलमस्थ्नां कंकालभूतमेवावातिष्ठत। तद् दृष्ट्वा चन्द्रमौलेरन्तस्तले भवति स्म वेदना वारं वारम्। किन्तु विवशतैव।

सुचिरं विश्रम्य मात्रा निगदितम्—चन्द्र! चन्द्रिकेयं कियती मनःप्रसादयित्री! सुखाकरोति मां विशेषरूपेण।

तस्मिन्नेव समये चन्द्रमौलेः कर्णकुहरयोरुमायास्ते शब्दा अगुञ्जन्। तस्य स्वान्तं निष्क्रियमिव संजातम्। पूर्वं तयापि तेऽप्रियाः शब्दा ज्योत्स्नायामेवोपविष्टया कथिता आसन् क्षणं मौनावलम्बिनं तं पुनरुवाच जननी उमाद्य क्व वर्तते वत्स? झटिति चन्द्रमौलिनावाचि—मातः त्वदीयं स्वास्थ्यं किञ्चित्प्रगतिशीलमिति त्वदाज्ञां गृहीत्वैव सा चिरादद्य पितृगृहं गतवती। किं विस्मृतवती भवती? आदिवसावसानं तु सात्रैवासीत्, आम् मातः। व्यस्मरमहम्। अहह उमा मम प्रियपुत्री। न तस्यै कदापि कुप्येः पुत्रक इयमेव मेऽन्तिमा समीहा। नोमया सदृश्यो मिलन्ति सर्वत्र गुणवत्यः स्नुषाः। कीदृशी भक्तिः। कीदृशं सौजन्यम्। कीदृशोऽनुरागस्तस्या मयि। अहोऽहं महाभाग्यवती वत्स! यस्येदृशी सुमङ्गली वधूः।

वाक्यमसमाप्तमेवासीत्। मध्य एव किञ्चित् काशः समायातः हिक्के च द्वे। यशोदायाः शरीरं निश्चलमभवत्। याता सुमाता दिवं विहाय नश्वरं भुवम्। सुतस्य स्वान्तं व्यदीर्यत इव। आसीत् स गृहे एकलः। रुदत एवैतस्य-अक्षणोः प्रातरासीत्। —क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

113538

इत्येवंविधा स्थितिः कर्वेर्नोरिसपेस्तरनाकस्य कृते दुर्वहा बभूव तदैव द्राक्तरजीवागो इत्यस्योपन्यासस्य कृते राविर्भावः समभूत् ।

व्यतीतानां पञ्चाशत्प्रायाणां वर्षाणां रूसदेशीय-जीवनस्य वृत्तचित्रं किलास्योपन्यासस्य पृष्ठद्वारा—येषां जीवनं नियत्या परस्परं सम्बद्धमास्ते—कथाप्रवाहेण साकमुपतिष्ठते । नायको द्राक्तरो यूरो आन्द्रेविचजीवागो बुद्धिजीविवर्गीयोऽस्ति, यस्य वर्गस्य सहानुभूतिः सदा क्रान्त्या साकं तस्थौ, अथवा यः क्रान्तेः प्रेरको वक्तुं शक्यते । परन्तु सन् १९१७ वर्षस्य आक्टूबर मासस्य क्रान्तरेनन्तरं, क्रान्तेर्यद्वास्तविकं व्यावहारिकं च स्वरूपं प्रादुरासीत् , तदमीषां कल्पनायाः परेऽत्यन्तं भयावहम-भूत् । बोलशेविकानां मुक्तिसेनात्मनो देशवासिष्वाबाल-वृद्धवनितादिषु तथाविधान् रोमहर्षकानत्याचारांश्चक्र यदुदाहरणमितिहासे नान्यद्वर्तते ।

जारकालीनस्य रूषदेशस्य स्थितौ महत् वैषम्यं बभूव । क्रान्तेरेकः प्रमुखः सेनानायकः स्ट्रालनिकोव-इत्याख्य एकस्मिन् स्थले कथयति,—"उपनगराणां, मलीमसीनां वसतीनामुटजानां, रेलगन्त्रीनां चैकः संसारो बभूव, स च संसारो मलिनतायाः, क्षुधाया, अत्यधिक-जनसम्मर्दस्य, श्रमजीविनां रूपे मनुष्यस्य तिरस्कारस्य, स्त्रीणामपमानस्य च संसारो बभूव । अथापरः संसारो मातृवत्सलानां, तेजस्विनां स्फूर्तिस्फाराणां विद्यार्थिनां तथा धनिकानां वणिक्पुत्राणां, क्रूरायमानानां निर्लज्जपापानां तथा चैतेषामपराधदण्डान्मुक्तः संसारो, लुण्टितानामव-मानितानां बलात्कारकृतानां दीनानामश्रुधारामुपहसतां स्वस्कन्धौ समाकुञ्चतां धनिकानां संसारो बभूव । पर-जीविनां जनानां शासनमासीद्येषां महत्त्वमेतदेवासीद्यत्ते किमपि कार्यं कर्तुं स्वयं कष्टं नाङ्गीकुर्वन्तिस्म । नेमे संसाराय कदापि किमपि प्रायच्छन् न च स्वजीवनानन्तरं किमपि शेषं तत्यजुः । परन्त्वस्मादृशानां लोकानां जीवन-मेकः संघर्षो बभूव । स्वप्रियजनानां कृतेऽस्माभिः पर्वता उत्तोलनीया भवन्ति स्म, तथापि ते दुःखातिरिक्तं किमपि नो लभन्ते स्म ।.....

धनिनो लम्पटा युवानः फैशनोचितमुष्णीषं शिरसि परिधार्य क्रयक्रीतासु शकटीषु पण्यस्त्रीभिः सार्द्धमितस्ततो यथेच्छं निर्लज्जं भ्रमणं कुर्वन्त आसन् ! ..... अमीषां द्यूताश्वा, एतेषां व्रतोच्छृङ्खलता..... ।

"ऐश्वर्यस्यास्य निष्ठुरस्याभिमानस्य तथा दीनानां लाञ्छिताया मानवतायाश्चौषधिरूपमेकोनविंशत्यां शता-ब्द्यां मार्क्सवादस्य जन्म बभूव । मार्क्सवादेन प्रभावित-स्तथा पुश्किन-तालस्तायप्रभृतीनां विचारैर्ग्रन्थैश्च प्रेरितो रूसदेशस्य बुद्धिजीवी वर्गो लेखैः समाचारपत्रैश्च देशे जागरणं प्रासारयत् । फलतः सन् १९०५ ईषवीये वर्षे श्रमजीविनां कृषकाणां च तत्त्वावधाने निष्फलो बतै-को विद्रोहो बभूव । तमिमं विद्रोहं जारशासनं क्रूरतया पामर्द्दयत् तथास्य नेतॄन् बन्दीकृत्य सुदूरं स्थिते साइबेरि-यानामनि स्थाने, कठोरं जीवनं यापयितुं निरवासयत् । एतदनन्तरं सन् १९१४ वर्षे प्रथमस्य महायुद्धस्यारम्भो बभूव । रूसदेशश्चात्र युद्धे भागं ग्रहीतुं विवशोऽभूत् । असंतुष्टस्य सर्वस्वहारितस्य च यूनां वर्गस्य नवयुवकैः सेनायां स्वनाम लेखितम् । तदेतद्युद्धं देशे समधिकं विनाशं विवशतां चानैषीत् । अधुना महायुद्धं प्रवर्त-मानमेवाभूत्तावदेव बोलशेविकदलस्योद्भवोऽजायत । अस्य दलस्य लोकाः सैनिकान् बोधयितुमारेभिरे—"यूयं किमर्थं कस्माद्धेतोः प्राणोत्सर्गं कुरुथ ? अस्य युद्धस्य जयाद्यु-ष्माकं न कोऽपि लाभः । यूयं तु यथापूर्वं प्रताडिता एव भवेत । युष्माकं वास्तवाः शत्रवो युष्मद्देशमेवाधिवसन्ति । आस्ट्रेलियनान् शर्मण्यांश्च प्रति सन्नद्धा यूयं स्वशस्त्रास्त्र-नलिकास्तानेतान् प्रति लक्ष्यसाधनाय परिवर्तयत ।" इति । बाल्टिकसागरस्य नौकासैन्यस्य नाविकाः सर्वादौ विद्रोहं चक्रुः । अस्य प्रभावः समग्रायां सेनायां निपपात । समस्ता सेना भागद्वये व्यभज्यत । केचित्सैनिकास्तु जार-शासनं प्रति हितैषिणस्तस्युस्तत्पक्षतो विद्रोहिभिः साकम-युध्यन्त परमधिकसंख्याका विद्रोहमाचेरुः ।

सन् १९१७ वर्षस्य, अक्टूबरमासे जारशासकस्य सिंहासनच्युतिरभूत् । पूर्वं तु रूसदेशस्य प्रजास्तामिमां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थितिं सत्यमेवात्मनौ मुक्तिं मेनिरे तथा स्वदेशस्य ग्रामेषु लोकतान्त्रिकानि पञ्चायतनानि (कौंसिलें) प्रातिष्ठिपन्। देशशासनार्थं विधानसभाः (Constituent Assemblies) व्यरच्यन्त। परं तु तत्सर्वं बोलशेविका नो स्वीचक्रिरे। ते स्वकीयमधिनायकत्वं वाञ्छन्तिस्म। तदेतत्सैन्यबलात् दमनचक्रादेव सम्भवमभूत्। यतो रूसदेशस्य सर्वस्वापहारितानां श्रमजीविनां कृषकाणां चाभिलाषान्यैवासीत्। ते स्वराज्यमकामयकत, स्वभूमेः स्वतन्त्रं स्वामित्वमाकाङ्क्षन्त, व्यक्तिगतां स्वतन्त्रतामैच्छन्, सर्वोदयमभ्यलषन्। समष्टये स्वव्यष्टेरुत्सर्गो न तेभ्योऽरोचत। ते देशे राज्यविहीनं समाजमवाञ्छन्। ते रूसदेशे तथाविधमेव किमप्यवाञ्छन यथा भारते महात्मा गान्धिर्ववाञ्छ तथा च श्रीजयप्रकाशनारायणो वाञ्छति। समाजवादस्य पोषकः प्राणबुद्धिजीवी वर्गोऽपि चैवंविधस्य राज्यविहीनस्य समाजस्य स्वप्नं पश्यन्नासीत्।

"कृषकः सम्यक् जानाति यत् सः किमभिलषति, मत्तो भवत्तोऽधिकं, परं सः किमपि भिन्नमेव वस्तु कामयते। यदा क्रान्तिः प्रावर्तत सा तं चाजागरयत्, तदा स निरणयत् यदियमेव तस्य स्वप्नस्य सिद्धिरस्ति, स्वकीयायां भूमौ स्वहस्ताभ्यां परिश्रमं कृत्वाऽराजके समाजे, कस्मा अपि किमपि प्रदानं विना, पूर्णस्वतन्त्रतायां जीवनयापनस्य तस्य स्वात्मनोऽतीव पुरातनः स्वप्न एषः। अतो विपरीतं सोऽपश्यत् यत् सः प्राचीनस्य शोषकस्य जारशासनस्य परिवर्ते केवलं नव्यं शोषकं राज्यं, क्रान्तिकारिणोऽत्युच्चराज्यस्य धुरमापेति! तत्किमाश्चर्यं यदि मे ग्रामा उपद्रवं कुर्वाणा अभविष्यन्! शांताः स्थातुं नापारयिष्यन्·····

(पृ० २०२)

अत एवैतस्मादेव हेतोः कृषकाणां सर्वस्वापहृतो वर्गो बोलशेविकक्रान्तेर्विरुद्धं प्रतिक्रान्तिं चक्रे। ये चाराजकतावादिन आसंस्ते नीलवर्णा (Greens) अकथयन्त यतो बोलशेविका रक्ता (Reds) अकथ्यन्त तथा जारशासनस्य समर्थकाः श्वेताः (Whites) अकथ्यन्त। एभी रक्तैः श्वेतैरुभयविधैरपि योद्धव्यमभूत्। अत एवैते समाप्तिं गताः। केचिद्रक्तास्तथा केचन श्वेताश्च सेनायाममिलन्। गृहयुद्धस्य तादृग्भयङ्करोऽग्निः प्रजज्वाल यत् पञ्चवर्षाणि यावत्—सन् १९२२ पर्यन्तम्—रूसदेशे मानवजीवनं नरकतुल्यमभूत्। दुष्कालो दुर्भिक्षं, महामारी हत्या, लुण्टनं, बलात्कारश्च व्यातेने। रक्तवर्णानां मुक्तिसेना यत्र यत्र निर्गच्छति स्म तत्र तत्र ग्रामसमूहा जनशून्या बभूवुः। यदि कोऽपि रक्तवर्णसैन्याय यथेच्छमन्नं, तृणकाष्ठादिकं दातुं न स्वीकुरुते स्म तदा सः प्रत्यासन्नैर्दशपञ्चग्रामैः सह भस्मासादक्रियत। लघून् शिशून् निर्दयतापूर्वकं यातनाःप्रदायामार्यन्त। 'मनुष्यो मनुष्यस्य रक्तपिपासुर्वृकः!' इतीयमुक्तिर्यदि कदाचित् सत्याभूत्तदा सा तदानीमेव। मार्गे व्रजन् पथिकोऽन्यं पथिकं दृष्ट्वात्मानं जुगोप। यदि मार्गे द्वावपरिचितौ पथिकावमिलतां तदा तावन्योन्यमहतां, यतस्तावचिन्तयतां यन्न तयोरेकतरः कदाचित् प्रागेवान्यं निहन्यादिति। क्वचित् क्वचित् नरमांसभक्षणस्यापि घटनान्तराणि बभूवुः। सभ्यता, मनुष्यता च देशतो व्यलीयेताम्। मनुष्यो ह्याद्यकालीनं बर्बरयुगं पुनः प्राप। अथ चैतत्सर्वं प्रजानां स्वातन्त्र्याप्तेश्छलात् समभूत्।

स्ट्रेटनिकोवाख्यो जनो महायुद्धात् प्रत्यागत एकः सेनाधिकारी बभूव। स च रक्तसेनायाः सेनापतिर्भूत्वा बोलशेविकानां महत् कार्यं साधयामास। स खलु तादृशान्नृशंसानत्याचारांश्चक्रे यत् सः समस्तेऽपि च प्रदेशे 'घातकः', 'शूलारोपकः' इत्यादिभिर्विशेषणैः कुख्यातिं गतः। तस्येयं कल्पनाभूद्यद्देशे नवसमाजस्य स्थापनायां जातायां सः स्वपत्न्या बालकैश्च सह सुखं जीवनं यापयिष्यतीति। स किल बोलशेविकदलस्य सदस्यो नाभूत्। अतः संसिद्धे कार्ये स खलु बोलशेविकैः स्वात्मघातं कर्तुं विवशोऽक्रियत। तस्य पत्नीं, लध्वी बालिका च मंगोलियानाम्नि स्थाने पलाय्य स्व प्राणरक्षां कर्तुं विवशेऽभूताम्। द्राक्तरजीवागो पूर्वत एव हि स्वपत्नीं प्रति भविष्यवाणीमकरोत् यत् "तेन सह तेषां (बोलशेविकानां) मैत्री तावदेवास्ते, यावत् स तेषां मनोऽनुकूलं चेष्टेत, ते च तस्योपयोगं कर्तुं शक्नुयुः। यस्मिन् क्षणे तस्यावश्यकता न स्यात्, ते तं निष्कास्य दूरमुत्क्षेप्स्यन्ति, निर्दयतापूर्वकं च तमपहनिष्यन्ति, यथा तेऽन्यान् सैनि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—स० संपादकः

'संस्कृतविश्वपरिषदः' सं० प्रधानमन्त्री श्रीवेंकटेश्वरदीक्षितारमहाभागः, एवम् 'भारतीयविद्याभवनस्य (मुंबई)' परीक्षामन्त्री श्रीमहेशचन्द्रशास्त्रिमहोदयश्च, भगवत्याः संस्कृतभारत्याः प्रचारोद्देश्येन प्रसङ्गात् राजधानीं जयपुरमपि समायातौ। मान्यानामागन्तुकमहाभागानां सम्मानाय एकस्या विद्वद्गोष्ठ्या आयोजनं 'महाराजसंस्कृतकालेजस्य' विशदे प्रांगणे अक्रियत। यस्यां सभापतिरासीद् 'संस्कृतवाग्विवर्द्धिनीपरिषदः' अध्यक्षः राजस्थानविश्वविद्यालयस्य उपकुलपतिः डा० श्रीमथुरालालशर्ममहाभागः। स्वागतसम्मानोत्तरं संस्कृतकालेजस्याध्यक्षः श्रीचन्द्रशेखरद्विवेदिमहाभागः आगन्तुकमहोदयानां परिचयं प्रदाय, वर्तमानकाले राजस्थानप्रदेशे संस्कृतभाषायाः परिस्थितेः संक्षेपेण दिग्दर्शनमकरोत्।

ततो 'भारती'सम्पादकः कविशिरोमणिर्भट्टश्रीमथुरानाथशास्त्रिमहोदयो राजस्थानप्रान्ते पूर्वकालिकीं संस्कृतसेवाम्, प्रान्तेऽस्मिन् संस्कृतसंस्थानां माननीयतां च संसूच्य, वर्तमानशासने तस्य शनैः शनैर्ह्रासमवर्णयत्। सहैव संस्कृतज्ञानां, संस्कृतपरीक्षाणां च आङ्गलभाषावत् माननीयता यथा स्यात्तथा त्वरितं प्रतिविधातुं तत्सम्बन्धिभ्यः शासनाधिकारिभ्यः सानुरोधमसूचयत्।

'परीक्षामन्त्री, श्रीमहेशचन्द्रशास्त्रिमहोदयः 'चतुर्षु वर्षेषु संस्कृतपरीक्षाणां प्रगतिः कियत्यभवत्,' इत्यादि विवरणं प्रदाय एतत्परीक्षाणां केन्द्राः न केवलं भारते एव, अपि तु केलिफोर्निया, सीलोन. जोहानस्बर्ग, बर्मा, जापानप्रभृतिदेशेष्वपि सन्ति। सम्प्रति विदेशेषु प्रवर्धमानायाः संस्कृतं प्रति लोकानां रुचेस्तदिदं प्रत्यक्षं प्रदर्शनम्। अतएव भारतनिवासिनामार्यसंतानानां प्रमुखं कर्तव्यं यत् ते विश्वपरिषद्द्वारा प्रचारिते संस्कृतपरीक्षारूपेस्मिन् महायज्ञे सहयोगं प्रदाय निजात्मानं सम्माननेयुः।

श्रीदीक्षितारमहाभागः संस्कृतविश्वपरिषदा प्रेरितस्य भारतीयविद्याभवनस्य सरलानाम् अद्यापि उच्चतराणां शास्त्रीयसंस्कृतपरीक्षाणां स्थापनस्योद्देश्यं संसूच्य, समर्थयामासे यत् संस्कृतभाषायां सुखस्य, विश्वशान्तेश्च सन्देशः पदे पदे संभृतोऽस्ति यस्याऽऽधारेण भारतस्य महत्वं समग्रेऽपि विश्वमण्डले प्रख्यातम्। अस्माकं भारतस्य प्रधानमन्त्री शान्तेः कृते भूमण्डलेऽपि प्रथितमः। आर्यसंस्कृतेः परिचयः केवलमेकेनैव वाक्येन परिचिनुयुः—'भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षिभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाँसस्तनूभिः' इत्यादि प्रत्येकपुरुषः प्रातः प्रार्थयत। अद्य तु प्रातरेव संवादपत्रेषु युद्धाद्यशुभसंवादाः पठ्यन्ते। किं बहुना, ईशुख्रिष्टस्य जन्मतः पूर्वं ईजिप्टप्रदेशे द्वयोः राज्ञोः सन्धिपत्रे 'मित्रावरुणौ नः साक्षिणौ' इति साक्ष्यसूचनैं उदारभावः परिज्ञायेत। 'केलिफोर्निया' 'कपिलारण्यस्य' अपभ्रंशः। सगरस्य पुत्राः कपिलेन यत्र भस्मीकृताः स हि भस्मदेशः (Ash- land) तथा अश्वदेशः (Horse-land) इति प्रख्यायते।

सहारा 'मरु'प्रदेशे एका शिला प्राप्ताऽस्ति यस्या उपरि लिखितम्—

कान् प्राविधिकान् प्रति चाचेरुः।" (पृष्ठ २६९) कम्युनिष्टानां रक्तवर्णायां मुक्तिसेनायां कतिपये सैनिकास्तथाविधा अप्यासन् ये प्राक् नीलवर्णा अकथ्यन्त। गृहयुद्धस्य समाप्तौ कार्यसिद्धेरनन्तरमेकदा ते साइबेरियाया अरण्ये नलिकास्त्रगुटिकाभिरहन्यन्त। मरणसमये ते "आत्मक्रान्तिश्चिरं जीव्यात्!" तथा च "विश्वस्याराजकता चिरञ्जीव्यात्।" इति वाघोषं कुर्वन्ति स्म।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतस्य आर्षसंपदः

[संस्कृतभाषायां निहितस्य ज्ञानराशेः स्थूला काचिद्रूपरेखा ।]

(ले० सी० श्रीदामोदरमेनोन्, त्रिच्चूर, केरलम्)

संस्कृतभाषायाः तन्निहितायाश्चाक्षय्यसम्पदः प्रकीर्तने न केवलं भारतीयाः परंतु विदेशीया अपि समुत्सुकाः दरीदृश्यन्त इति प्रमोदावहमेतत् । परंतु तेषु भूयांसोपि संस्कृतस्य महिमानं साकल्येनाभिजानन्ति वा न वा इत्यत्र सुमहान् संशयोऽस्ति । तस्मात्तन्महिमानं तान् निबोधयतु अमरभारतीनिहितस्य विज्ञेयविद्यासञ्चयस्य दिङ्मात्रप्रदर्शनमत्र क्रियते ।

ऋग्वेदः यजुर्वेदः सामवेदः अथर्ववेदश्चेति चत्वारो वेदा इति सर्वेप्यभिजानन्ति । परं तु तेषामाकारविषये प्रायो भूयांसोपि जनाः विविक्तबोधा इति मे मतिः ।

"अनेन राज्ञा अयमत्र यागः कृतः ।" अनेन किं न सिध्येत् यद् वेदः ईश्वरश्च सर्वैर्मानिनः । अस्माकम् वेदमन्त्रेण—"सुमित्रा न ओषधयः सन्तु, दुर्मित्रास्तस्मै भूयासुर्योस्मान् द्वेष्टि यं च वयं द्विष्मः" इत्यादिना जर्मनप्रदेशे युद्धे विजयः समवाप्तः । किं विस्तरेण, अस्माभिः सुसंघटितैर्भूत्वा संस्कृतप्रचारस्तथा कर्त्तव्यो यथा जीविको पार्जनादिः सर्वोप्यभिलाषः पूर्णो भवेत् ।

अन्ते सभापतिपदात् डाक्टरमहाभागः अगन्तुकमहाभागानां मार्गप्रदर्शनानुसारम् संस्कृतप्रचारे प्रसारे च संघटनस्य प्रार्थनां विधाय, धन्यवादप्रदानोत्तरं सभां व्यसर्जयत् ।

ऋग्वेदः

देवतास्तुतिपराणि यज्ञोपयोगीनि मन्त्राणि, मन्त्रसङ्कलितास्सूक्तयः, सूक्तिसङ्कलितानि मण्डलानि एवमस्ति ऋग्वेदे विषयक्रमीकरणम् । मण्डलानि दशधा विभक्तानि । एकस्यां सूक्तौ अष्टाभ्यः अन्यूनानि मन्त्राणि विद्यन्ते । ऋग्वेदः इतरापेक्षया प्राचीनः श्रेष्ठतमश्च । इतरेषां वेदानां अयं आलंबोऽपि भवति ।

यजुर्वेदः

अयमपि मन्त्रसमजात्मकः । परं तु ऋग्वेदीयमन्त्रेभ्यः ईषद्भेदोस्त्यदसीयानाम् । अत्र मन्त्राणि गद्यपद्यात्मकतया ग्रथितानीति विशेषः । पद्यात्मकानि मन्त्राणि ऋचः, गद्यात्मकानि यजुर्वेदाश्च गृहीतानि । यजुर्वेदश्च शुक्लकृष्णभेदेन द्विविधः ।

दर्शपूर्णमासादियज्ञानामावश्यकानि मन्त्राणि यथाक्रमं विन्यस्तानि भवन्ति शुक्लयजुषि । तत्र ब्राह्मणानि न संक्राम्यन्ते । कृष्णे तु द्वयमपि (ब्राह्मणानि मन्त्राणि च) संकलय्य विन्यस्तं दृश्यते । शुक्लकृष्णेति (शुद्ध-मलिन) विभजनस्य संभवतः संकलनासंकलनप्रक्रियेयं हेतुः स्यादिति केचिदभिप्रयन्ते ।

सामवेदः

मन्त्रसञ्चयात्मको भवत्ययमपि । मन्त्राणि ऋग्वेदीयान्येव । परंतु तानि तथा ग्रथितानि यथा गानरीत्या उच्चारणक्षमाणि भवन्ति । तस्मात् सामवेदमन्त्राणि सामगानानीत्यभिधीयन्ते ।

अथर्ववेदः

शत्रुसंहारार्थं उत अन्येषामनिष्टापादनार्थं क्रियमाणानामाभिचारकर्मणां प्रपञ्चनं भवति अथर्ववेदस्य प्रतिपाद्यम् ।

कर्मकाण्डः ज्ञानकाण्डश्च ।

अखिलानामपि वेदानां बहवो भवन्ति अवान्तरविभागाः । संहिता, ब्राह्मणं, अर्थवादः, आरण्यकं, उपनिषदश्च इति ते विभागाः । ऋक्समूहात्मको मन्त्रभाग-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्संहिता भवति । यद्यप्युपनिषदोपि मन्त्रात्मिकास्तथापि ईशावास्योपनिषदेव संहितान्तपातिनी निगद्यते । तस्याश्च परिगणनं शुक्लयजुस्संहितायाम् ।

यज्ञादिकर्मप्रतिपादको भागः ब्राह्मणम् । ब्राह्मणात् परं अर्थवादः । ब्रांह्मणं अर्थवादांगकमित्यपि ग्राह्यम् ।

केषांचित् दैवतानां कर्मणां च विषये जनेषु भक्ति-श्रद्धादीनां निष्पादनार्थं क्रियमाणा स्तुतयः तथा केषांचि-द्दैवतानां कर्मणां विषये विद्वेषं निन्दां चोत्पादयितुम् प्रयुज्यमाना भर्त्सनोक्तयश्च अर्थवादमधितिष्ठन्ति ।

कर्मकाण्ड ज्ञानकाण्ड इति वेदानां अपरो विभागः । संहिता ब्राह्मणं-अर्थवादः इत्यवान्तरवेदत्रितयेषु अधिष्ठितः यागादिकर्मप्रतिपादको वेदपूर्वभागः कर्मकाण्डगतः । तथा आरण्यकोपनिषदधिष्ठितो उत्तरभागः ज्ञानकाण्डगतश्च । एकैकस्य वेदस्य पृथगारण्यका उपनिषदश्च सन्ति ।

वैदिकसाहित्यम्

वेदानां तथा तेषामवान्तरविभागानां च समवायः वैदिकसाहित्यमित्युच्यते । शान्तवीरादयो रसाः उपमो-त्प्रेक्षादयः अलङ्काराश्च तत्र विद्यन्ते । आधुनिकमिति विभाव्यमानाः गूढार्थकत्वप्रतिरूपात्मकत्वादयस्साहित्य-सङ्केताः (Mysticism and Symbolism) वैदिकसाहित्यस्य नितरां परिचितास्सन्ति । वेदाः अपौरु-षेया इति पौरस्त्यपण्डिता आर्यनिर्मिता इति पाश्चात्य-विद्वांसश्चाभिप्रयन्ति ।

उपवेदाः

आयुर्वेदः धनुर्वेदः गान्धर्ववेदः अर्थवेदश्चेति चत्वार उपवेदाः । हेतुस्कन्धः लिंगस्कन्धः औषधस्कन्ध-श्चेति त्रिभिः स्कन्धैरुपेतो भवति आयुर्वेदः । हेतुस्कन्धः निदानापरपर्यायिनं शरीरं, लिंगस्कन्धः रोगान्, औषध-स्कन्धः चिकित्सासाधकान् भेषजान् च प्रतिपादयति ।

आयुधविद्यैव धनुर्वेदः । दीक्षापादः संग्रहपादः, सिद्धपादः, प्रयोगपादश्चेति चतुष्पादसहितो भवति धनु-र्वेदः । अस्त्रशस्त्राद्यायुधलक्षणानि अधिकारिविचारश्च दीक्षापादे प्रतिपाद्यन्ते । संग्रहपादस्तु विविधदेशेषु प्रच-लितानां आयुधानां समग्रं विवरणं ददाति । आयुधपरि-शीलनस्य रीतिमावश्यकतां च बोधयति सिद्धिपादः । अपि च तत्र मन्त्रादिभिरायुधदेवतानां प्रीणनोपायश्च प्रद-र्शिताः भवन्ति । यत्र सामदानभेदा विफलीभवन्ति तत्र प्रयोक्तव्यस्य दण्डोपायस्य प्रपञ्चनं प्रयोगपादे पश्यामः ।

नृत्यगीतवाद्यादीनां विवरणं भवति गान्धर्ववेदस्य प्रमेयः । यजुषो नृत्तं साम्नो गीतं ऋचो वाद्यमिति तेषा-मुत्पत्तिक्रमः ।

धनशास्त्रमेव अर्थवेदः ।

अस्माकं उपयुक्तानि सजीवानि निर्जीवानि च यानि वस्तूनि विद्यन्ते तानि सर्वाणि परामृशत्यर्थवादः ।

वेदाङ्गानि ।

"शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा
कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः ॥"

शिक्षादीनां प्रतिपाद्यविषयाः वेदसम्बन्धिनः भवन्तीति तेषां वेदाङ्गानि इति व्यपदेशः ।

शिक्षा

वेदोच्चारणनियमानां क्रमीकृत्यानुशासनं शिक्षे-त्यर्थः । शिक्षायाः विषयः शब्द एव । वर्णः, स्वरः, मात्रा, बलम्, समम् सन्तानम् इति षट् विभागाः सन्ति शब्दस्य । स्वरव्यञ्जनात्मको लिपिरेव वर्णः । त्रिषष्टि-मिताः (६३) वर्णाः निर्दिष्टा भवन्ति शिक्षायाम् ।

उदात्तानुदात्तस्वरितभेदेन त्रिधा भवति स्वरः । एतेषां त्रिविधानां स्वराणां विकार एव सप्तस्वराः । षट्ज-ऋषभ-गान्धार-मध्यम-पञ्चम-धैवत-निषाद इति खलु सप्तस्वराणां सा-री-गा-म प-ध-नी नां संज्ञाक्रमः । एतेषु निषादगान्धारौ उदात्तौ, धैवत ऋषभौ अनुदात्तौ षट्ज-मध्यमपञ्चमाः स्वरिताश्च भवन्ति । शब्दस्यसु स्पष्टपरि-स्फुरणार्थं सुशक्तोच्चारणं बलम्, नातिवेगं नाति विलंबं चोच्चारणं समम्, प्रवाहधारेण नैरन्तर्येण उच्चारणं सन्तानं च भवति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याकरणम्

पदनिष्पादकं अर्थनिर्णायकं च शास्त्रं व्याकरणमिति संक्षेपतः वक्तव्यमास्ते। भाषायाः वाक्यम्, वाक्यात् पदं, पदादक्षरं, अक्षराद्वर्णः इत्यपग्रथनात्मकं भवति आद्यं विभजनम्। पदात् प्रकृतिप्रत्ययौ इत्यन्यम्। पदस्य पूर्वभागः प्रकृतिः, उत्तरभागः प्रत्ययः इति सुविदितं खलु। तत्रापि प्रकृतिः, धातुः, प्रातिपदिकश्चेति विभाज्या। धातुस्तु क्रियाधातुः नामधातुरिति द्विविधः। एवं प्रत्ययानां विविधो विभागः। धातोः परं विहिताः, प्रातिपदिकात् परं विहिताश्चेति द्विविधा सन्ति प्रत्ययाः। तिङ्-कृत् इत्यादयः प्रत्ययाः धातोः परं विधीयमानानां, सुप्-स्त्री प्रत्यय-तद्धिताश्च प्रातिपदिकात् परं विधीयमानानामुदाहरणम्।

अत्रनिर्दिष्टानां प्रकृतिप्रत्ययानां तन्निष्पादितानां पदानां पदसमूहात्मकानां वाक्यानां पृथक् पृथक् अर्थाश्च विद्यन्ते। एतेषामर्थानां शुद्धपदानां तदौपयिकानां सन्धि-समास-रूपनिष्पादनक्रमादीनां पदप्रयोगरीतीनां प्रदर्शनशालैव व्याकरणम्। संस्कृतव्याकरणं इतरभाषाव्याकरणमिव न केवलं शाब्दिकव्यापारेणैव तृप्तिं लभते। शब्दब्रह्म एवास्य परमं लक्ष्यम्। "एकः शब्दः सम्यक् प्रयुक्तः स्वर्गे लोके कामधुक् भवति।" इति प्रमाणमनुसृत्य शब्दब्रह्मसाक्षात्कारः मुक्तिसाधक इति वैयाकरणमतम्।

छन्दः

छन्दोविचितिरथवा वृत्तशास्त्रं इति च छन्दसो संज्ञान्तरे स्तः। वेदे विद्यमानानां पद्यात्मकमन्त्राणां लोके विद्यमानानां पद्यानां निबन्धनव्यवस्थां करोति छन्दः। छन्दः, वृत्तं, जातिरिति त्रिविधः प्रमेयः अस्त्यत्र। पद्यं हि छन्दोनिबद्धम्। वृत्तस्य छन्दसश्च अवयवावयवि भावः संबन्धः। एकस्यैव छन्दसः अनेकानि वृत्तानि सन्ति। उक्ता अत्युक्ता इत्यादीनि षड्विंशतिः छन्दांसि सन्ति। प्रतिपादं एकाक्षरतया चतुर्षु पादेषु चतुरक्षरमिता भवति उक्ता। एवं अत्युक्तादीनामपि ईषदीषद्विपर्ययः ग्राह्यः। अष्टमात् छन्दसः प्रभृत्येव श्लोका दृश्यन्ते। तत्पूर्वदृष्टानि छन्दांसि मन्त्रोपयोगीनि भवन्ति। षट्विंशतिछन्दोभ्यः परमपि वृत्तानि सन्ति। तेषां दण्डकानि इति संज्ञा। अक्षराश्रितानि मात्राश्रितानि छन्दांसि वृत्तानीत्युच्यन्ते। मात्राश्रितं वृत्तं जातिरिति भेदः।

निरुक्तम्

पदनिर्वचनशास्त्रं निरुक्तमित्यभिधीयते। वैदिकपदानि लौकिकपदानि च निरुक्तस्य विषयाः भवन्ति। वस्तुतः निरुक्तं व्याकरणस्य परिशिष्टम् इति वक्तव्यम्। नाम, आख्यातम्, उपसर्गः, निपातः, इति चतुर्धा विभक्तानि सर्वाणि पदानि। एतेषां चतुर्विधपदानां तदवयवानां निवर्चनं निरुक्ते साधितं विद्यते।

ज्यौतिषम्

गणितं, संहिता, होरा इति त्रयाणां स्कन्धानां, गोलं गणितं-जातकं-प्रश्नः मुहूर्तः निमित्तं इति षडंगानां समाहारो भवति ज्यौतिषम्। षट्सु अङ्गेषु गोलगणिते प्रथमस्कन्धे, जातकप्रश्नमुहूर्तानि द्वितीयस्कन्धे, निमित्तमेकं संहिताहोरयोरुभयोश्च अन्तर्भवन्ति। पूर्वोक्तानां स्कन्धानां गणितस्य प्रमाणमिति होरासहितयोः निमित्तमिति च संज्ञा। होरा व्यक्तीनां शुभाशुभौ, संहितासमुदायस्य वृद्धिक्षयादीन् च निरूपयति। होरायां संहितायां च निमित्तं प्रति निरूपणमप्यस्ति। धूमकेतूदयः, उल्कापातः शुभाशुभशकुनानि च निमित्तेष्वन्तर्भवन्ति।

कल्पः

वेदविहितयागादिकर्मणां राजधर्माणां प्रजाधर्माणां गृहस्थधर्माणां च विस्तृतानि विवरणविवेचनान्यावहच्छास्त्रम् भवति कल्पः। अस्य श्रौतसूत्रं, धर्मसूत्रं, गृह्यसूत्रमिति त्रयो विभागाः। श्रौतसूत्रं वैदिककर्मणां, धर्मसूत्रं नृपप्रजाधर्माणां गृह्यसूत्रं गृहस्थधर्माणां च प्रतिपादयान कल्पितानि। कल्पस्य अथवा कल्पसूत्रस्य कल्पशास्त्रमित्यपि संज्ञा। मनुस्मृतिप्रभृतीनि सर्वाणि धर्मशास्त्राणि कल्पशास्त्रविधेयानि भवन्ति।

उपाङ्गानि

मीमांसा, न्यायं, पुराणं, धर्मशास्त्रं एतानि चत्वारि वेदस्य उपाङ्गानि। मीमांसापदस्य विचार्यमित्यर्थः।

GURUKULA KANGRI LIBRARY

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकृते तु वेदार्थविचारशास्त्रमित्यर्थः ग्राह्यः। वेदार्थ-निर्णयो भवति मीमांसायाः विषयः। शिक्षा-व्याकरण-निरुक्तान्यपि वेदार्थबोधकानि किम्? इति कश्चित् प्रश्नः अत्रोन्नेतव्यः। सत्यम्। उच्यते-पदार्थवाक्यार्थभेदेन वेदार्थः द्विविधः। तयोरर्थयोः पदार्थमात्रबोधकाः शिक्षा-दयः। वाक्यार्थमात्रबोधिका मीमांसा इति विवेकः।

मीमांसायाः द्वैविध्यम्।

वेदस्य पूर्वकाण्डं उत्तरकाण्डं इति भेदेन द्विविधो विभागः पूर्वमेवोक्तः। तयोः पूर्वकाण्डे उक्तानां वाक्या-र्थानां निर्णायकः शास्त्रभागः उत्तरमीमांसेति संज्ञितः। उत्तरकाण्डोक्तानां वाक्यार्थानां निर्णायको भागः उत्तर-मीमांसा इति मीमांसायाः द्वैविध्यं इत्यपि ज्ञेयम्।

पूर्वमीमांसा अथवा कर्ममीमांसा।

पूर्वमीमांसाया उपज्ञाता भवति भगवान् जैमिनि-मुनिः। धर्माधर्मप्रतिपादकाः द्वादश अध्यायाः सन्ति पूर्वमीमांसायाम्। वेदे इष्टसाधनत्वेन विधीयमानानि यागादिकर्माणि धार्मिकाणि, निषिद्धतया प्रस्तूयमानानि कर्माणि अधार्मिकाणि इति च विश्वसन्ते जनाः। धर्मस्य फलं स्वर्गः अधर्मस्य निरयः इति जैमिनिना प्रकीर्तितम्।

उत्तरमीमांसा।

अस्याः ब्रह्ममीमांसा, ब्रह्मसूत्रं, शारीरिकसूत्रं, वेदान्तसूत्रं, वेदान्तदर्शनं इति नामान्तराणि सन्ति। व्यासकृता उत्तरमीमांसा चतुरध्यायिका भवति। एकैकस्य अध्यायस्य पृथक् पृथक् चत्वारः पदाश्च सन्ति। एषु षोडशपादेषु द्विनवत्युत्तरशतं (१९२) अधिकरणानि चतुष्पञ्चाशदुत्तरपञ्चशतं (५५४) सूत्राणि च विद्यन्ते। अधिकरणेषु क्रोडीकृतानां अर्थानां प्रपञ्चनं कुर्वन्ति सूत्राणि। मोक्षमार्गाणां प्रतिपादनमेव उत्तर-मीमांसायाः प्रमेयः। ब्रह्मज्ञानमन्तरेण मोक्षस्यालाभात् ब्रह्मचर्चा अवश्यानुष्ठेया इत्युद्बोधयन्नेव बादरायणः विषयान् प्रस्तौति।

न्यायशास्त्रम्

लौकिकानां न्यायानां-प्रमाणैः परीक्षितानां प्रमेयाणां विवरणं विशकलनं च करोति न्यायशास्त्रम्। अक्षपाद इत्यपराह्वयेन गौतममुनिना उपज्ञातमिदमात्मीयशास्त्रम्। मोक्ष एव अस्यापि लक्ष्यम्। प्रमाणप्रमेयादीनां षोडश-पदार्थानां तत्वावधारणेन निश्रेयससिद्धिर्भविष्यतीति न्यायशास्त्रस्य सिद्धान्तः। न्यायशास्त्रस्य सर्वथा नेदीयः अपरमेकं दर्शनशास्त्रमस्ति—वैशेषिकम्। कणादमुनि-प्रणीतमिदम्। यद्यपि द्वयोरपि दर्शनयोर्लक्ष्यमभिन्नं तथापि मार्गयोरीषद्भिभेदः द्रव्यगुणादीन् सप्तपदार्थान् प्रत्यक्षानुमानात्मकं प्रमाणद्वयं च कणादः उररीकरोति। गौतमः न केवलं प्रत्यक्षानुमानद्वयं किंतु उपमानशब्दा-वपि प्रमाणकोटौ अन्तर्भावयति। न्यायवैशेषिकयोस्स-ङ्कलनेन संजातं एकं दर्शनं भवति तर्कशास्त्रम्।

पुराणम्।

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितं चेति पुराणं पञ्चलक्षणम्।

इति लक्षणानुसारेण सर्गादीनि पञ्च कर्माणि पुराणे वर्णितानि भवन्ति। प्रपञ्चसृष्टिः, प्रलयः, ब्रह्मसृष्टिः पुत्रपौत्रकाणा वंशपरंपरा, एकैकस्य मनोः भरणकालः, महापुरुषाणां गुणकीर्तनं, एवं भवति सर्गादि पञ्चानां यथाक्रममर्थकल्पनम्।

अष्टादश पुराणानि तावन्त्येवोपपुराणानि च सन्ति। एतेभ्यः ऋते इतिहासपुराणनाम्ना प्रथितौ द्वौ विशिष्ट-ग्रन्थावपि स्तः। रामायणं महाभारतं च। पुराणे देव-कथानां इतिहासे मनुष्यकथानां च प्रामुख्यम्।

धर्मशास्त्रम्

वर्णाश्रमधमराजधर्मप्रभृतीनां विविधधर्माणां विव-रणं धर्मशास्त्राल्लभ्यते। धर्मशास्त्राणां स्मृतयः इत्यप्य-भिधानम्। अवश्यं विज्ञेयाः विविधविषयाः स्मृतिषु प्रतिपादिताः भवन्ति। अष्टादश स्मृतयस्तत्संख्यका उप-स्मृतयश्च सन्ति।

कपिलस्य सांख्यदर्शनं पतञ्जलेर्योगदर्शनं बौद्धजैन-दर्शनानि यद्यप्यत्र न परामृष्टानि तथापि तानि दर्शनान्यपि संस्कृतभाषायाः विज्ञानसंपदः एव इत्यनुसन्धेयम्।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भोजन के बाद
दिन में दो बार..

सभी ऋतु में
स्वास्थ्य लाभ का
श्रेष्ठ साधन

सुदृढ़ स्वास्थ्य गठन के लिए

दो चमच मृतसंजीवनी के साथ चार चमच महाद्राक्षारिष्ट (६ सालका पुराना) सेवन करने से आपका स्वास्थ्य का शीघ्रही उन्नति होगा।

पुराना महाद्राक्षारिष्ट फुसफुस को शक्तिशाली और सर्दी, खांसि, श्वास वगरह रोग निवारण करने मे अत्यधिक फलप्रद है। मृतसंजीवनी भुक और हजम शक्ति वर्धक और बलकारक टनिक है। दोनो दवा एक साथ सेवन करने आपका शरिर का वजन और शक्ति बढ़ाता है। मनमे उत्साह और उद्दीपना का संचार करेगा और नवलब्ध स्वास्थ्य और कर्मशक्ति दीर्घ समय तक अटूट रखता है।

साधना औषधालय

विश्व का सर्वश्रेष्ठ ढाका आयुर्वेद प्रतिष्ठान–

कलकत्ता केन्द्र :
डा. नरेशचन्द्र घोष एम. बी. बी. एस.,
आयुर्वेद- आचार्य
३६, गोआलपारा रोड, कलकत्ता-३७

अध्यक्ष : डा. योगेशचन्द्र घोष, एम. ए. आयुर्वेद- शास्त्री, एफ. सी. एस. (लन्दन), एम.सी.एस. (अमेरिका) भागलपुर कालेज के भूतपूर्व रसायनशास्त्र के प्रोफेसर।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हा हन्त शोकप्रदो दुःसंवादः

संस्कृतसेविनो भारतीपाठकाः शोकप्रदेन दुःसंवादेनानेन विषादमनुभवेयुर्यत् 'संस्कृतस्य' 'संस्कृतेश्च' चिरादभिमानी, हृदयेन सेवकः अ० भा० संस्कृतसंमेलनस्य भूतपूर्वो महामन्त्री, भारतीयकेन्द्रीय संस्कृत मण्डलस्य सदस्यः श्रीकेदारनाथसारस्वतमहाभागः साम्प्रतं नास्मिन् ससारे । दिसम्बरमासस्य एकादशतारिकायां प्रातरहम्, अनिश्चितप्रायमिमं दुःसंवादं यावदहं सविषादं विचारयामि तावदेवं देहली कमलानगरस्थात् अ० भा० संस्कृतसाहित्यसंमेलनकार्यालयात् वर्तमानमहामन्त्रिणो डा० श्रीमण्डनमिश्रमहाभागस्य शोकप्रदं पत्र मिदमुपलब्धं यत्—"दिसम्बरमासस्य पञ्चमतारिकायां रात्रेः पादोननववादन समये सारस्वतमहोदयस्य देहावसानमभूत । सेयं दुर्घटना देहलीनगरस्थे 'इरविनचिकित्सालये' अकस्मात् समघटत । एवं तु महोदयस्यास्य बहोः कालादेव स्वास्थ्यमासीद् विगुणम्, किन्तु एषु दिनेषु अकस्मादेव रक्तगतेः प्रवर्द्धनेन देहविमोकः समभवत् ।

सारस्वतमहोदयेन संस्कृतभारत्याश्चिरकालादेव समर्हणीया सेवा विहिता । 'सुप्रभात' पत्रस्य बहूनि वर्षाणि संपादनं प्रकाशनं चाक्रियत । ततः संस्कृतरत्नाकरस्य संपादनं बहोः कालादेव महाभागस्यास्य हस्तेनाऽभूत् । संस्कृतसम्मेलनस्य तु सोयं प्राणभूत एवाभूत् । महाभागस्याऽस्य अकस्मात् परलोकप्रस्थानेन संस्कृतभाषायाः, सम्मेलनस्य च महतीऽयं क्षतिरुपस्थितेति को वा संस्कृतसेवी नाऽनुभवेत् ? ये येऽस्य महोदयस्य परिचिताः, संबन्धिनश्चासन्, ते दुर्घटनया भूयांसं विषादमनुभवन्ति । एतस्य परलोकोपगमनेन भूयांसि कार्याणि समभवन् रुद्धानि ।

संमेलनस्यास्य 'संस्कृतप्रसारपरीक्षाः' दिसम्बरमासस्य १३, १४ तारिकयोरासन् निर्णीतास्ताः शोकेऽस्मिन् मासस्याऽस्य २६, २७ तारिकयोः संभवेयुः । 'भारती' परिवारः शोकेऽस्मिन् समवेदनां प्रकाशयति । चराचरनियन्ता भगवान् परलोकगतायाऽत्मने शाश्वतीं शान्तिम्, तदुत्तराधिकारिभ्यश्च सान्त्वनां धैर्यं च प्रदेयादित्याशारमहे ।

भारतीय-औषधानां सर्वाधिकं बृहत् विश्वस्तं निर्माणकेन्द्रम्

श्री वैद्यनाथ-आयुर्वेद-भवनम्

(आयुर्वेद लिमिटेड)

कलिकाता ★ पटना ★ झांसी ★ नागपुरम्

सर्वेषामायुर्वेदिकौषधानां तथा सर्वरोगेषु उपयुक्तानां भेषजानां
सावधानतया, वैज्ञानिकरीत्या प्रचुरपरिमाणे

निर्माणकारकम्

भारतवर्षे सर्वत्र एकमूल्येन भेषजानीमानि लभ्यते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धारावाहिकं कथानकम्

★ जीवनस्य पृष्ठद्वयम् ★

—ले० मानसी

पूर्वकथाः—

(आत्मकथाया लेखिका बाल्यादेव संस्कृते रुचिमग्रहीत् । सा 'इण्टर' परीक्षायां संस्कृतविषयं गृहीतवती, किन्तु अध्यापनाय बालिकाविद्यालये समुचिता व्यवस्था नाऽऽसीत्, अतोस्याः पिता यो हि स्वयं सम्पन्नः, सम्भ्रान्तः एकस्याङ्गलविद्यालयस्याऽऽध्यक्षश्चासीत्—एकम् एम. ए. (संस्कृत) परीक्षार्थिनं एतां पाठयितुं नियुयोज । राकेशनामाऽयं युवकः सुशीलः, गम्भीरः, शान्तश्चाऽऽसीत् । तत्सकाशादियं कालिदासग्रन्थानामध्ययनमकरोत्—तस्मै च मनस्येव श्रद्धां समर्पितवती । बी० ए० परीक्षा अपि अनया तस्यैव प्रेरणया, अध्यापनेन च दत्ता । किन्तु परीक्षापरिणामस्य निर्गमनात्पूर्वमेव एका घटनाऽघटत । राकेशेन वृत्तिं गवेषयता तन्नगरं परित्यक्तम् । सोयमासीदस्या उपरि महानाघातः, तथाऽप्यनयाऽध्ययनं न परित्यक्तम् । तदानीमेव एतस्या विवाहस्य चर्चा प्राचलत् । जनकेनोक्तं यदस्मिन्नेव वर्षे तस्या विवाहो भवेत् । किन्तु एतद्विषये नैतया कापि जिज्ञासा प्रकटिता । शनैः शनैर्विवाहदिवसः समीपमागतः । तथापि नेयमजानात् क एतां परिणेतुमागच्छति । वाग्दानं सम्पन्नं, यस्मिन् श्वश्रूं श्वशुरं चेयं दृष्टवती । विवाहदिने लग्नमण्डपस्था इयं चिन्तितवती यदयं नरो यः कोऽपि भवतु–राकेशं विस्मृत्यैनमेव हृदये पूजयिष्यामि । अन्तःपटेऽपसृतेऽनया दृष्टं यद्यस्तां परिणीतवान् , स राकेश एवाऽभूत् । इयं चकिताऽस्थात् । अनया ज्ञातं यत्सोऽधुना प्रशासकीयसेवायाम् (I.A.S) अधिकारी वर्त्तते । विवाहानन्तरं राकेशेन निश्चितं यत्स देहरादूननगरे पत्न्या सह सप्ताहमतिवाहयेत् ।·]

देहरादूननगरस्य सुविशाले शीतले च बाष्पयान-विश्रमस्थले (Station) वयं सर्वे राकेशं प्रतीक्षमाणा आस्म । यथैव दूरतः कुज्झटिकायाः विस्तृतं वितानं विदारयन् बाष्पयानस्यं तीव्रः प्रकाशो दृष्टिगोचरोऽभूत्-मम हृदयस्य गतिस्तीव्रा समभूत् । राकेशोऽद्य समायाति । अद्यैव तद्दिनं यदा मम विवाहितं जीवनमारभ्यते । सह-सैव बाष्पयानस्य त्वरिता गतिरकस्मात् मन्दा समजायत । प्रथमश्रेण्या एकस्मिन् प्रकोष्ठे राकेशस्य मन्दं स्मयमानं मुखमदृश्यत । माधुरी रतिकान्तश्च तस्यामेव दिशि सरभसं प्रासरताम् । अहमपि मन्दं मन्दमचलम् । तृतीय-श्रेण्याः प्रकोष्ठाद् राकेशस्य परिचारको निर्गतः । एनमेव परिचारकमादाय राकेशो विवाहेऽपि समागतोऽभूत् । एनमेव सहादायात्रापि स समागतः । राकेशोऽवतीर्यैव सस्मितं सर्वैः सहामिलत् । मां प्रेक्ष्य पृष्टवान्--"सर्वं समीचीनम् !"

विद्यालये पठन्त्या मया, अध्यापकेभ्यः, सहपाठि-नीभ्यः, मित्रेभ्यश्च न जाने कतिवारं स एवायं कुशल-प्रश्नः श्रुतोऽभूत् - नजाने कियन्ति चास्य सुन्दरसुन्दरा-ण्युत्तराणि मया दत्तानि यतो हि सोऽयं सभ्यतायाः प्रथम आचारः । किन्तु राकेशस्य तमिमं प्रश्नं श्रुत्वा मस्तिष्क-ममूर्त्तमिव, जिह्वा स्तब्धेव, मनो मुग्धमिव, बुद्धिर्मूर्च्छिते-वानुभूता । नूनं प्रश्नेऽस्मिन् काचिदननुभूतपूर्वा मधुरता, अननुमितपूर्वमाकूतं चाभविष्यत् । अत एव नाहं किमपि वक्तुमपारयम् । "सख्यः शपामि यदि किंचिदपि स्मरामि ।" अस्मान् सर्वानादाय राकेशः स्टेशनस्य निरा-मिषाहारगृहे प्राविशत् । शीतं पर्याप्तमासीत् । अति-प्रलम्बान् सुस्थूलांश्च ऊर्णापरिधेयान् धारयन्तो बहवो जना उष्णपेयानि पिबन्त उपविष्टा अभूवन् । तेष्वेकोऽपि विदेशीयो नासीदिति दृष्ट्वा राकेशः सस्मितं माधुरी-मवोचत् । "अस्मत्सहकर्माणः प्रशासकाः कथयन्ति यद्वयं निरामिषभोजिनो भूत्वापि उष्णपेयपानार्थं सामिषाहार-गृहेष्वेव गच्छामः ।

"किमिति ?" रतिकान्तेन साश्चर्यं पृष्टम् ।

"यतो हि विदेशीया यात्रिणः, आङ्गलाश्च सामि-षाहारगृहेष्वेव मिलन्ति । ते तत्रामिषमभ्यवहरन्ति--वयं च केवलमुष्णजलं पिबामः, तथापि तैः सह संलापे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सभ्यताया अभ्यासो भवतीति तेषां तर्कः। गुरुभ्यस्तेभ्यः सदाचारं शिक्षित्वा तेऽन्येषामुपरि प्रभावं पातयितुं क्षमन्ते।" वयं सर्वे मुक्तकण्ठमहसाम। आहारगृहस्य कोणे कौचिन्नवदम्पती स्थितावास्ताम्। तौ वीक्ष्य राकेशो मां प्रति निभृतमस्मयत।

अस्माभिरुष्णपेयस्य चषकं समापितमपि नासीत् राकेशस्य परिचारकेन सूचितं यत् पण्यशकटिः (Taxi) बहिः सन्नद्धाऽऽस्ते। सर्वमिदं वीक्ष्य नाऽस्माकमाश्चर्यमभूत्। परिचारका अमी एवं विधातुं प्रशिक्षिता भवन्ति।

× × ×

राकेशेन पान्थावासस्यास्मदीयः प्रकोष्ठः सुतरां परीक्षितः। मदीयानि पुस्तकानि वीक्ष्य स प्रसन्न एवाभूदिति मया तन्मुखमुद्रयाऽनुमितम्। अपरस्मिन्नेव दिवसे माधुरी रतिकान्तश्च परावर्त्तेतां पितृगृहं प्रति। अहं राकेशः परिचारकश्च केवलमास्म। देहरादूननगरे तदात्वे सेनासंनिवेशस्य महान् संभार आसीत्। सेनाया बृहदधिकारिणः—तेषां पत्न्यश्च वैदेशिकरीत्या विहारं चिकीर्षन्ति स्मेति तत्र पाश्चात्यपद्धतेर्बहवः उपहारगृहाः, समितिगृहाः (Clubs), मनोरंजनालयाश्चासन। एषु खलु सीधुपानस्य, द्वन्द्वनृत्यस्य (Ball dance) च प्रथा नितरां लोकप्रिया सामान्या चाभूत्। शनिवासरेषु, रविवासरेषु च एवविधेषु मनोरंजनस्थलेषु भूयस्तरां संकुलता, विद्युच्चाकचक्यं, वैदेशिकवाद्यानां चीत्काराः, सीधुपात्राणां (काचमयानां) चणत्काराश्च सायंकालं मुखरयन्ति स्म।

"सत्पुष्करद्योतितरङ्गशोभिन्यमन्दमारब्धमृदङ्गवाद्ये।
उद्यानवापीपयसीव यस्यामेणीदृशो नाट्यगृहे रमन्ते॥"

इत्यस्य नवीनतमं संस्करणं देहरादूननगरे द्रष्टुं शक्यम्।

प्रशासनिकसेवाया अधिकारीति कृत्वा यदि राकेशस्तथाविधेषु मनोरंजनालयेषु बद्धरतिः स्यादित्यत्र नाश्चर्यम्। किन्तु अस्मत्पान्थावासस्य संमुखमेव स्थिते मनोरंजनालये यदाऽऽवां प्रविष्टौ तदनन्तरं केवलं पञ्चकला एव व्यतीताः स्युः—यद्राकेशेन कृतं तद् दृष्ट्वा मादृश्याः कन्यकायाः प्रसादः स्वाभाविक एवाऽभूत्।

यदाऽऽवां नृत्यालयं प्रविष्टौ, कतिपये आंङ्गलभारतीयाः स्वरमणीभिः सार्धं काचकूपिकाभ्यो मदिरां पिबन्तः तिष्ठन्तः स्वयंचालितध्वनियन्त्रस्य संमुखे कतिपयनाणकान् प्रवेश्य स्वयंवादितध्वनिचक्कलिकानां (Records) संगीत रसयन्तो दृष्टाः। राकेशेन क्षणं स्थित्वा सर्वमिदं दृश्यमवलोकितम्। अहं निस्पन्दाऽस्थाम्। नृत्यालयस्य प्रबन्धकस्त्वरितमेव कर्गदलेखनीरादायास्मत्सविधमुपातिष्ठत्। राकेशस्तेनानुयुक्तः "किं 'रम' नामिका मदिरा, शेंपेनाख्या—अथवा अन्यादृशी?" राकेशः किमपि नावोचत्।

क्षणानन्तरं तेनोक्तं—"अहं नवविवाहितोऽस्मि। अत्र मधुयामिनीर्यापयितुमागतः।"

"सम्यक्—अधुनैव नृत्यालयं प्रविशतु भवान्। तत्र बहवो दम्पतयः। परस्परं परिचय....."

"अहमत्र मत्पत्न्या सह भ्रमणायागतः। परेषां पत्नीभिः साकं नृत्यं विधातुं न।"

"तदपि जाने। किन्तु तादृशः परिचयस्तु नितरामावश्यकः। अस्मिन् शीतबहुले प्रदेशे—सीधुसुधाया उष्णतायां न कोऽप्यनुभवति स्वपत्नी—परपत्नी—विवेकम्।"

"अहमत्र विवेकहीनो भवितुं नायातः। अन्यत्र कुत्रचन व्यतियापियिष्यामि समयम्।"

"किन्तु श्रीमन् कुत्र! अस्मिन् देशे मनोरंजनालयान् विहाय कुत्र भवान् स्थानं लप्स्यते?"

"जानामि। मदीयपान्थावासस्य भोजनालयः समितिकक्षश्चैव मे पर्याप्तः स्यात्। धन्यवादाः।"

एतदनन्तरं विद्युद्वेगेनाऽऽवां बहिरायातौ। मम चेतसि प्रसन्नतायाः सुबोध्यः प्रभावोऽभूत्। पान्थावासं परावृत्य—ऊर्णायाः सुस्थूलानि वस्त्राण्याकण्ठं—आपादतलं च परिधायाऽऽवां देहरादूननगरस्य कुज्झटिकावृतेषु दीर्घमार्गेषु एकान्तभ्रमणाय निर्गतौ।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

संस्कृतोन्नतिं प्रति विशिष्य अवधानं भवेत्

भारतशिक्षामन्त्री डा० श्री कालूलालश्रीमाली महोदयः 'प्रेस-कांफ्रेंस' समारोहे जालन्धरनगरे नवम्बर-मासस्य षोडशतारिकायां संस्कृतभाषाविषये समुदारं दृष्टिकोणं प्रकाशयामास। स हि सोल्लासं घोषयामास यत्—'तृतीयपञ्चवर्षीययोजनायां संस्कृतविकासस्य कृते कियान् द्रव्यव्ययः क्रियेत इति विशिष्य विचार्येत। कुरुक्षेत्रविद्यालयः संस्कृतविकासस्य कृते आवश्यकं कार्यं नाद्यावधि चकार। न चास्य कार्यविस्तारोऽपि संस्कृत-प्रसारविषये कोऽप्यभवत्। साम्प्रतमस्माकमेषः सुदृढो विचारः, परिनिष्ठितः प्रस्तावश्चायं संवृत्तो यत् समस्तेष्वपि विश्वविद्यालयेषु संस्कृतभाषायाः अध्ययनाऽध्यापने प्रवृद्धिं नीयेताम्। पृथक् एकस्य संस्कृतविश्वविद्यालयस्य स्थापनाऽपेक्षया समस्तेषु विश्वविद्यालयेषु संस्कृतविभागस्य नियमनं विशेषतो लाभकरं स्यात्।

एतेन सहैव शिक्षामन्त्रिमहोदयः सबलं समर्थयामासे यत् प्रशिक्षितानामध्यापकानां साम्प्रतं विशिष्य आवश्यकता। शिक्षाविषये ये किल महत्वपूर्णा विचारास्ते प्रशिक्षितानामध्यापकानां अभावे न कथंचिदपि पूर्णा भवेयुः। अध्यापकानां च समुन्नतिः, प्रशिक्षितता च तदैव संभवेद् यदा तेषां वेतने साधीयान् परिष्कारो भवेत्। विद्यालयानां कृते विशाल-विशालभवनानां तादृशी चिन्ता नास्ति, समुज्ज्वलोपकरणानां चापि तादृग् विचारो नास्ति, यावान् विचारः अध्यापकानां वेतनपरिष्कारस्याऽस्ति। यावत् कालं अध्यापकानां वेतने समुन्नतिः संशोधनं च न भवेत् तावत्कालं शिक्षाप्रणाल्यां संशोधनस्य समुन्नमनस्य च विचारः केवलं स्वप्नदर्शनमिव। अत एव शिक्षाविभागस्य प्रथममिदं कर्तव्यं यत् अध्यापकानां वेतनक्रमे समुचितं संतोषावहं च संशोधनं कुर्यात्।'

मन्यामहे यद् बहोः कालादनन्तरं शिक्षाविभागस्य शिक्षामर्मस्थले अवधानमाकृष्टमभूत्। अध्यापकानां परिस्थितिः साम्प्रतं विचारणीया संवृत्ता। तेषां प्रतिष्ठायाः कौटुम्बिकमर्यादायाश्च निर्वाहः समुचितं वेतनं विना नेदानीं संभवति। अत एव वेतनवृद्धिः सुतरामावश्यकी एव। अत्र हि सर्वतः पूर्वं संस्कृताध्यापकानामवसरः। एते हि स्वल्पतमेन वेतनेन यथाकथंचिद् जीवननिर्वाहं कुर्वन्ति। अस्तु,

सर्वेष्वपि विश्वविद्यालयेषु संस्कृतविभागस्य नियतीकरणं सुमहदावश्यकम्, मार्मिकं च। नानाप्रदेशेषु पृथक् पृथक् संस्कृतविश्वविद्यालयस्थापनं न संभवति, न च तावद्व्ययकरणार्थमनुमतिश्च भवेत्। अत एव सर्वेष्वपि विश्वविद्यालयेषु, तदधिकृतेषु कालेजेषु च संस्कृतविभागस्य समुचिता व्यवस्था बहुलाभकरी संवर्तेत। नानाप्रदेशेषु संस्कृतप्रचारस्य या ह्यपेक्षा साऽनेन पूरिता भवेत्। अत एव शिक्षामन्त्रिणः सोयं प्रस्तावः शीघ्रमेव कार्यरूपे परिणमेत् इति प्रतीक्षेरन् सर्वेऽपि संस्कृतसेवकाः। त्वरितं संपादयेद् भगवान् भारतस्य तदिदं वास्तविकं भद्रमिति किं वा विशेषविवरणेन।

भारते संप्रति बहुत्र भारतीयसंस्कृतेः प्रतिकूला शिक्षा

प्रयागे उत्तरप्रदेशीय'लोकसेवाऽऽयोग' सदस्यः श्रीसुरतिनारायणमणित्रिपाठिमहोदयः 'प्रयागस्थमहिला-सेवासदन' महाविद्यालये (इण्टरमीजियट कालेज) छात्रासंघस्य शुभारम्भं कुर्वन् शीर्षकप्रोक्तं मतमिदं प्राकाशयत्। महोदयेनाऽनेन प्रोक्तम्—' भारतस्य संस्कृतिः 'सत्यसंकल्प अहिंसा—आध्यात्मिकता—धर्माणाम्' उपरि आधारिताऽस्ति। भारतीया शिक्षा या हि उच्चतमस्तरे प्रदीयमाना भवेत् सा हि भारतीयभाषा-माध्यमेनैव प्रदीयमाना हितावहा भवेत्। किन्तु भारते छात्राः, महिलाछात्राश्च निजां बुद्धिशक्तिं प्रायो वैदेशिक-भाषाशिक्षायामेव बहुशः समापयन्ति। तस्यास्तदिदं फलं परिणतं यत्संप्रति भारतीयशिक्षितानामाचारव्यवहाराः साधारणतया पाश्चात्यपद्धतिमनुसरन्तः प्राप्यन्ते।

मुखतो वयं भारतीयसंस्कृतेः संरक्षां तस्या अनुगमनं च घोषयामः, किन्तु संस्कृतिसंरक्षाया यानि साधनानि तेभ्यः प्रत्यक्षं प्रतिकूलं वयमाचरामः। अग्निक्रीडामासेव-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

फोन—२६११६३ मिल्स—६२५४३ ग्राम्स—'हिन्द' ग्राम

★ हिन्द मिल्स लिमिटेड् ★

१५, दुगल रोड़, बैलार्ड एस्टेट

बम्बई १

निर्मातारः—

★ कुञ्चुकवस्त्रं (शर्टिङ्गस) ★ शय्यावस्त्र (शीटिंगस-लिंपाई) ★ लम्बवस्त्र (लांगक्लॉथ)
★ ड्रिलस ★ मुलस ★ क्रेप-मुजरी वस्त्राणां धौतानां ★ शाटिकानाम्
★ 'काकेट चिन्हितानां' तथा ★ स्पेशल फाइबर सूत्राणां च ।

उच्चकक्षायाः, नवीनतायाः, दृढतायाश्च कृते

मुरारजी गोकुलदास, स्पिनिंग एण्ड वीविंग कं. लि.

निर्मितानां वस्त्राणां क्रयः कार्यः

सुपारी बाग रोड़
टेलीफोन नं० ६००२१
(थ्री लाइनस)

परेल बम्बई नं० १२
टेलीग्रामस 'मोगोको'
बम्बई

= सर्वाधिकं सन्तोषप्रदं संस्थानम् =

विशेषता—

(मिनिरल खाकीं तथा अन्य ड्रिलस, धोती तथा साडी, गाइलापेट, डोब्बी चाटर लांगक्लाथ, कौटिंग, शर्टिङ्ग, वायला, मुल्स तथा अन्य फाइन मर्सराइजड वस्त्र)

अभिकर्तारः (एजेंट्स)—पीरामल सन्स प्राइवेट लि०

सेलिंग एजेंट्स—पीरामल एण्ड कं० प्राइवेट लि०
चन्द्रचोक, मूलजी जेठा मार्केट बम्बई २.
टेलीफोन नं० २९३५३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपदेशमालायां

व्यायाम-सेवनम्

पूर्वानुवृत्तम्—

चतुर्थो मणिः

(ले० महोपाध्याय आशुकविः श्रीहरिशास्त्री दाधीचः, जयपुरम्)

तदिमानि सर्वाणि अपि धावनचलनकूर्दनादिभिः हस्तपादाक्षेपणैश्च पूर्वोक्तगुणकराणि भवन्त्येवेति यथासमयं यथोपयोगं सेव्यानि ।

व्यायाममुपलक्ष्यास्माकमायुर्वेदविद्भिः प्रोक्तम्—

लाघवं कर्मसामर्थ्यं दीप्तोग्निर्भेदसः क्षयः ।
विभक्तघनगात्रत्वं व्यायामादुपजायते ।

सर्वविधेऽपि शारीरव्यायामे श्रमबाहुल्यवत् स्वेदोद्गमः । स्वेदोद्गमेन च मलानां दोषाणां च रोमकूपेभ्यः क्षरणं नवीनानां च वायुकणानां तत्र प्रवेशनात् प्राणानामाप्यायनं भवतीति विज्ञानयुक्तिरवधेया ।

व्यायामं कुर्वतां शरीरे आलस्यं नोपजायते उत्साहो वर्धते स्फूर्तिश्च सदैव संनिधत्ते बलं समेधते पुष्टिः स्फूर्जति इत्यादयो बहवो लाभाः अनुभवगम्याः सन्ति ।

परं वयमत्र इदमनुभूतं निश्चितम् ब्रूमहे ।

यदस्मिन् शरीरव्यायामे बहुश्रमप्रधानतया श्वासप्रश्वासानां अधिकसंख्यया वर्धनात् आयुःक्षयं वदामः । आयुर्हि श्वासगणनया निर्णीतमस्माकं, धनगणनावत् लोकानाम् । एकस्मिन् दिने मानवस्य २१६०० श्वासा यान्त्यायान्ति च । तदा परिश्रमबहुलतया श्वासानां दीर्घतरत्वं शीघ्रगतिश्च भवतीति नियतसंख्यातोऽत्यधिकं क्षयसंभवात् हानिरेवायुषो भविष्यति न वृद्धिरिति विचारणीयम् ।

तो ये सभी व्यायाम के प्रकार कन्दुकक्रीडा के प्रकार दौड़ना कूदना चलना उछलना आदि हाथ पैरों के प्रक्षेप आक्षेपों से पूर्वोक्तगुणकारक होते हैं, इसलिए इन्हें यथायोग्य यथाउपयोग सेवन करना चाहिये । व्यायाम के विषय में हमारे आयुर्वेदविज्ञाताओं ने कहा है देखिए—लाघवं कर्मसामर्थ्यं दीप्तोऽग्निर्भेदसः क्षयः । विभक्तघनगात्रत्वं व्यायामादुपजायते ॥१॥ अष्टांग हृदय सूत्रस्थान द्वितीय अध्याय । लघुता कर्मका सामर्थ्य अग्नि का दीपन भेद का क्षय गात्रो का विभाग और गहराई ये सब गुण व्यायाम से प्राप्त होते हैं ।

सभी तरह के शरीरव्यायाम से श्रम होने से पसीना होता है । पसीने निकलने से रोमकूपों से दोष मल आदि झर निकल जाता है और नए वायु कणों का उनमें प्रवेश होता है । इससे प्राण शक्ति का आप्यायन समृद्धि होती है । यह वैज्ञानिकों की संमत बात है ।

व्यायाम करने वालों के शरीर में आलस्य नहीं होता है । उत्साह और स्फूर्ति बढती है, बल बढता है तथा पुष्टि मिलती है । इत्यादि बहुत लाभ अनुभूत होते है । हम यहां इस निश्चय को बतलाते हैं—कि शरीर व्यायाम में बहुत श्रम प्रधान होने से, सांसों की संख्या अधिक और तेज होजाने से आयुवृद्धि नहीं होती प्रत्युत ह्रास ही होता है । इसलिए उपयोग आवे उतना (थौड़ा) ही सेवन करें अधिकता से न करें ।

आयु को हमारे पूर्वजो ने धनगणना की तरह श्वासगणना से निर्णीत कर लिया है—एक दिन में मानव के २१६०० इक्कीस हजार छः सौ सांस आते जाते हैं, यह साधारण गणना है । शरीर व्यायाम के समय श्रम अधिक होने मे सांस लम्बे होंगे और उनकी गति शीघ्र तेज होगी । इस कारण नियत संख्या से अधिक क्षय (खर्च) होने का संभव है । इससे आयु की हानि ही है बढना नहीं है, यह विचारने की बात है । क्रमशः

मानाः वयं शीतलताया आशां कुर्मः । प्रत्यहं पश्यामो यद् भारतीयशिक्षायाः पद्धतिः प्रत्यहं चिन्तितात्फलाद्विरुद्धमार्गे गच्छन्ती प्राप्यते । संस्कृतभाषासेवकाः, संस्कृतपण्डिताश्च बहोः कालादिदं सूचयन्ति, किन्तु पश्चिम शिक्षाप्रबुद्धमनसो नवीनमहाभागा नेदं कर्णे कुर्वन्ति ।

अपि सांप्रतमपि भवेत्प्रबोधः शिक्षाकर्णधाराणामस्मिन् विषये ? देयादनुकूलां मतिं भगवानिति मुहुः प्रार्थयामहे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपयोगिनी लघुकथा :- मानवोचिता सहृदयता

ले० श्रीकमलानाथ शर्मा
जयपुरम्

विद्यार्थिनां परीक्षा प्रचलिताऽऽसीत् । परीक्षाभवने अत्यन्तं नीरवताऽवभत् । अकस्मात् बहिर्मार्गे महाभयंकरः शब्दोऽभवत् । बहिरागत्य दृष्टं यत् एका 'जीप'-शकटिः अधोमुखी पतिता । आरोहकेषु एकः पुरुषो मूर्च्छितः पतितोऽस्ति । तस्य मस्तके बलवदाघातो लग्नोऽभवत् । किन्तु अत्र कोऽपि उपचारकर्ता नाऽऽसीत् । चिकित्सालयोऽपि दूरे । अस्मिन् समये किञ्चिद् यानमपि नासीत् । एतस्मिन्नेव समये एका मरुत्तरशकटिरायाता । यस्यामेको वृद्धपुरुषः स्थितोऽभूत् । मार्गे मूर्च्छितं पुरुषं दृष्ट्वा स निजां शकटिं स्थापयामास । वृद्धः स्वयं निर्बलः आसीत्, किन्तु अस्य पीडां दृष्ट्वा सः तं पुरुषं निजशकट्यामारोप्य चिकित्सालये प्रापयत् । चिकित्साभवने तस्य समुचित उपचारः समभवत्, येन तस्य जीवनसंकटं दूरेऽभवत् ।

सत्यमस्ति—स्वार्थबहुलेऽपि संसारे दयालुसभ्या अपि केचिद् भवन्त्येव ये निःस्वार्थभावेन परोपकाराद् विमुखा न भवन्ति ।

विद्यार्थियों की परीक्षा चल रही थी । परीक्षा भवन में बिलकुल शान्ति थी । अचानक बाहर के रास्ते में एक बहुत जोर का शब्द हुआ । बाहर जाके देखा कि एक जीपकार उलटी पड़ी है । सवारी करने वालों में से एक आदमी मूर्छित (बेहोश) पड़ा हुआ है । उसके सिर पर एक जोर का आघात लगा हुआ था । लेकिन यहां कोई भी उपचार करने वाला नहीं था । अस्पताल भी दूर था । इस समय कोई सवारी भी न थी । इस ही समय एक मोटर गाड़ी आई । इसमें एक वृद्ध व्यक्ति बैठा था । रास्ते में घायल पुरुष को पड़ा हुआ देखकर उसने अपनी मोटर में बैठा दिया । बूढ़ा स्वयं निर्बल था, लेकिन इसकी पीड़ा को देखकर उसने घायल पुरुष को अपनी गाड़ी में बैठाकर अस्पताल पहुंचा दिया । अस्पताल में उसकी उचित चिकित्सा सम्भव हुई जिससे उसका जीवन संकट दूर हुआ ।

सच है, इस संसार में स्वार्थ अवश्य अधिक है लेकिन कुछ सभ्य लोग भी होते हैं, जो निस्वार्थ भाव से दूसरों के उपकार से अलग नहीं होते हैं । ★

हरिनगर सूगर मिल्स लि०

★★★ फेक्टरी ★★★

हरिनगर [एन० ई० रेल्वे] [चम्पारन जिला] उत्तर बिहार

दूरभाषयन्त्रम्—

मर्यादा–रामनगर [चम्पारन]

प्रधानकार्यालय—

२०७, कालबादेवी रोड, बम्बई–२

दूरभाषयन्त्रम्—

'क्रिसूगर' [बम्बई]

निर्मातारः—(अत्युत्तम-शुद्धशर्करायाः)

★ प्योअर, ★ फस्टक्लास, ★ क्रस्टल ★ फेन सूगर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

संतुष्यत्युत्तमः स्तुत्या, धनेन महताऽधमः ।
प्रसीदन्ति जपैर्देवी बलिभिर्भूतविग्रहाः ॥ १

उत्तम पुरुष अपनी प्रशंसा (कीर्ति) से प्रसन्न होता है। खूब धन देने से अधम राजी होता है। देखिये, देवता लोग जप करने से प्रसन्न होते हैं। किन्तु शरीर में आनेवाले भूत प्रेत बलिदान (उतारे) से राजी होते हैं ॥ १

स्वजनैः स्वात्मवज्जन्तुर्ज्ञायते गुणवान् परैः ।
गोपैर्गोपवदज्ञायि हरिर्देवो जगत्पतिः ॥ २

अपने आदमी अपने स्वजन (बन्धु बान्धव) को अपने आत्मा के जैसा जानते हैं। दूसरे आदमी उसको गुणवान् जानते हैं (गुणी होने पर भी अपने बन्धुबान्धव अपने आदमी को गुणी कहकर नहीं समझते)। जगत्पति कृष्ण भगवान् को गोपों ने गोप के समान समझा था ॥२

उत्तमस्तोषमायाति तदङ्गं पोष्यते यदि ।
वृक्षः प्रसीदति प्रायः पादाभ्यङ्गे न न स्वयम् ॥ ३

उत्तम चरणों के यदि अङ्ग [सम्बन्धी, अनुजीवी, सेवक आदि] का पोषण किया जाय तो वे प्रसन्न होते हैं। वृक्ष के पाद चरण (अर्थात् जड़) को यदि सींचा जाय तो प्रसन्न होता है, बढता है। खास वृक्षपर जल डालने से नहीं ॥ ३

दुर्भगः स्यात्प्रकृत्या यो विभूत्याऽपि स तादृशः ।
गोमयं श्रीनिवासोऽस्ति न तथापि मनोहरम् ॥ ४

जो स्वभाव से कुरूप (खराब) होता है, वह वैभव ('बरकत') में भी वैसा ही अर्थात् खराब ही होता है। गोबर पवित्र और शुभ गिना जाता है किन्तु देखने में सुन्दर नहीं होता। (गोबर का गोबर ही है) ॥४

आगच्छन्नुत्सवो भाति यथैव न तथा गतः ।
हिमांशुरुदयन् सायं चकास्ति न तथोषसि ॥ ५

आता हुआ उत्सव ('त्यौहार') जैसा प्रिय लगता है वैसा बीत जाने पर नहीं। सायंकाल में उदय होता होता हुआ चन्द्रमा जिस तरह सुशोभित होता है, वैसा प्रातः काल में नहीं ॥५

संतोषक्षतये पुंसामाकस्मिकधनाऽऽगमः ।
सरसां सेतुभेदाय वर्षौघः स च न स्थिरः ॥ ६

अकस्मात् बहुत सा धन मिल जाना मनुष्यों के संतोष को नाश कर देता है [संतोषी पुरुष भी यकायक बहुत धन मिलजाने पर, अपनी पुरानी चाल छोड़ देता है]। वर्षा के जल का अचानक प्रवाह तलावों के बांध ('पुल') को तोड़ देता है, चाहे जलका बढ़ाव स्थिर न रहे ॥ ६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रीयताम् – **सैंचुरी** अङ्कितानि प्रसिद्धानि नव–वस्त्राणि

★ शुद्धा आरगन्डी ★ लैक्स ब्यूटी मुल्स ★ मोतीवायलवस्त्रं, पूर्णवायलवस्त्रं च
★ उद्भिन्न (एम्ब्रोस्ड) चित्राङ्कनानि ★ परमसुखधौतवस्त्रम्
★ श्वेतं, रक्तं, रेखाङ्कितं च पापलीनवस्त्रम् ★ चित्राङ्कितं छीटवस्त्रम्, लहा, ड्रिल्स
★ चादर, अङ्ग प्रोंछक, काटन, वेस्ट, बम्बलेत्यादीनि

निर्माताः –

दी सैंचुरी स्पिनिंग एण्ड मैन्युफैक्चरिंग कम्पनी [सीमिता]

इण्डस्ट्री हाउस, १५६, चर्चगेट रिक्लेमेशन

बम्बई १



क्या आप इसे जानते हैं ?

मनुष्य को जीवन के त्रितापों से मुक्ति प्रदान करनेवाला यह सनातन ज्योतिर्लिंग देश के सबसे बड़े और विश्वासी आयुर्वेदीय प्रतिष्ठान का बोध-चिह्न बनकर लाखों-करोड़ों लोगों के जीवन को आरोग्य प्रदान करने के कार्य में आज अग्रसर है। आपने यदि अब तक बैद्यनाथ औषधियों के गुण का स्वयं अनुभव नहीं किया है, तो एक बार इसे अवश्य आजमाइये।

देशी दवाओं का सब से बड़ा और विश्वासी कारखाना

श्री **बैद्यनाथ**

आयुर्वेद भवन प्राइवेट लि०

कलकत्ता · पटना · झाँसी · नागपुर

P43

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

GURUKULA KANGRI LIBRARY HARDWAR

सूखी नहर में जीवन लहर

मिल जुल कर मेहनत करने से बड़े बड़े काम भी पूरे किये जा सकते हैं।

जम्मू-कश्मीर के रामहाल इलाके में करना खण्ड में एक साढ़े सात मील लम्बी नहर काफी दिनों से सूखी पड़ी थी।

एक दिन लोगों में जोश उमड़ा। इलाके के कोई ४०० आदमी इकट्ठे हुए और फावड़ा-कुदाली सम्भाल कर नहर ठीक करने निकल पड़े। जमी हुई मिट्टी निकाल बाहर फेंकी गयी, पाट चौड़ा कर दिया गया, किनारे ऊंचे उठा कर मजबूत कर दिये गये, पानी का बहाव रोकने वाली चट्टानों को उड़ा दिया गया। वर्षों से सूखी उस नहर में कल कल करता हुआ पानी बहने लगा। वही नहर आजकल आस पास के कई गांवों की सूखी धरती की प्यास बुझा कर उसे हरा भरा करती है।

इस प्रकार श्रमदान में अपनी सहायता आप करके अपनी सुख-सुविधा बढ़ाई जा सकती है। इससे देश की प्रगति भी तेजी से होती है।

योजना की सिद्धि आपकी समृद्धि

DA-59/335

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

प्रकाशक—जयबहादुरसिंह पता—गोपालजी का रास्ता जयपुर (राजस्थान)

मुद्रक—श्री शक्ति आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर

Digitized by Arya Samaj Foundation Chennai and eGangotri

243

भारती

संस्कृतस्य प्रमुखं मासिकपत्रम्

पश्चिमराष्ट्रेष्वपि यो भारतमहिमानमाघोषत् ।
स्वामिविवेकानन्दो गुणैरमन्दोदयो जयति ॥१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

वर्षम् १०
तृतीयोऽङ्कः
वार्षिकमूल्यम् (१) चतस्रो मुद्राः एकम्
चत्वारिंशत् नवपैसाः (४० नये पैसे

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान-मद्रास-मध्यप्रदेश-सौराष्ट्र-भूपाल-उत्तरप्रदेश-बिहार-पञ्जनद-आन्ध्र-बम्बई-सर्वकारै-स्वीकृता—

विषय-सूची

क्रम संख्या	लेखाः	लेखकाः	पृष्ठ संख्या
१.	उत्तिष्ठ	श्रीशिवशरयणझा, झांसी	५१
२.	उमा	श्रीवृद्धिचन्द्रशास्त्री, जयपुरम्	५२
३.	द्राक्तरजीवागो एकमध्ययनम्	श्रीगणेशरामशर्मा, झालावाड़	५४
४.	अमरभारतीमहत्त्वम्	श्री श्रीधरप्रसादपन्तः 'सुधांशु' शास्त्री, पीलीभीत	५९
५.	स्वातन्त्र्यसंग्रामवीरेभ्यः श्रद्धाञ्जलिः	श्रीकृष्णलालनादानः, नई दिल्ली	६२
६.	जीवनस्य पृष्ठद्वयम्	सहसम्पादकः	६३
७.	शोकोद्गारः	श्रीदीनानाथत्रिवेदी 'मधुपः' जयपुरम्	६५
८.	प्राचीनसंस्कृतौ आरण्य (ईरान) देशः	श्रीमल्लिनाथशर्मा चौमालः	६६
९.	सम्पादकीयम्	सम्पादकः	६६
१०.	व्यायाम-सेवनम्	श्रीहरिशास्त्री दाधीचः, जयपुरम्	६९
११.	अन्तरात्मनो नादः	श्रीकमलानाथशर्मा, जयपुरम्	७१
१२.	सूक्ति-सुधा	सम्पादकः	

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्र० सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादक :—
देवर्षिकलानाथशास्त्री
साहित्याचार्यः एम. ए.
जयपुरम्

भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

प्रबन्धसम्पादकः—
गिरिराजशर्माशास्त्री
भारती-भवन
गोपालजी का रास्ता,
जयपुर

वर्षम् १० | पौषमासः, सं० २०१६ | अङ्कः ३

उत्तिष्ठ

(ले० श्रीशिवशरणझा, झांसी)

अलस-भावं मुञ्च किञ्चोत्तिष्ठ, अयमुत्थान-समयः ॥
उत्थितः समये श्रमी सम्पादयति निज-कार्य-जातम् ।
तव निशायास्तुच्छताया अभूदेतत् सुप्रभातम् ।
लुप्त-गौरव-लाभ एवाग्रे लुठति सम्पाद्य-विषयः ॥१

विस्मरसि तं स्वमितिहासं विश्व-बोधयितारमेकम् ।
अतुल-महसा भासमानं सार्वदिक-विश्रुत-विवेकम् ।
कुरु च कल्ये शङ्ख-नादं यदुत्तिष्ठेद् मनुज-निचयः ॥२

वैदिकं वचनं त्वदीयं श्रोतुमुत्कण्ठते विश्वम् ।
त्वं कुतो मौनं गृहीत्वा निह्नुषे जनजीवित-स्वम् ।
ज्ञान-दानैः संविधेयाः पुनः शुचयो लोक-रुचयः ॥ ३

जगदिदं नरकायमानं प्रवचनैः कुरु स्वर्ग-कल्पम् ।
हर, मनुज-कर्तव्यता-पाठेन तत्कल्पित-विकल्पम् ।
भू-गुरो, हे ज्ञानसिन्धो ! वितरणीया ज्ञान-निधयः ॥४

अस्य विततज्ञान-तमसः विनाशाय त्वां विहाय ।
प्रभविष्यति मानसे कः करुण-भावं संनिधाय ।
संबुभूषति मानवास्त्रैरद्य मानवता-प्रविलयः ॥ ५

मानवः पशुतामुपेतः सन्ततं कलहायमानः ।
लोपयति शान्तिं मुखं च भू-तलादथ साभिमानः ।
इत्ययुक्तं रोद्धुकामः समयमेनं मा स्म गमयः ॥६

'वर्जनीया जनैः शङ्का शीत-संग्रामो न कार्यः ।
विश्व-जन-कल्याणभावात्मको ध्येयः सदा धार्यः ।
सन्तु वै सर्वे कुशलिनः' उपदिशानिशमद्य सदयः ॥ ७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उमा

[आख्यायिका]

पूर्वानुवृत्तम्—

ले० श्रीवृद्धिचन्द्रशास्त्री, व्याकरण-धर्म्मशास्त्राचार्यः, जयपुरम्

प्रातरुमा यदा स्वगृहमायात् तदा श्वश्रूवाः पञ्चत्वप्राप्तेर्वृत्तं ज्ञात्वाऽभवदधीरा किन्तु चन्द्रमौलेस्तादृशीं विह्वलतामवलोक्य धैर्येण तं बोधयन्ती सकलमप्यौर्द्ध्वदैहिकं सुचारु तेन न्यवर्तयत्। आसीत् चन्द्रमौलिर्विमना अन्यस्मिन्नहनि। उमया चिरमाश्वासितः कथं कथमपि शरीरकार्याणि व्यदधात्। श्रद्धया मातुः श्राद्धादिकं च सकलमकरोत्।

व्यतिगतं वत्सरम्। निवृत्तं मातुः वार्षिकं श्राद्धम्। शनैः शनैः मातृवियोगदुःखं शैथिल्यं प्राप चन्द्रमौलेः। कस्य खलु मातापितरौ सुचिरं तिष्ठतः। एतादृशो दिवसो जीवने समायात्येव यस्मिन् मातृपितृवियोगजन्मा हृदयदाही शल्यतुल्यः शोकविपाकः सोढव्य एव। किन्तु को जानीते कस्य कीदृशः प्राक्तनसंस्काराः। मातृवियोगदुःखं हृदयान्निःसृतमेव न हि ततः प्रागेव चन्द्रमौलेरपरमिव हृदयमुमा रुग्णतामगात्। कारणान्मे किञ्चिदपि त्रासो मा भूत् हृदयवल्लभस्येति हेतोस्तया सुचिरं न किमपि प्रकटितं तस्मिन्।

हन्त! कस्मिंश्चित् सामाजिके कर्मणि तन्मयतया प्रवृत्तेन चन्द्रमौलिना सुचिरं नैतत् किमपि ज्ञातम्। पुनरप्यागता शारदी शका, गता च। जगतः सामान्योऽयं क्रमः। शिशिरवसन्तौ पुनरायातः, सम्यगेवोक्तं भगवता शङ्कराचार्येण, कालः क्रीडति, गच्छत्यायुः। न हीतरततः किमप्यवलोकयति कर्त्तव्यनिष्ठः। स वीरप्रेरितः शर इव महता संरम्भेण स्वकार्य-साधने एव भवति संलग्नः। येन केनापि प्रकारेण सामाजिकं साहित्यिकं च तत्कार्यं साफल्यमगात् तस्य। तेन सुखस्य श्वासो गृहीतः। क्लेशः फलेन हि पुनर्नवतां विधत्ते किन्तु चन्द्रमौलेः शरीरं सततपरिश्रमेण जर्जरितमिवाभवत्। प्रतिदिनं क्षीणतां गच्छन्त्या उमायाः तनूमवलोक्य च सोधुना विशेषेण चिन्तितोऽभूत्। जलवायुपरिवर्तनाय सा पितृगृहं आनीता। तत्रापि तस्याः स्वास्थ्यं न मार्गे समागतम्। इति पुनः स्वगृहमानीता। त्रिचतुरदिवसानन्तरमेव दैवदुर्विपाकात् चन्द्रमौलेः, सा बालापत्यानि विहाय तत्रैव स्वः प्रयाता। निर्वृत्तं सकलमौर्द्ध्वदैहिकं तस्याः। तस्मिन्नेवाहनि स उमायाः शयनकक्षे प्राविशत्। तत्र सर्वाणि वस्तूनि व्यवस्थया सन्ति रक्षितानि। एकं स्वीयं छायाचित्रमपि तत्रावालोकितम्। उमया चित्रमिदमेकेनागन्तुना चित्रकारेण निर्मापितम्। आसीत् भावपूर्णं तत्। तस्मिन् यूथिकासुमनसां विम्लानैका माला विराजते। तस्य चित्रस्य पार्श्वे उमाया मुद्रयाङ्कितम् एकं पत्रं संप्राप्तम्। चन्द्रमौलिना तदाश्चर्येण स्वकरे गृहीतम्। तदुपरि लिखितमासीत्—श्रीमतश्चन्द्रमौलेः करकमलयोर्मिलिन्दायतामिदम्। चन्द्रमौलिना विचित्रेण भावावेशेन समुद्घाटितं तत्। उमायाः सुन्दराक्षरैस्तत्रेदं लिखितमासीत्—

प्रियतम,

उमेयं भवतश्चिराय वियुज्यते। मामाह्वयन्ति देवदूताः। नाहं चिरं प्राणान् धारयिष्यामीति सुदृढो मे विश्वासः। गच्छामि नाथ, यादृशो मयि भवतोऽतिशयितः प्रेमा तमहं सम्यग् जानामि। यावच्छक्यं निर्वोढव्यः सः। मत्संमुखे कृता प्रतिज्ञा न त्वया विस्मर्तव्या। किमधिकं वच्मि। अहमुमायाश्चिरं तारुण्यं तस्याः सदैकरसं सौन्दर्यं च भवते समर्प्य गच्छामि। विश्वसिमि, भविष्यति भवदीये नेत्रे वलीपलितयुक्तं त्रुटितरदनं कान्तिहीनं च उमाया वदनं न कदापि विलोकयिष्यतः। ममायं प्रेमा, ममेदं शाश्वतं यौवनञ्च भवन्तं कर्तव्यपथे प्रेरयिष्यति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विनम्रं विनिवेदयामि नाथ त्वया एतस्याः प्रेरणाया न विधेयमवहेलनम्। न कदाचिन् मनसि समानेयं यन्मध्ये-मार्गं मां परित्यज्य पलायितेयमुमा। स्वामिन्! भवतो न्तिमं मे मानसिकमालिङ्गनं ममान्तिमोयं प्रणामः।

भवदीयैव—उमा

असकृत् अक्षणोरश्रुधाराः संप्रोच्छ्य चन्द्रमौलिना पत्रं समापितम्। ततस्तद्धस्तात् तत्स्खलितम्। उपविष्टः स तस्यास्तस्मिन्नेव पर्यङ्के। तस्य स्वान्तं शून्यमिव समजायत। हृदयगतेरवरोधं स तन्मयतया प्रत्यैक्षत। स पाषाणमूर्तिरिव निर्निमेषाभ्यामक्षिभ्यां पश्यन्नास्त। कियत्कालपर्यन्तं स तत्रैवमुपविष्ट इति कः कथयितुं शक्तः। सायमभवत्, रात्रिरागता किन्तु संभाव्यते स तथैव चिरं निश्चेष्टमुपविष्टः। तस्याश्रूणि शुष्काणि, हृदयं काष्ठतामाप। एकैकशः कानिचिन्मित्राणि समागतानि, तस्यां विचित्रायां परिस्थितौ तमवलोक्य तूष्णीमेव ततः परावृत्तानि चिररात्राय। स तथैवोपविष्टो न जाने कदा निद्रादेव्याः शरणमगात्। अपरेद्युः महामहान्तो गुरवः संप्राप्ताः। धैर्य्यधारणस्योपदेशं दत्वैव प्रतिनिवृत्ताः। समाचारपत्रेषु समवेदनां प्रकटयितुं शोकप्रकाशकानाम्—"नव एव वयसि बालापत्यानि विहाय चन्द्रमौलेः पत्नी दिवं गतेति दुःखास्पदम्" प्रकाशमागता टिप्पणी। सुदूरदूरतः शोकं प्रकटयितुं प्राप्तान्यनेकानि पत्राणि। तेष्वेकतमे इदमपि लिखितमासीद् यदधुना त्वया मातृत्वमपि निर्वाह्यम् इति।

अन्येद्युः प्रातरुमाया जननी समायाता! तया विलोकितम् चन्द्रमौलिः किञ्चित् प्रकृतिस्थः किन्तु चिन्तामग्न इवास्ते। तया पृष्टो वत्स, कीदृशी खलु मानसिकी परिस्थितिः।

मातः! सर्वथा स्वस्थोऽस्मि। उमया यत्कार्यं मयि निहितं तदेवाहमधुना विधास्यामि। मया न कदापि चिन्तितं न चावबुद्धं यदीदृशः पटाक्षेपः स्याज्जीवने मे। किन्तु ह्यजानादुमा। तया मम कर्तव्यं चिरपूर्वमेव निरधार्यत। उमया नात्महननम् अपि त्वात्मदानं वितीर्णमस्मै जनाय। आम् तदात्मदानमात्महत्यायां परिणमयितुं शक्यं किन्तु एवं कृते विश्वासघातः कृतघ्नता च मच्छिरसि समायात्। अतो नैवं करिष्यामीति मे विनिश्चयः।

उमायाः मात्रा चन्द्रमौलेरात्मभावः परिज्ञातः। सा किञ्चित् तूष्णीकातिष्ठत्। न जाने किम्, चन्द्रमौलिरकस्मादुत्थितः स्वस्थानात्। श्वश्रूः शनैः पृष्टवती क्व गम्यते वत्स! उमां विलोकयितुमित्युत्तरितं तेन। अहमपि त्वया सह चलिष्यामि चन्द्र। कदाचिन् ममापि सा नयनपथि गामिनी भवेत्। इति वदन्त्या एव तस्याः कण्ठावरोधः समजनि। नेत्राभ्यामश्रुधारा निरगलन्। चन्द्रमौलिर्गृहान्निःसर्तुमियेष परं माताऽब्रवीदुमायाः, वत्स न कुत्रापि दृष्टिपथे समायादुमा। मौले, वैक्लव्यं त्यज, धृतिं बधान। किं व्यस्मार्षीः प्रतिज्ञामेकपद एव। विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः! किमियं कालिदासभणितिर्न स्मर्यते त्वया।

जागरणमिव समजनि चन्द्रमौलेः। उपविष्टः स पुनः स्वासने किञ्चित्कालं स्थित्वा जननी उमायाः स्वगृहान् प्रति न्यवर्तत। चन्द्रः स्वस्थवत् सकलानि करोति शरीरकार्याणि किन्तु कान्ताग्रहीतमनसः, मनसोस्ति दैन्यम्। तद्दैन्यं कः कथं दूरीकुर्यात्!

विमनाः स कदाचित् कलानिधिमवलोक्य चिन्तयति "श्रूयते किल "मनश्चन्द्रे निलीयते।" प्रियाया मे मनः सत्यमत्रैव निलीनं स्यात्। मन्ये, तद् गृहीत्वैवायं जगदाह्लादयति स्वयं च चन्दति। किन्तु हन्त, कथं मामयं न प्रसादयति? आम् ज्ञातं, न मे कान्तायाः कान्तं स्वान्तमत्र कलङ्किनि कलितम् अन्यथा कथमयं मां न कलयेत्। तत् किं श्रुतिरपि स्वप्रामाण्यं परित्यजति! कोयं व्यामोहः? न हि न हि, अत्र महाकवेः श्रीहर्षस्य दृष्टिकोणस्तथ्यतामावहतीति मन्ये। "तस्याः किल श्रुतिमाह तदर्थिकां प्रियमुखेन्दुपरां विबुधः स्मरः।" सत्यं तदेव जातम्। उमाया मनो मय्येव न्यलीयत। अन्यथा कथं मे स्वस्थवृत्तं संभाव्येत। किन्तु रे कलङ्किन्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्राक्तरजीवागो एकमध्ययनम्

पूर्वानुवृत्तम्—

मूललेखकः—श्रीरामकृष्णमहाभागः
अनुवादकः—विद्याभूषण श्रीगणेशरामशर्मा,
साहित्यरत्नम् झालावाड़ (राजस्थान)

परस्परमविश्वासस्य तादृशी लहरी जत व्याप्नोद्यन्न कोऽपि मिथो मुक्तभावं वार्तालापमपि कर्तुं पारयामास।

सैषा रक्तसेना यं ग्रामं प्राप्नोतिस्म तत्र पुराणीः सभाः (Councils) छिन्नभिन्नाः कृत्वा मण्डलसमितीः (Party Committees) स्थापयति स्म यासु सैनिकविशेषज्ञानां प्रामुख्यं भवति स्म। परन्तु जनताः, प्राचीनाः क्रान्तिकारिणश्च तदिदं नाभ्यवाञ्छन्। एकस्मिन् ग्रामे किलैकस्या एवंविधायाः समितेः स्थापनाकाले १९०५ वर्षे क्रान्तौ जातायां कश्चन भुक्तदण्डः श्रमजीविनां नेता स्वभीतिं सुस्पष्टं वर्णयति—

".....सैनिकविशेषज्ञानां समितौ रक्षणस्य प्रश्नोऽतीवाऽसंतोषजनकोऽस्ति। सन् १९०५ वर्षस्य क्रान्तौ भागं गृहीतवत्सु कर्मकरेष्वस्मासु विश्वासो नास्ते। इमे हि सर्वदा प्रति-क्रान्तिवादिनो भवन्ति, बोलशेविकानां शासनं प्रति रूसदेशस्य प्रजानां विचारा महत्खेदखिन्नतापूर्णा बभूवुः।

"प्रजानामियमिच्छासीद्यत्ताः क्रान्तेर्विजये शांतिपूर्वकं विमर्शं कुर्युः परन्तु बोलशेविकं शासनं यद्धि विदेशीयानां धनपुञ्जस्य दासरूपं वर्तते, अस्मदाशाकेन्द्रं विधानसभां (Constituent Assembly) शस्त्रास्त्राणां पाशविकेन बलेनाच्छिनत्। अधुना चारक्षितानां निश्शस्त्राणां च रक्तं नदीप्रवाह इव प्रवहमानमास्ते.....।" (पृष्ठ २९२)

"परन्तु, सर्वादौ, आक्टूबरक्रान्तेरनन्तरं सामाजिक्या उन्नतेर्यत्स्वरूपं बुध्यते, तन्न मे प्रोत्साहप्रदमस्ति। अपरं चैतत् व्यावहारिकताया बहु दूरं वर्तते तथास्य चर्चैव

कुत्सितस्वान्त, कतीनां पुनः सतीनां चित्तमनुकूलयितुं त्वया न चेष्टितम्? परं कथय रे कथय कुत्र कुत्र साफल्यमवाप्तं त्वयका? "सतीव योषित् प्रकृतिः सुनिश्चला पुमांसमभ्येति भवान्तरेष्वपि।" किमिदं सिद्धान्तवाक्यं त्वया विस्मृतम्? मम मनो यातं, सुदूरे यातम्। न जाने क्व यातम्, यातु नाम। निश्चितं पुनरायास्यति वृद्धिं गृहीत्वा आयास्यति। परं पृच्छामि रे तव हस्तेऽनेन किमायातम्? व्यर्थमेवायास्यते। अनेन फल्गुकर्मणा तव जडत्वमेव प्रत्यक्षं मयकानुभूतं दौरात्म्यं चेति—न जाने स कतिधा कतिवारमुपालभत भगवन्तं जगदाह्लादकं शशिनम्।

कदाचिदेकान्ते समुपविष्टः सोनुभवति यत्तस्य हृदयं स्फुटतीव। विना हि मृगशावाक्ष्यास्तमोभूतमिवेदं जगत् परिलक्ष्यते। अन्तरात्मा तस्य घोरान्धकारे निमज्जतीव। किन्तु हन्त, मन्दभाग्यो वराकः स किं विदध्यात्। शोकसागरे मग्नस्य तस्य परिस्थितिमवलोक्य स्मृतिपथमायान्ति महाकवेर्भवभूतेः शोकसन्दीपनान्यक्षराणि—

हा हा देवि, स्फुटति हृदयं ध्वंसते देहबन्धः,
शून्यं मन्ये जगदविरलज्वालमन्तर्ज्वलामि।
सीदत्यन्धे तमसि विधुरो मज्जतीवान्तरात्मा,
विष्वङ् मोहः स्थगयति कथं मन्दभाग्यः करोमि।

किं बहुना, शून्ये स्थाने विकलकरणैस्तस्य तैस्तैश्चरितैः—मन्ये—

"अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्।"

धन्यासि उमे, धन्यासि यया गुणैरुदारैरेवं समाकृष्यत चन्द्रमौलिः।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्तसागरमुल्लोलकल्लोलं व्यधत्त, तन्मे सन्देहो भवति, यदिदं साध्यसाधनयोरौचित्यं विनिर्णयति ०००००००।"
(पृष्ठ २९२)

"ते (कम्युनिष्टाः) कथयन्ति यत् वयं श्रेष्ठस्य न्याय-निष्ठापूर्णस्य च कार्यस्य स्वागतं कुर्मः····· ····। व्यवहारे च यूयं पश्यथ यद्विचाराणामभिप्रायः केवलं शब्दैरेवास्ते ! क्रान्तेस्तथा तेषां शासनस्य च प्रशंसनेनैव वर्तते·····।" (पृष्ठ ३६५)

द्राक्तरजीवागो बोलशेविकशासनस्य दृष्टौ स्वस्य स्वतन्त्रविचारैर्दुःखकरमासीत् । सः स्वानुरूपं कार्यं नासादयति स्म यत्र सः स्वात्मनः प्रतिभायाः सम्पूर्णमुपयोगं कर्तुं प्राभविष्यत् । कम्युनिष्टा अत्राञ्छन् यद्धि सः स्वकीयं सहजातमन्तर्ज्ञानमुपेक्ष्य तेषामेव गुणगानं करोतु । स्वयं यूरिणः (द्राक्तरजीवागोमहाशयस्य) शब्देषु—"·····मदीयमेकं पापमेतद्वर्तते, यदहं सहजातेऽन्तर्ज्ञाने विश्वसिमि । कीदृशोऽयमुपहासः ।—ते सर्वे सोद्घोषं सम्बोध्य कथयन्ति यदहं निदाने प्रवीणोऽस्मि—इदं च निश्चयपूर्वकं सत्यमस्ति यदहं रोगाणां निदाने न बहु त्रुटीः करोमि—अवसरस्यायमुपयोगः सहजज्ञानं नास्ति तदान्यत्किं वर्तते, यत्ते तदेतावज्जघन्यं मन्यन्ते ·····।"
(पृष्ठ ३६६)

कम्युनिष्टानां शासनप्रणाली विचित्रासीत् । न तस्यां स्वतन्त्रचेतनायाः कृते स्थानं वर्तते । यो हि तेषां क्रान्तेः प्रशंसां करोतिस्म स सुखमाप्नोति स्म, परन्तु यो मनागपि स्वातन्त्र्यं प्रकटयतिस्म, स तत्कालमेवास्त्रगुटिकया हन्यते स्म । मिथ्यावादिनः प्रशंसकाः प्रवञ्चकाश्च फलिताः पुष्पिताश्चाभूवन् । लोका अशांतिमनुभवन्तो जारशासनमेव श्रेयस्करममन्यन्त । सर्वतो भयस्यातङ्कस्य च राज्यमासीत् । विवशतया जनताः क्रान्तिं स्वीचक्रुस्तथा 'आम्' 'समीचीनम्' इत्यस्य स्थाने 'निश्चितमस्ति' इति वक्तुमारभन्त ।"

'पर्जिंग' (मलोत्सर्गार्थं विरेचनम्) च्छलात् निरपराधाः स्त्री-पुरुषा मृत्युमवालम्बिता येषु लक्षाधिका बालका आसन्, येषां न कोऽपि पृच्छको रक्षको वा बभूव । द्वितीयस्य महायुद्धस्यारम्भपर्यन्तं समस्तेऽपि रूसदेशे त इमेऽनन्यगतिकाः कान्दिशीकाश्च बंभ्रम्यमाणा बभूवुः । अमीषां दुर्दशां वीक्ष्य 'त्राहि ! त्राहि !!' इत्याक्रोशो भवति स्म ।

"·····जनता इदमजानन् यदात्मनो नैतिकभावनानुसरणस्य समयो व्यतीताय । अधुना तु तेषां (बोलशेविकानाम्) स्वरेण स्वरं संयोज्य संगीतं साधनीयं भवेत् । अन्येषां विचाराः स्वीकर्तव्याः स्युः—ये विचारास्तेषां गलाधः प्रसह्य प्रवेश्यमाणा आसन् ।·····"
(पृष्ठ ३६६) ये हि स्वात्मानं नवीनायाः स्थितेरनुकूलं समपादयंस्तेषां स्थितिस्तु किंचिदिव क्षेमङ्करी समभूत्, परन्तु ये प्राचीना दक्षिणपथावलम्बिनः समाजवादिन आसन्, ये च देशे समाजवादिनो चेतनां प्रसारयस्ते कम्युनिष्टानां यशोगायकत्वं कर्तुमात्मानमसमर्थमालक्षयन् । एवंविधा लोका देशान्निर्वासिताः ।

निरन्तरमात्महननं लोकानां कृतेऽतिमहर्घमजायत । जीवागोद्राक्तरस्य स्वास्थ्यं, रक्तसेनाया उत्पीडनं, नवपरिवर्तनस्य कटुतां च सहमानं निकृष्टतरमजायत । तस्य हृद्रोगः समभूत् । "इदानीं हृदयाद्रक्तस्रावरोगोऽधिकाधिकं जायमानोऽस्ति । नायं रोगः सदैव घातक एव परिणमति, केचनारमान्मुक्ता अपि भवन्ति । सोऽयं रोगोऽस्मद्युगीनः । अस्य मुख्यं निदानं नैतिकतैवेति ममानुमानम् अस्मासु बहुसंख्यकैर्लोकैर्निरन्तरं नियमपूर्वकं कष्टपूर्णं जीवनं निर्वोढव्यं भवति । नित्यमेव हि वयं यदनुभवामस्तद्विपरीतं यदि वक्तव्यं भवेत् , येभ्यो वयं जुगुप्सामहे तत्पुरतश्चोदरबलाद्विङ्गणं कर्तव्यं भवेत् (आत्मा दीनतां नेयो भवेत्) । यदस्मत्कृते केवलं दौर्भाग्यमेवानिनाय, तदर्थमेवानन्दोऽनुभवितव्यो भवेत् । तदा तत्प्रभावोऽस्माकं स्वास्थ्ये निपतेदित्यनिवार्यम् । अस्माकं नाडीसंस्थानमुपन्यासस्तु नास्ते, तदिदमस्मद्भौतिकशरीरस्याङ्गं वर्तते । अस्यावकाशेऽस्माकं शरीराभ्यन्तरे किलात्मा वसति । तथैव, यथा मुखान्तर्दन्ताः । विनात्पहानिं न वयमस्मिन्ना-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्मघातं कर्तुमर्हामः..... ।" (पृष्ठ ४३६) अनेनैव रोगेण, घोरदैन्ये, जनवादिनो मास्कोनगरस्य राजमार्गे, ट्रामगन्त्र्याः पट्टिकायाः समीप द्राक्तरो यूरी जीवागो चत्वारिंशद्वर्षेभ्योऽपि न्यूनतमे वयसि मुखाद्रक्तं वमन् प्राणानत्याक्षीत् । एवंविधात्मघातिनी स्थितिः, रूसदेशस्य जनतानां जीवने गभीरमाविवेश । तथा चेदानीं "मनुष्याः स्वतन्त्रा न सन्ति, सदैवात्मबन्धनायादर्शवादिरूपं प्रयच्छन्ति ।" (पृष्ठ ४३१) सेयं नीतिरन्वर्था भवति । अतः सन १९४१ ईषवीये वर्षे, द्वितीयमहायुद्धकाले, शर्मण्यदेशेन साकं रूसदेशस्य युद्धमारभत, तदास्याः कथायाः समाजवादीनि बुद्धिजीवीनि पात्राणि 'स्वच्छे वायौ श्वसनं मुक्तेःशकुनं तथा परिष्कारकः प्रभञ्जनः' इवाभाति स्म ।

'द्राक्तरजीवागो'—उपन्यासस्य पात्राणि यथास्थानं यानि जीवनदर्शनानि प्रास्तुवन्, तेषामाधारशिला मनुष्यतास्ते । मानवताया निकषोपले यद्धि वस्तु सत्यं प्रमाणितं स्यात्तत्तु ग्राह्यं, शेषं भयङ्करम् । सुस्पष्टमेतत्, यद्धि—उपन्यासकारस्य हृदयस्य सम्वेदनशीलतामेवास्योपन्यासस्य पात्राण्यभिव्यञ्जन्ति । श्रीबोरिसपेस्टरनाकभागः समाजवादस्य, जीवनस्य, कलायाश्च मौलिकेन प्रकारेणाभिनवं मूल्याङ्कनमकरोत् । मार्क्सवादं प्रति तन्मनसि संशयो विद्यतेः—

"अपि मार्क्सवादो नाम विज्ञानम् ?..... मार्क्सवादे नास्तीयती किलात्मशक्तिर्यत्स विज्ञानं भवितुं शक्तः स्यात् । विज्ञानमधिकं संतुलितं भवति । भवन्तो मार्क्सवादस्य, तत्कर्मवादस्य (Objctivity) च चर्चां कुर्वते । परन्तु मार्क्सवादादधिकस्य स्वार्थपरस्य सत्यादपेतस्य कस्याप्यन्यस्य वादस्य मे ज्ञानं नास्ति । सामान्यतया लोकाः स्वकीयानां सिद्धान्तानां व्यवहारे परीक्षणं कर्तुं कामयन्ते तथानुभवद्वारा तान् शिक्षितुमिच्छन्ति, परन्तु ये शक्तिं सत्तां च दधते, ते स्वकपोलकल्पनाया अविभ्रान्तिं संस्थापयितुमेतावच्छीघ्रकारिणो भवन्ति यत्ते सत्यान्नितरां विमुखत्वमङ्गीकुर्वन्ति । 'मत्कृते राजनीतेर्नास्त्येव कोऽप्यर्थः । नाहमेतादृशान् लोकान् प्रीणयामि ये नु बत सत्यं प्रत्यौदासीन्यमवलम्बन्ते ।" (पृष्ठ २३५)

"अहं मन्ये, यत् समष्टीकरणमसफलता त्रुटिश्चोभयमासीत् । नेदं स्वीकर्तव्यमभूत्, अतः स्वस्य कृते कथं चिन्त्यते निर्णीयते चैतत्कृते जनता विस्मरेयुस्तथा, यस्यास्तित्वं नास्ति तद्दर्शनायापबाधितुं, प्रत्यक्षदर्शनाद्विपरीतं मन्तुं चातङ्कस्य सर्वेषामप्युपायानां साहाय्यं गृहीतव्यमभूत् । तस्मादेव येंझेवस्य (स्थानविशेषस्य) अभूतपूर्वः क्रूरोऽत्याचारो बभूव, तादृशं संविधानं प्रतिष्ठितं यत्प्रवर्तनस्य जातुचिद्विचारो न बभूव तथा चैवविधानि निर्वाचनानि विहितानि येषामाधारः स्वतन्त्रमतदानं नास्ते..... ।" (पृष्ठ ४५३)

श्री पेस्तरनाकः कम्युनिष्टानां शासनप्रणालीं जनतानां शासनं न मन्यते, प्रत्युत जनतानां व्यपदेशात् मैनिफं तानेश्वरत्वं मन्यते यद्धि नियन्त्रणाद्बहिर्भूतं यन्त्रमिवाथवा पट्टिकातोऽपभ्रष्टा रेलगन्त्रीव भयावहं विद्यते ।" तदेतच्छासनं मानवताया निकषप्रस्तरे निर्दोषं नैव सिद्ध्यति, तस्मादेव तन्निकृष्टम् ।

"भयभीतः सर्वेभ्यो भयं प्रयच्छति, भयोपासने विलीनः प्राणी कटुतां वितन्वन् वर्तते, स जगतीमाधकं दीनां विधत्ते, सोऽनुपदं निर्माणे विनाशे च स्वक्षमतां प्रदर्शयति ।"

(कामायनीः इड़ासर्गे)

सः (पेस्तरनाकः) जीवने बाइबलग्रन्थे समुपवर्णितं "ईश्वरीयं राज्यम्" (Kingdom of God) कामयते--रामराज्यमभिवाञ्छति; "गॉसपेल्सो" यदैवं वदति यदीश्वरस्य राज्ये 'ज्यू' तथा 'जेन्टाइल्स' नो वर्तन्ते, तदा किं तेषामेतावानेवाभिप्रायोऽस्ति यदीश्वरस्य दृष्टौ सर्वेऽपि समानाः सन्तीति? नाहं मन्ये यत्तेषां केवलमेतावानेवास्त्याशयः—इदं तु यवनदेशीया दार्शनिका रोमदेशीया नैतिकतावादिनस्तथा हिब्रवः पूर्वत एव जानन्ति स्म । गॉसपेल्सस्येयं शिक्षा यज्जीवनस्यास्मिन्नन्ये मार्गे (ईश्वरस्य राज्ये) बन्धुत्वे (कम्युनियन = सहास्तित्वे) यो हि हृदयादुद्भूतो यश्चेश्वरस्य राज्यमुच्यते, राष्ट्रं नास्ति तत्तु केवलं व्यक्तिरेव ।" यदा राष्ट्राभिमानो जातीयताभिमानश्च विनङ्क्ष्यतस्तदैव मनुष्यो मनुष्यत्वं परीक्षितुं प्रभविष्यति,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वार्थसङ्घर्षस्यांतो भावी, परस्परं प्रीतिर्भविष्यति तदैव च विश्वशांतिः सम्पत्स्यते। 'ईश्वरराज्य' स्येयमीदृशी सुन्दरी व्याख्या न केवलं रूसदेशस्य कृतेऽपि तु समस्तस्येसवीय जगतो गर्वस्य विषयः।

कवेः श्रीपेस्तरनाकस्य मते कला हि नोदरपूर्तेः साधनं नाम। सात्मानन्दाय, स्वान्तःसुखाय च विद्यते। उपन्यासस्यास्य कथानायको यूरीजीवागो जीविकावृत्तिमुपार्जयितुं द्राक्तरीं शिक्षामधीते, परं हृदयतः सः कविः कलाकारश्च वर्तते। अतः सः स्वात्मक्षन्निवृत्तये विविधभाषाणां, छन्दःशास्त्रस्य चाध्ययनं कुरुते। यथावसरं च सः स्वान्तः सुखाय काव्यमपि रचयति। "सः स्वयमाश्चर्यमनुभवति स्म यद्विचित्रप्रायाणां पङ्क्तीनामनेकेषां भावचित्राणामनन्तरं तस्य रचना तस्मिन् स्वाधिकारं स्थापयति स्म या प्रेरणा, भावोन्मादो, रससमाधिर्वोच्यते--तत्स्थितेरनुभव करोति स्म। एवंविधे क्षणे कलाकारे नियन्त्रणं स्थापयन्तीनां शक्तीनां मिथः सम्बन्धः (सत्यं शिव सुन्दरमित्यादीनाम् ?) तं प्रभावयति स्म। अभिव्यक्तेर्विकाशः कलाकारस्य तस्य वा बौद्धिकतायाः सहगामित्वं नाश्रयति, नानुसंगच्छते, प्रत्युत तस्याभिव्यक्तेर्माध्यमं भाषा तमनुसरति। भाषा- सौन्दर्यस्यार्थस्य चाश्रयमन्दिरं(वागर्थाविव संपृक्तौ- वागर्थप्रतिपत्तये।.....) स्वयमेव हि व्यक्तेः प्रतिनिधित्वेन चिन्तनं भाषणं चारभते, तथा पूर्णतः संगीतत्वं प्रपद्यते, बाह्यश्रुतध्वनेरर्थे नैवापि तु स्वान्तःप्रवाहस्य वेगवशाच्छक्तेरधिकारबलाच्चेत्थं भवति। तदानीं, यथा शक्तिशालिनी नदी स्वप्रचण्डधारायास्तीव्रगतिमात्रेण प्रस्तरेषु प्रभावलेपमास्थापयति वा सर्वाङ्गमावर्तान् भ्रामयति, तथैव वाग्धारायाः प्रवाहः स्वगतेः स्वविधानस्य बलादेवानुप्रासलयानां, छन्दसामनेकेषां, कलेवरस्य, स्वरूपस्य च यदधुनापर्यन्तमज्ञातमकल्पितमसंज्ञं परन्त्वधिकं महत्वपूर्णमास्ते, सृष्टिं करोति.....।"

"मया सदैवैतन्मतं यत् कलासंख्यानां विचाराणां वा विभिन्नानां गोचरपदार्थानां श्रेणी वा प्रदेशो वा नास्ति, वरं चैतद्विपरीतं समाधिविशेषो वर्तते—स चासावत्यन्तं सीमितो भवति। अयमेकः सिद्धान्तोऽस्ति यः प्रत्येकं कलाकृतावन्तर्भूतो भवति, सा किलैका शक्तिर्विद्यते या तत्रसमाविशति, सा चैकं सत्यं वर्तते यत्तत्र निर्मितं भवति। न मया कदापि तद्बाह्याकृतिरूपे दृष्टम्, परं चान्तर्निहितस्य गुप्तसंतोषस्य (आनन्दस्य) रूपे (रसानुभूतिरूपे) दृष्टम्। एतत् सर्वं मम सूर्यप्रकाशवत् सुस्पष्टमास्ते। शरीरस्य सर्वचैतन्येनाहं तदनुभवामि, परन्त्वस्य बोधो वा परिभाषानिरूपणं वात्यधिकं कठिनम्।

कलाकृतिरस्मान् सर्वप्रकारैः प्रभावयितुं शक्नोति—प्रसङ्गतो विषयतोऽवस्थित्या शैल्या च (प्रकृतभावेन)। परन्तु सर्वतोऽधिकं तत्र वर्तमानया 'कलया' एवास्मासु प्रभावः पतति। 'Crime and Punishment' डोस्टोवस्केर्महाशयस्यैक उपन्यासः) 'अपराधो दण्डविधानं च' इत्युपन्यासे रास्कोलनिकोवपात्रस्यापराधापेक्षया तत्रोपस्थिता 'कला' अस्मान् समधिकं प्रभावयति।

कलायां द्वैतं नास्ति। आद्या कला, मिश्रयवनदेशयोः कला वा स्वयमस्माकं कला, मन्मते नन्वेकैवास्ते। कलाया वर्षाणां सहस्रेभ्य ऐकान्तिकरूपेण जीवन्ती तिष्ठति। वयमेतां (कलां) कल्पनां वक्तुं पारयामो, जीवनस्याभिव्यक्तिं वा वक्तुं शक्नुमः, तानीमानि तत्त्वान्यन्यानि तत्र (कलायाः) तादृगोतप्रोतानि विद्यन्ते यन्न तानि शब्दतः पृथक् पृथक् व्यक्तुं शक्यन्ते। यद्यस्याः (कलायाः) अणुमात्रमपि कस्यांचित् कृतौ भवेत्, यस्यामन्ये गुणाश्चापि भवन्ति, तदैतदन्यसर्वाङ्गापेक्षया गौरवे समधिकं गुरुतरं भवति तद्धि तस्याः कृतेः सत्वं, हृदयमात्मा च भवति।

(पृ० २५६)

सहृदयस्य सहानुभूतिसम्पादने (रसचर्वणायां) सक्षमत्वमेव हि कलायाः साफल्यम्। अस्य विषयस्य—स्सतत्वस्य—भारतवर्षे व्यतीतेभ्यः परशतेभ्यो वर्षेभ्यश्चर्चा क्रियमाणास्ते। परन्तु घोरभौतिकवादिनो रूसदेशस्य कृते विषयोऽयं सर्वथाऽपरिचितस्तस्मादेव हि चाकचक्यजनकोऽस्ति। कला हृदयं निरीक्षते नोदरम्, हिन्द्यां कलाया मूल्याङ्कनस्य नवीनं प्रतिमानं विरच्यमाणं विद्यते-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऽतो ह्याधुनिकैर्लेखकैः पेस्टरनायकस्यास्मिन् दृष्टिकोणेऽपि च विचारः कर्त्तव्यः। अस्यैव 'रसतत्वस्य' चर्चा रूसदेशे कृत्वा श्रीबोरिसपेस्तरनाथकोऽवमानितोऽस्ति। नायं सामान्योऽपमानः प्रत्युत 'सर्वतोऽधिकं कठिनो जात्यपमानः। जनवादिनो रूसदेशस्य सार्वकारं प्रति तस्मै (पेस्तरनाकाय) निर्वासदण्डमन्वशंसन् तद्देशीयाः साहित्यमनीषिणः। ते च तं 'साहित्यिकश्चाटुकारो भव।' इत्युपादिशन्।

मध्ययुगीनानां सामन्तशासकानामिव चाटूक्तीः श्रोतुमाकाङ्क्षतां कम्युनिष्टस्वेच्छाचारिणामित्थंभूता सेयं मनोवृत्तिर्धनपुञ्जवादात्, साम्राज्यवादादार्थिकात् सामाजिकाच्छोषणादपि सर्वतो बह्वधिकं भयङ्करी वर्तते। सैषमनोवृत्तिर्मनसः प्राणानां समस्तायाश्चेतनायाश्च बलशोषणं विद्यते।

परं लेखको (पेस्तरनाकः) नैतावता सर्वथा निराशोऽस्ति। स खलु भविष्यति काले स्वस्वप्नस्य पूर्तेराशां पुष्णन् वर्तते। मास्कोनगरस्यैकस्याभ्रंकषस्य भवनस्य गवाक्षात् दूरभविष्यं प्रत्याशापूर्णाभ्यां नेत्राभ्यां पश्यन्नसौ स्वोपन्यासं समाप्तिं नयति—उपसंहरते।

उपन्यासोऽयं न केवलमेकस्य महादेशस्येतिहासे विचित्रायाः क्रान्तेश्चलचित्रमात्रमेव प्रत्युत मानवास्तित्वस्य मूलभूतानां गुणानां क्षतिं प्रति महतीं चिन्तामपि समभिव्यनक्ति। मौलिकतायां विश्वासं कर्तुं पाठकमामन्त्रयति। 'नोबलपुरस्कारस्य' घोषणानन्तरमत्रोपन्यासकृतौ कैश्चिज्जनै राजनीतिरङ्गरञ्जनस्य चेष्टाक्रियत, परं तदन्यायः। उपन्यासस्य दृष्टिकोणो राजनैतिको नास्ते, प्रत्युत विशुद्धो मानवातावादी विद्यते। एकस्मिन् लघ्वाकारेऽस्मिन् लेखेऽस्याः कृतेः समस्तानां विभूतीनां दर्शनं न सम्भवति। सैषा कृतिः संवेदनशीलस्य हृदयस्य, महतो मस्तिष्कस्य च प्रतीकमास्ते।

[रूसदेशीयो विद्वान् लेखकः कविश्च श्रीबोरिसपेस्तरनाकमहाभागोऽतीव प्रतिभावान् महामना वर्तते। तेन द्राक्तरजीवागो' इति नामा उपन्यासो लिखितः। कियद्भ्यो वर्षेभ्यः पूर्वं लिखितमपि तमिममुपन्यासं सः प्रकाशयितुं न शशाक, यतोऽत्र—उपन्यासे रूसदेशस्यान्तःस्थितेर्लोकजीवनस्य सत्यं चित्रं चित्रितमास्ते लेखकेन। तत्रत्यं शासनतन्त्रं कदाचिदेवविधस्योपन्यासस्य प्रकाशनमापज्जनकं सम्भावयेदित्यासीदस्य प्रकाशनेऽनिष्टापायशङ्का। बहूनि वर्षाणि यावदयमुपन्यासोऽप्रकाशितः पाण्डुलिपिरूप एव लेखकस्य सविधेऽवध्रियत। पर्यन्ते रूसदेशाद् बहिरन्यत्र क्वचिदयमुपन्यासः प्राकाश्यत। अस्य इटलीदेशे प्रकाशनादन्ताराष्ट्रिये जगति महती हि कापि लोकातिशायिनी प्रतिष्ठा प्रसृतिश्च समभूत्। विश्वविख्यातो 'नोबलपुरस्कारो'ऽप्यस्योपन्यासस्य लेखकाय प्रादीयत निर्णायकैः। परं स्वदेशस्यान्तःस्थितेरननुकूलत्वात् श्रीपेस्तरनाकमहाशयस्तमिमं पुरस्कारमङ्गीकर्तुं नाशक्नोत्। पुरस्कारपरित्यागादस्याः कृतेर्लेखकस्य च महतीं हि कीर्तिर्व्याप्तेने साहित्यिके जगति! नानाभाषास्वस्योपन्यासस्य भाषान्तराणि समन्वावद्यन्त विद्विभिः। अस्य विषयस्य महती हि मीमांसा, समालोचना च सार्वभौममजायत। हिन्दीपत्रपत्रिकास्वपि भारतेऽत्र विषयस्याधिकाधिकं चर्चाऽक्रियत लेखकैर्विद्वद्भिः। यावदहं जाने संस्कृतमपत्रेषु नास्य विषयस्य क्वापि समालोचनं दृष्टं श्रुतं च। संस्कृतपाठकानां ज्ञानवृद्धये, तोषाय, परिचयाय चैवंविधानां साहित्यिकप्रसङ्गानामवतारणमावश्यकमिति चिन्तयता मया हिन्द्याः सुप्रसिद्धान्मासिकपत्रात् 'विशालभारतात्' अगस्त ५९ अङ्कात् श्रीरामकृष्णमहाभागस्य "द्राक्तरजीवागोः एकमध्ययनम्" इति शीर्षको लेखः समुद्धृत्यानुवादितः। आशास्यते, संस्कृतपाठकेभ्यो विषयोऽयं रुचिकरः स्यात्। अस्य लेखस्य लेखकं तथा 'विशालभारत' मासिकपत्रिकायाः सम्पादकप्रवरं श्रीरामशर्ममहाभागं प्रति चाभारं प्रकटयति। —अनुवादकः]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अमरभारती-महत्वम्

पूर्वानुवृत्तम्

ले० 'साहित्य-विशारदः' श्रीधरप्रसादपन्तः
"सुधांशु" शास्त्री, पीलीभीत (उ० प्र०)

अमरभारतीयं विश्वव्यापिका विश्वभाषाजननी च

अमरभारतीवाङ्मयं विश्वव्यापकं नास्ति इति कश्चिदपि कथयितुं न प्रभवति। यतोहि अस्य वाङ्मयस्य क्षेत्रम् न केवलम् भारतम् प्रत्युत समस्ताः भारतेतरदेशा अपि सन्ति। यथा सर्वत्रैव-"विश्वानि देव सवितर्दुरितानि परासुव, यद्भद्रं तन्न आसुव" अस्या वैदिकऋचः गानं न केवलम् भारतीयैः धी-धनधौरेयैः जनैरेव क्रियते स्म अपितु विश्वस्य सर्वैरपि जनैः। पूर्वम् हि त्रिविधानां सम्प्रदायानां विद्वांसो जनाः संस्कृतस्य वाङ्मये एव ग्रन्थरचनां शास्त्रार्थं क्रियाञ्च कुर्वन्ति स्म इति के नाम न जानन्ति। यवद्वीपस्य इतिहासोऽत्र प्रमाणम् यत् तस्य समस्तं साहित्यम् अमरभारत्याः वाङ्मयस्य आधारे एव सुस्थिरमस्ति।

एतदतिरिक्तम् अन्येऽपि देशाः सन्ति यथा श्रीलङ्का, स्याम, मलय, जावा, सुमात्रा, तिब्बत, हिन्दचीन आदयः येषाम् अद्यापि वर्त्तमानं भाषासाहित्यम् संस्कृतेनैव समुन्नतं दरीदृश्यते। मध्यएशियाप्रदेशे बौद्धधर्मेण सह भारतीया भाषा, लिपिः, कला च किं न प्रयाता? तिब्बतप्रदेशस्य बौद्धवाङ्मयम् संस्कृतवाङ्मयेन तुल्यं सर्वथा अस्ति। तत्र मठेषु प्राचीनसंस्कृतस्य ग्रन्थाः इदानीमपि पूज्यन्ते। तिब्बतप्रदेशात् अमरभारती-समुपासकस्य दिङ्नागनाम्नो महाविदुषः "न्यायमुखम्" 'आलम्बनपरीक्षा" च ग्रन्थौ तथा तत्रभवतो धर्मकीर्तेश्च महाविदुषः "प्रमाणवार्तिकम्" आदि अनेके महत्वपूर्णा ग्रन्थाः उपलब्धाः सन्ति।

महापण्डितः श्रीराहुलसांकृत्यायनमहोदयः तिब्बतप्रदेशादेव दशोत्तरपञ्चशतानां संस्कृतहस्तलिखितपुस्तकानां सूचीम् अनयति स्म। कुतोऽवधि गणयाम— अन्येषु तुर्फान, कूचा, खुतन, कम्बोडिया आदि स्थानेष्वपि समन्वेषणेन अनेके महत्त्वपूर्णाः ऐतिहासिकाः अमरभारत्याः लेखाः समुपलब्धाः सन्ति।

अतः इदम् सप्रमाणम् सिद्धम् स्पष्टञ्चास्ति यत् अमरभारत्याः प्रचारः महत्त्वञ्च केवलम् भारते एव देशे अपितु विश्वस्य विभिन्नेषु राष्ट्रेषु तेषां सम्पन्ने साहित्ये च महत्वपूर्णम् स्थानम् नूनं निश्चिनोति। अनया रीत्या इयं नाम अमरभारती सर्वथा विश्वव्यापिका अस्तीति सबलं वयं वक्तुं पारयामः। अस्याः अमरभारत्याः विश्वजननीत्वमपि सम्यग् अध्ययनेन, परिशीलनेन च संसारस्य वर्त्तमानासु समस्तासु प्रमुखासु भाषासु सुस्पष्टं छायापातेन परिलक्षितम्भवति! अत्र न कथमपि विचिकित्सायामादरो देयो बुधैः। स्पष्टीकरणं तद्य थाः—

भाषा —	लैटिन	मीडी	यूनानी	अंग्रेजी	फारसी	संस्कृतम्	
शब्दाः—	पेटर	पतर	पाटेर	फादर	पिदर	पितर	या पितृ
	मेटर	मतर	माटेर	मदर	मादर	मातर	या मातृ
	फ्रेटर	ब्रतर	फ्राटर	ब्रदर	बिरादर	भ्रातर	या भ्रातृ
	नामेन	नाम	ओनामा	नेम	नाम	नाम	या नामन्
	एम?	अहमि	ऐमि	ऐम	अम	अहम्	या अस्मि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतेन स्पष्टीकरणेन अमरभात्याः संस्कृतानां शब्दानां अन्यदेशीयैः अपभ्रष्टैः विकृतरूपैर्वा कियत् साम्यमस्ति, इति नाक्षिलक्षीकुर्मो वयम् ? अतः सर्वथा स्पष्टमिदम् यद् अमरभारतीभाषाप्रभावः संसारस्य समस्तेषु भू-भागेषु तेषां साहित्ये च नूनं व्याप्तोऽस्ति । सर्वत्र अमरभारत्या महत्त्वम् विश्वस्य सर्वे महामनीषिणः मुक्तकण्ठेन स्वीकुर्वन्ति । भारतेतरदेशीयाः (अमेरिका, रूसं, चीन, जर्मनी) महान्तो विद्वांसोऽपि अमरभात्याः संस्कृतं साहित्यम् इदानीमपि अवगहन्ते एवम् तत्तद्देशीयाः सर्वकारा अपि अमरभारत्याः गौरवपूर्णानां ग्रन्थानां अनुवादार्थम् निश्चितान् निधीन् प्रतिवर्षम् समर्पयन्ति ।

तेषां विदेशीयानां राष्ट्राणां विदुषां संस्कृतम्प्रति सोऽनुरागः केनचित् भावात्मकेन मोहेन नास्ति, अपितु अस्याः अमरभारत्याः आन्तरिकायाः सुस्थिरायाः नीतेराधार एवाऽस्ति । भारतीयदर्शनज्ञानप्राप्तये अनेके वैदेशिकाः संस्कृतम् शिक्षन्ते स्म । यथा विश्वप्रसिद्धः वैज्ञानिकः शोपेनहाइयर महाशयः शिक्षते स्म । अतः स्पष्टमस्ति यदियम् अमरभारती विश्वभाषाजननी नूनमस्तीति ।

अमरभारती तस्या लिपिश्च पूर्णा वैज्ञानिकी

भाषाणां साहित्ये न केवलम् अमरभारतीभाषायाः वाङ्मयमेव वैज्ञानिकम् पूर्णञ्चास्ति अपितु तस्याः देवनागरीलिपिश्च सर्वथा शुद्धा वैज्ञानिकी विद्यते । इयमेव लिपिः हिन्दी, प्राकृत, मराठी, नैपालीप्रभृति लिपीनां जननी । अस्याः वर्णमालायाः उच्चारणक्रमः संसारस्य अन्यासु वर्णमालासु श्रेष्ठः विज्ञानपूर्णश्चास्ति । नाऽयं क्रमः इतोन्यत्र कुत्रापि भाषायां नयनगोचरो भवति । स्वराणां व्यंजनानां क्रमः कण्ठ, तालु, मूर्धा, दन्तोष्ठादि निश्चितानि स्थानानि परिचिनोति, इदमपि अत्यन्तं महत्वपूर्णं तत्त्वम् अस्ति । एतदतिरिक्तम् अमरभारत्यां सर्वतोधिका इयं विशेषता परिलक्ष्यते यत् अस्यां यदुच्यते तदेव लिख्यते ।

एतादृशम् वैशिष्ट्यम इतरा सुभाषासु कुत्रापि नास्ति । विश्वभाषायाः सिंहासने स्थाप्यमानायां अंग्रेजीभाषायामपि उच्यते किमपि लिख्यते किमपि, यथा Put "पुट" कथ्यते किन्तु तत्समः But 'बुट' न कथयित्वा 'बट' इति कथ्यते । अतः अंग्रेजी-भाषाऽपि वैज्ञानिकतायां, विशुद्धतायां तदीयां कोटिं ग्रहीतुं कथमपि सक्षमा नास्ति । यदा इदानीन्तनाया–विश्वभाषाभूताया अंग्रेजीभाषाया इयं कथाऽस्ति,तदा अन्यासां भाषाणां का कथा ? (वृथा कथा) । अतएव सप्रमाणम् अमरभारती संसारस्य सर्वासुभाषासु मूर्धन्यं स्थानं बिभर्ति ।

किमियं मृतभाषा भवितुमर्हति ?

परिवर्तनशीले संसारेऽस्मिन् अनेकेषां राज्ञां राज्यम् जातम् । स्वकीयस्य राज्यस्य सुस्थिरीकरणाय भारतसर्वस्वभूतायाः, प्राणरूपाया, अमरभारत्याः अक्षणम्, गम्भीरम्, सर्वतः प्रसृतं देदीप्यमानम्, आश्चर्यजनकम् वाङ्मयम् विलोक्य तैर्निश्चितम् यद् यावत् इदं वाङ्मयम् न तिरस्क्रियते नाशः पात्यते वा तावत् अत्र सुस्थिरं राज्यं अस्माकं भवितुं नार्हति, यतोहि कस्मिंश्चिदपि प्रदेशे राज्यम् तदैव भवितुमर्हति यदा तस्य साहित्यम्, भाषाम्, रीतिम् नीतिञ्च ततो दूरीकुर्याम । अतः तैरेव कृतघ्नैः अमरभारत्या एव सर्वम् ज्ञानविज्ञानमादाय तस्याः अमरतां हृदयतो मन्यमानैः अपि "इयं मृत भाषा" इति प्रलापः कृतः ।

किन्तु इयम् च अमरभारती अद्यापि भागीरथीधाराप्रवाहवत् सर्वत्र, सर्वतः वन्द्यमाना, उपयुज्यमाना, उपलभ्यमाना, अलंक्रियमाणा नितराम् संसारस्य समस्तासु भाषासु अमरत्वं प्राप्यमाणा च, अमरं गौरवं बिभर्ति, अमरां स्वकीयां धाराञ्च प्रवहति, यत्र निष्णाताः अनेके विद्वांसः, अमरा भूताः भवन्ति, भविष्यन्ति च । इयन्तु इदानीमपि "अमरा" सतो सर्वोत्कर्षेण वर्तते । एनाम् मृतभाषेति कथयितार एव इदानीम् मृताः सन्ति । सेयम् अमरभारती कया दिशा "मृतभाषा" भवितुमर्हति इत्यहं न जाने ।

अन्वर्थम् नाम अमरभारतीः--

संस्कृतम् नाम इयम् अमरभारती सदा एकस्मि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्नेव रूपे, लोचनपथमुपैति समेषाम्। अस्याः साहित्यम् सर्वाभ्यः भारतीयभाषाभ्यः प्रकृष्टतमं विशिष्टं स्थानम्, स्वरूपं, महत्वञ्च नूनमादधाति। अस्या एव महत्वेन, उपयोगेन च भारतम् भा-रतमासीत्। मानवीया ये गुणाः शीलता, सहिष्णुता, कृतज्ञता, नम्रता, सत्यवादिता, धैर्यशीलता, आदयः सन्ति तेऽपि अस्या एव बले जीवन्ति।

अस्याः अमरभारत्याः अन्वर्थम् नामैवानुसृत्य भारतरत्नानि विश्वस्य मूर्धन्यधन्याः राजनीतिज्ञाः श्री महात्मागांधिमहोदयः, वर्तमानः अजातशत्रुः श्रीराष्ट्रपति महोदयः, प्रधानमन्त्रिश्रीजेहरूमहोदयश्च सर्वेऽपि अस्या महत्वम् मुक्तकण्ठेन वर्णयन्ति—अङ्गीकुर्वन्ति च यद् भारतस्य सविधे यः कोऽपि स्वकीयो विधिरस्ति स अमरभारती साहित्यमेव यस्मिन् साहित्ये भारतम् सर्वं कर्तुं प्रभवति, तत् साहित्यम् अमरभारत्या एव।

वदन्ति च इयं अमरभारती भारतस्य सा अक्षुण्णा सम्पत्तिरस्ति एनामेवाश्रित्य सर्वत्र प्रदेशेषु भारतस्य नाम अमरमस्ति। अतः सर्वासां भाषाणां मूलं स्रोतोऽस्ति संस्कृतम् इदम् स्पष्टमेव परिचीयते। इति।

अतो वयम् सबलम्, सगर्वम्, सप्रमाणम् निगदितुमिदं प्रभवाम यद् इयम् भारती अमरा सती नूनम् सर्वान् सदा अमन्दमानन्दं दास्यति। अस्या एव प्रचुरेण प्रचारेण गेहे गेहे जने जने अमरभारतीत्वम् दृष्टिपथ समेष्यति। अनुपमं माधुर्यम्, लालित्यञ्चास्याः सर्वानपि लाभान्वितान् विधाय विश्ववीथिकायां भ्रमतः श्रान्तान् मानवान् सत्यस्य, शिवस्य, सुन्दरस्य च पथो निदर्शनम् विधाय स्वयमपि स्वनामसंज्ञाम्—अमरभारतीत्वम् नूनम् प्राप्स्यतीति निश्चप्रचमेव वच्मि।

जयतु जयतु नित्यं साऽद्य गीर्वाणवाणी
कुरुत कुरुत लोके भूयसीं वृत्तिमेताम्।
जयतु जयतु विद्या सामराणां नितान्तम्
भवतु भवतु भूयः काममस्याः प्रचारः॥

सधन्यवादम्

फोर्ट ग्लास्टर इन्डस्ट्रीज लिमिटेड

उत्तमप्रकारक जूट, टाट एवं बोरकवस्त्र—

निर्माता

मैनेजिंग एजेन्टस् :—

केटलवेल बुलन एण्ड कम्पनी, लिमिटेड

२१ स्ट्रान्ट रोड,

टेलीफोन—२२-४९०१-५ कलकत्ता टेलीग्राम—केटबुलन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वातन्त्र्यसंग्रामवीरेभ्यः श्रद्धाञ्जलिः

ले० प्राध्यापकः श्रीकृष्णलालनादानः, नई दिल्ली

मरुद्विधूतपट्टकप्रचालितैकधार्मिक—
स्वराज्यचक्रशोभिनि द्विषद्विमर्ददण्डके ।
नभस्तलं चुचुम्ब यो निरन्तरं स्वतेजसा
समुन्नते सुभासिनि ध्वजे रतिर्मतिर्मम ॥१॥

यदीयरुण्डमुण्डशोणितास्थिपुञ्जतर्पिता
यदीयसिंहनादतुल्यकण्ठनादगुञ्जिता ।
यदीयतुङ्गबाहुदण्डधैर्यशौर्यगर्विता
यदीयस्नेहदीपिता विराजतेऽद्य मातृभूः ॥२॥

अयि स्वतन्त्रदेशवासिभारतीयमानवाः
किमद्य विस्मृताः स्वकीयपूर्वजाः सगौरवाः ।
पुरा किलात्मनो हुतिं प्रदाय मातृभूहिते
विदेशिराज्यबन्धनाद्धि यैरियं विमोचिता ॥३॥

यदीयघोषणाप्रबुद्धभारतीमनस्विनः
यदंघ्रिचिह्नगामिनोऽलभन्त शासनं स्वकम् ।
तमेव लोकमान्यमस्तकं स्वदेशवत्सलम्
नमामि बालजाह्नवीधरं प्रतापिनं शिवम् ॥४॥

कठोरलौहदण्डकल्पकायसन्धिघट्टितं
स्वनामधन्यरञ्जितं स्वकर्मधर्मपूजितम् ।
नमामि लोकवन्दितं पटेलवंशवल्लभं
न येन शान्तिमिच्छता स्वशासनं विभञ्जितं ॥५

त्वमाङ्ग्लक्रशासने प्रचण्डचण्डदीधितिः
स त्वं सुभाषचन्द्रवीर जीवसीति भाति मे ।
यतस्त्वदीयनामपूतलोककण्ठनिःस्वनाः
सुमाधुरीभराः स्वनन्ति वङ्गदेशभूमयः ॥६॥

विभिन्नसम्प्रदायजातिवर्णभेदभञ्जको
भुवि स्थिताः समाः समग्रमानवाः समानजाः ।
शरीरमेकमेकमेव आत्मतत्त्वमिष्यते
जुघोष यः स गान्धिरद्य भारतेन गीयते ॥७॥

न येन दण्डखण्डितेऽपि विग्रहे विदेशिभिः
स्वदेशमुक्तियुद्धप्राङ्गणान् मुखं निवर्तितम् ।
न यस्य लुप्यते स्वनो हि सिंहनादभैरवोऽ-
द्य श्रद्धया पुनर्नमोऽस्तु पञ्चसिन्धुकेसरिन् ।८।

न वर्ततेऽत्र वीर एक एव केवलं प्रियः
कदापि भक्तसिंहचन्द्रशेखरादयो हि ते ।
न विस्मृता भवन्ति कालपर्ययेऽपि तिष्ठति
सदा सदा जयन्ति ते विशाललोकमानसे ॥९॥

तदुत्थिता वयं निजे हि कार्यभारवाहने
भवेम दत्तमानसाश्चलेम सत्पथे सदा ।
समृद्धिमेतु येन देश एष गौरवात्मको
मुदा च यत् समुल्लसन्तु पूर्वजा युधि स्थिराः ।१०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धारावाहिकं कथानकम्

★ जीवनस्य पृष्ठद्वयम् ★

—ले० मानसी

पूर्वकथाः—

(आत्मकथाया लेखिका बाल्यादेव संस्कृते रुचिमग्रहीत् । सा 'इण्टर' परीक्षायां संस्कृतविषयं गृहीतवती, किन्तु अध्यापनाय बालिकाविद्यालये समुचिता व्यवस्था नाऽऽसीत्, अतोस्याः पिता यो हि स्वयं सम्पन्नः, सम्भ्रान्तः एकस्याङ्गलविद्यालयस्याऽऽध्यक्षश्चासीत्—एकम् एम. ए. (संस्कृत) परीक्षार्थिनं एतां पाठयितुं नियुयोज । राकेशनामाऽयं युवकः सुशीलः, गम्भीरः, शान्तश्चाऽऽसीत् । तत्सकाशादियं कालिदासग्रन्थानामध्ययनमकरोत्—तस्मै च मनस्येव श्रद्धां समर्पितवती । बी० ए० परीक्षा अपि अनया तस्यैव प्रेरणया, अध्यापनेन च दत्ता । किन्तु परीक्षापरिणामस्य निर्गमनात्पूर्वमेव एका घटनाऽघटत । राकेशेन वृत्तिं गवेषयता तन्नगरं परित्यक्तम् । सोयमासीदस्या उपरि महानाघातः, तथाऽप्यनयाऽध्ययनं न परित्यक्तम् । तदानीमेव एतस्या विवाहस्य चर्चा प्राचलत् । जनकेनोक्तं यदस्मिन्नेव वर्षे तस्या विवाहो भवेत् । किन्तु एतद्विषये नैतया कापि जिज्ञासा प्रकटिता । शनैः शनैर्विवाहदिवसः समीपमागतः । तथापि नेयमजानात् क एतां परिणेतुमागच्छति । वाग्दानं सम्पन्नं, यस्मिन् श्वश्रूः श्वशुरं चेयं दृष्टवती । विवाहदिने लग्नपण्डपस्था इयं चिन्तितवती यदयं नरो यः कोऽपि भवतु–राकेशं विस्मृत्यैनमेव हृदये पूजयिष्यामि । अन्तःपटेऽपसृतेऽनया दृष्टं यद्यस्तां परिणीतवान् , स राकेश एवाऽभूत् । इयं चकिताऽस्थात् । अनया ज्ञातं यत्सोऽधुना प्रशासकीयसेवायाम् (I.A.S) अधिकारी वर्त्तते । विवाहानन्तरं राकेशेन निश्चितं यत्स देहरादूननगरे पत्न्या सह सप्ताहमतिवाहयेत् ।]

तस्यामेव रात्रौ-सुदीर्घे देहरादूनस्य राजमार्गे भ्राम्यतोरावयोः सुदीर्घः संलापः समभूत् । यद्यप्यहं नितान्तं सलज्जा—रुद्धकण्ठेवाऽभूवम्—तथापि "औत्सुक्येन कृतत्वरा"ऽहं पृष्टवती राकेशं—समग्रमपि वृत्तजातम् । यथा हि अनन्तचतुर्दश्याः कथायां भक्तिरसमत्तः कौण्डिन्यब्राह्मणः अनन्तव्रतदोरकं तिरस्कृत्य जातदारिद्र्यः, पश्चात्तप्यमानः अनन्तं द्रष्टुं वनं प्रति निर्गतस्तत्रैकं वृषभं, गर्दभं, कुंजरं, गां, पुष्करिणीद्वयं च दृष्टवान् पृष्टवांश्च ताननन्तस्य विषये....वृद्धब्राह्मणरूपधारिणाऽनन्तेन स्वगृहं प्रति नीतः, स्वरूपं दर्शितश्च सर्वविधसाफल्यानन्तरं भगवन्तमेव पृष्टवान्—"का गौः, को वृषभस्तथा ?·····मया दृष्टं महारण्ये किं तत्पुष्करिणीद्वयम् ? कः खरः कुञ्जरः कोऽसौ कोऽसौ वृद्धो द्विजोत्तमः ?"

भगवाँश्चोत्तरितवान्—"वृक्षो धर्मस्त्वया दृष्टः....। खरः क्रोधस्त्वया दृष्टः कुंजरो मद उच्यते । ब्राह्मणोऽसावनन्तोऽहम् ।" इत्यादि—

तथैव साम्प्रतं मया राकेशो रहस्यं पृष्टः—'कोऽयं भारद्वाजः ?—येन सह मदीयं वाग्दानमभूत्—कथं भवान् प्रशासनिकसेवां प्रविष्टः ? नगरं परित्यज्य किं किं भवता कृतम् ?"

राकेशेन—नितान्तं स्निग्धता—सर्वमपि पुरागतं वृत्तं व्याख्यातम् । रात्रौ—भयङ्करे कुज्झटिकाप्रपाते--सर्वेऽपि राजमार्गाः धूम्रा अदृश्यन्त; रथ्यासु कुत्रचन काचदीपाः मन्दं मन्दं प्रज्वलन्तः स्वसत्तायाः संकेतमिवाऽदुः; कदाचन तीव्रं निःसरन्ती काचन मरुत्तरगन्त्री आवां दृष्ट्वा मन्दवेगाऽभूत्—(तत्र हि अपरिचितानपि मरुत्तरद्वारा यथेष्टस्थानप्रापणस्य शिष्टाचारोऽप्यस्ति ।)—अनन्तरं च निभृतमेकान्तमभूत्—निर्मक्षिकम् । राकेशेनैतस्मिन् समये स्वजीवनवृत्तान्तकथने यो रसो निक्षिप्तः—मम चान्तरे तमिमं श्रावं श्रावं यादृशी तन्मयता उदिता-सर्वमिदमनुभवसाक्षिकमेव--न वर्णयितुं शक्यम् ।

राकेशस्य जीवनवृत्तमिदं—यदद्यत्वे मम सुपरिचितं संजातमस्ति—संक्षिप्य—एवं कथयितुं शक्यते—

एम्. ए. परीक्षामुत्तीर्य—राकेशेन अस्माकं नगरे एव एकस्मिन् संस्कृतपत्रे वृत्तिर्लब्धाऽऽसीत् । प्रायः पञ्च-ष-घण्टाः प्रतिदिनं कार्यं करणीयमभूत् । लेखानां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शोधनं, 'प्रूफ' पठनम्--पत्राणामुत्तराणि--सर्वमिदं राकेशस्य स्वास्थ्योपरि प्रतिकूलायितम् । बह्वीः प्रार्थनाः श्रुत्वाऽपि यदा प्रकाशकेन राकेशस्य वेतनं न परिवर्धितं, तदाऽनेन स्वपरिवारस्य निम्नामार्थिकीं स्थितिं जानानेनापि पितरं प्रति पत्रं लिखितं—यत्किं स भृतिलाभपर्यन्तं राकेशं गृहे निवासयितुं स्वीकुरुते ? पितुरुत्तरं निषेधात्मकमेवागतम् । राकेशो भृशमखिद्यत । भारतं परित्यज्यान्यत्र गन्तुं दृढं निश्चयमकरोत् । पित्रे चान्तिमं (?) पत्रमलेखीत्—यदहमद्य भारतं त्यक्त्वा विदेशान् गच्छामि—अस्मिन् जीवने यदि पुनर्दर्शनं भवेत्तदा कृतार्थो भविष्यामि—अन्यथाऽयं मदीयश्चरमः प्रणामः ।

किन्तु--विदेशयात्रा तदात्वे न तावती सरलाऽभूत् । केवलं नगरं परित्यज्य राकेशो नगरान्तरमयासीत्, यस्य सूचना मयाऽपि पितुर्मुखाल्लब्धा । एतदनन्तरं विद्युद्वेगेनेव, राकेशस्य जीवने परिवर्तनस्य चित्रपटदृश्यं समागतम् । भिक्षुक इव--दीनो मलिनश्च राकेशो भारतराजधान्या मुख्यासु वसतिषु गृहाद् गृहं गृहाध्यापन-(ट्यूशन) वृत्तिं गवेषयमाणः आहिण्डते स्म । सर्वत्रैव प्रायः—अतिसंक्षिप्तमुत्तरं लभ्यते स्म—"नैव ।" "नाधुना ।" "खेदोऽस्ति--भवतः आवश्यकता नास्ति ।" इत्यादि ।

एकत्र--वस्त्रापणे विक्रयकर्मचारिणः (Salesman) आवश्यकताऽऽसीत् । राकेशेन तदपि स्वीकृतम् । पञ्चदश दिवसा व्यतीताः । राकेशेन आपणस्य समाचारपत्रे एकत्र संस्कृताध्यापकस्यावश्यकताविज्ञापनं पठितम् । साक्षात्कारोऽभूत् । एकमासानन्तरं राकेशेनाध्यापकपदं लब्धम् । वस्त्रापणस्वामिना एकमासस्यैव वेतनं दत्तम्—पञ्चदशदिवसानां श्रमदानमेवाऽभूत् ।

तदा हि भारतस्य स्वातन्त्र्यं नूतनः शिशुरेवाऽऽसीत् । नवीनसंविधानान्तर्गत--धारानुसारं स्थापितेन जनसेवाऽऽयोगेन भारतस्य प्रशासनिकसेवा (I.A.S.) याः प्रतियोगिता परीक्षाः नवीनतया आरब्धाः । सहकर्मणामनुरोधेन राकेशोऽपि परीक्षासु प्रविष्टः । संस्कृतं खलु दैवी वाग् -देव इव निग्रहानुग्रहयोः समर्था !! वरोऽपि

त्वर्यताम्— अनुग्राहकैः—

संस्कृते अभिनवं सचित्रं वर्णनकाव्यम्

जयपुरवैभवम्

(लेखकः—भारतप्रसिद्धः कविशिरोमणिभट्टश्रीमथुरानाथशास्त्री)

राजस्थानस्य, जयपुरस्य च ऐतिहासिकं सचित्रं विनोदमयं काव्यगतं च वर्णनम् । हिन्दी-अनुवादः सहैव दत्तोऽस्ति ।

भारतीग्राहकाणां कृते मूल्ये ७% न्यूनता

मूल्यं ५) पृष्ठ संख्या ७००

प्राप्तिस्थानम् :-"भारती" ग्रन्थागारः, मञ्जुनिकुञ्जः, सी-स्कीम जयपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शोकोद्गारः

ले० श्रीदीनानाथत्रिवेदी 'मधुपः'

अष्टादशे बत दिनेऽद्य नवम्बरस्य
छात्रान् रतान् सुपठने न समीक्ष्य चात्र ।
हा हन्त पाठयितुमेत्र सुरानितस्ते
स्वर्गं गताः सुगुरवः पुरुषोत्तमाख्याः ॥१॥

काशीनरेशवरराजमनीषिणो ये
विद्याप्रदीप्तमतिकोविदवृन्दराजाः ।
ये लेखकाश्च कवयो द्विजराजमुख्या-
स्ते स्वर्गताः सुगुरवो मम हन्त कष्टम् ॥२॥

आराधिता साधु सरस्वती यैः
सदा सदाचारपरायणा ये ।
तेषामभावेन न मेऽद्य वाणी
व्यथां मनःस्थां बत वक्तुमीष्टे ॥३॥

मूर्खाधिराज ! हरिवज्रकठोरचित्त !
पूर्वं त्वमत्र कुविधे ! निजवांछयैव ।
सूत्पाद्य पण्डितमणिं पुरुषोत्तमाख्यं
कस्मादितोऽनवसरे हृतवान् विलज्ज ! ॥४॥

भूभृद्ब्राह्मणबालकाः सुमहता स्नेहेन यैः पाठिताः,
धर्माचारविचारणैकनिपुणा ये पूर्णविद्वद्वराः ।
स्वप्नेऽप्याचरितं न विप्रियमरेः सौजन्यपूर्णैश्च यैः,
तानेवाऽद्य विनिघ्नता किमिह भो काल ! त्वया नो हृतम् ॥५

नानाऽधर्मपरायणाः प्रतिदिनं वृत्तिं हरन्तस्तथा
ये दुष्टाः परकार्यनाशनपराः कायेन वाचाऽनिशम् ।
काल क्रूर विमूढ मर्त्यहृतकांस्त्यक्त्वा त्वयैतान् वृथा
निर्वैरो निहतः कुतो गुरुवरो लब्धश्च लाभोऽत्र कः ? ६

न्यायव्याकरणादि–शास्त्रनिवह–प्राप्तावबोधा महा–
विद्वांसो बहुशो भवन्ति भुवनेऽभूवन् भविष्यन्ति च ।
पाण्डित्यं सुविलक्षणं त्वयि गुरो यद् धार्मिकत्वं व्यभात्,
बाहुल्येन परं तथाविधिमहो नो लप्स्यतेऽतः परम् ॥७॥

युध्यन्ते कतिचिन्मिथः प्रतिदिनं गर्वं व्रजन्तः परे,
जाताः केऽपि बुधास्तु शुष्ककलहक्रीडाप्रियाः प्रायशः ।
संसारे न- समादरः सुरगिरां, छात्राः पठन्त्येव नो,
चित्ते सर्वमिदं विचिन्त्य गुरवः स्वर्गं गतास्ते ध्रुवम् ॥८॥

धर्मो याति विधर्मतामनुदितं प्रेधन्त एधांस्यतो,
व्याप्तं पूर्णतया कलिं जगति ते विज्ञाय सम्यक्तया ।
श्रीमद्भागवतादिपाठनिरता नित्यक्रिया — तत्पराः,
गोलोके वसतो हरेर्भगवतो लीलां गताः सांप्रतम् ॥९॥

'श्रीकृष्णः शरणं ममे' ति गदितो गोगोपगोपीश्वरः,
यो गोपायति भक्तमाशु भयतो रक्षन् प्रतिज्ञां निजाम् ।
सोऽयं शाश्वतशान्तिमादिशतु ते नित्यं मया प्रार्थ्यते,
सद्भक्त्या गुरवे दिवं गतवते श्रद्धाञ्जलिश्चार्प्यते ॥१०॥

दातुं शक्यते—शापोऽप्यनया । परीक्षासु यदि विद्यार्थी संस्कृतविषयेमादत्ते—स वरमिव लभते । विशेषतः प्रतियोगितापरीक्षासु । राकेशेन भूयांसोऽङ्का लब्धाः । साक्षात्कारोऽभूत् (Interview) !

यदा च राकेशेन समाचारपत्रे सफलानां प्रतियोगिनां नामसु स्वकीयं नाम—"भारद्वाज, राकेश" इति पठितं तदा हर्षोन्मादातिरेकेण नयनयोरश्रुप्रवाहः – मुखात् चीत्कारश्च निर्गतः सहसा । राकेशस्य पिता–येन विदेशं प्रोषितं सुतं जीवने कदाचन द्रष्टुं प्रत्याशितमपि नाऽभूत् समाचारपत्रे तस्य नाम पठितवान्—आह्लाद–विस्मय-जडता-ऽऽवेगानां भावशत्रुलतायामयं स्वात्मानं व्यस्मार्षीत् । तद्दिन एव राकेशस्य तडित्पत्रं पित्राऽधिगतम्—"प्रशासनिकसेवायामहं स्वीकृतः । दर्शनं कर्तुमागच्छामि ।"

—क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राचीनसंस्कृतौ आरण्य (ईरान) देशः

(ले० मल्लिनाथशर्मा चौमालः)

साम्प्रतं यश्च भारतात्पश्चिमोत्तरदिशायां ईरानदेशः स्थितः स च प्राचीनकाले आरण्यदेशनामासीत्। आरण्य नाम्नः कारणं तु एतद्विद्यते यत्सर्वेभ्यो भूपिण्डखण्डेभ्यः पूर्वं सुमेरुप्रदेशात्मकमार्यावर्त्तं भारतं भारतवर्षं च समुद्राद्बहिर्निःसृतम्। तत्रैव प्रथमा सृष्टिरुत्पन्ना। या ब्राह्मणक्षत्रियमयी आसीत्। अनया सृष्ट्या आर्यावर्त्तं भारतं च संकुलं जनैः पूर्णं च जातम्। तदा ईरानादिदेशाः वनानामाधिक्यादारण्याः कथिता आसन्। भारतीयाः तान् देशानारण्याः देशाः इति कथयन्ति स्म। अतएव ईरानदेशः आरण्यदेशः प्रसिद्धो जातः। तस्यापभ्रंश एव ईरानदेशः। तत्र सृष्टिवृद्धयर्थं ब्रह्मर्षयो राजर्षयश्च तत्र गताः ते आरण्यान् देशान् निवासयोग्यान् कृत्वा तत्र निवासं चक्रुः। तत्र च महर्षि अत्रिप्रजापतिः आरण्यदेशे स्वकीयं द्वितीयवैकुंठसदृशं आश्रमं निर्माय तत्र सृष्टिवृद्धिमकरोत्।

अत्रिमुनेस्तदाश्रमं द्वितीयवैकुंठमेव तत्पुराणे लिखितम्। तस्य स्मृतिचिन्हमधुनापि "परसिया" इतिहासे "अत्रिपत्तनं" इति नाम्ना स्मृतिं ददाति। तथा और्वाग्निनामकमुनिना वर्त्तमाने 'अर्ब'देशे स्वीयं आश्रमं स्थापितम्। यत्र च राजा सागरः पालितो जातः। यस्यौर्वं महर्षेर्नाम्ना स देशः "आर्षदेशः" इति सज्ञां धारयति और्वमुनेश्च स्मृतिं ददाति। अन्ये च बहवः राजर्षयोऽपि सृष्टिवृद्धयर्थं तत्र ईरानदेशे गताः। तेषु हैहयवंशीयाः क्षत्रिया विशेषरूपेण गताः। तत्र निवासिनोऽपि बभूवुः। ये स्वप्रतिज्ञानुसारं परशुरामेण निहिताः। "परशुरामः तं स्थलं मगजातीयब्राह्मणेभ्यो दत्वा स्वकीयं पितृऋणं मोचयामास। परशुरामस्य तत्र स्थित्यैव स देशः 'परशियादेशः" इति नाम्ना प्रसिद्धमासीत्। अधुनापि स परशिया एव वर्त्तते।

★

सम्पादकीयम्

'सिनेमा' चित्रपटैरपराधप्रवर्द्धनम्

रेलशकटीषु प्रत्यहं जायमानानां दस्युलुण्ठनानां (डकैती) हत्यानां च परिशोधविचारार्थं रेलसम्बन्धिरक्षाधिकारिणाम् राज्यसंबन्धिरक्षाधिकारिणां च ('रेलवे पुलिस--राज्यपुलिस') महदेकं संमेलनं समघटत। नवीन देहलीराजधान्यां प्राचीनानुभविनो वयोवृद्धाश्चापि रक्षाधिकारिणः एतदर्थं सममिलन्। 'लुण्ठन-हत्यादि' दुर्घटनानां यथैव विचाराः प्रासरन्, कारणान्वेषणे च यथैव नानामतयः प्रावर्तन्त, तस्मिन्नेव प्रसङ्गे एकेन भुक्तभोगिनाऽधिकारिणा अपराध-चित्रपटैरेवं विधानामपराधानां सोत्साहं प्रवर्द्धनं समार्थ्यत। विवेकिना तेनाधिकारिणा सप्रमाणमिदं साधितं यत् एकस्मिन् 'दस्युलुण्ठने ('डकैती') दस्युभिः स एव प्रकारः प्रयोजितो यो हि तत्कालं प्रदर्शिते वैदेशिकचित्रपटे (फिल्म') लुण्ठकैरुपादीयत।

चित्रपटानां व्यापकः प्रभावः

वर्तमानकाले सर्वतः प्रसृतानां चित्रपटानामेषां प्रभावः अत्यधिकं व्यापकः समभूदिति निर्विवादः सत्यः। सोयं प्रभावश्चित्रपटानामुद्देश्यानुसारं लाभदायकोऽपि संभवेत्, हानिकारकश्चापि। इदं भारतीयानामस्माकं दौर्भाग्यमस्ति यत् जनप्रियाणामेषां जनरञ्जनचित्रपटानां सदुपयोगोऽत्यन्तं न्यूनः, किन्तु दुरुपयोगः पदेपदेऽनुभूयते। सर्वतः पूर्वम् लोकेषु उत्तमानामादर्शानां प्रचारार्थम् आर्यैः नाटकादिचित्रकला प्रवर्तिताऽभूद्, यस्याउद्देश्यं सर्वप्रसिद्धमासीत् 'रामादिवद् वर्तितव्यं, न रावणादिवत्'। एभिर्नाटकानामभिनयै र्लोकै तादृशी शिक्षा प्रवर्तिता, या हि प्रभुसंमितैर्वेदोपनिषदादिशास्त्रैर्न प्रवर्तयितुमशक्यत, न चापि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भोजन के बाद
दिन में दो बार..

सभी ऋतु में
स्वास्थ्य लाभ का
श्रेष्ठ साधन

शुद्ध स्वास्थ्य गठन के लिए

दो चमच मृतसंजीवनी के साथ चार चमच महाद्राक्षारिष्ट (६ सालका पुराना) सेवन करने से आपका स्वास्थ्य का शीघ्रही उन्नति होगा।

पुराना महाद्राक्षारिष्ट फुसफुस को शक्तिशाली और सर्दी, खासि, श्वास वगरह रोग निवारण करने मे अत्यधिक फलप्रद है। मृतसंजीवनी भुक और हजम शक्ति वर्धक और बलकारक टनिक है। दोनो दवा एक साथ सेवन करने आपका शरिर का वजन और शक्ति बढ़ाता है। मनमे उत्साह और उद्दीपना का संचार करेगा और नवलब्ध स्वास्थ्य और कर्मशक्ति दीर्घ समय तक अटूट रखता है।

साधना औषधालय

विश्व का सर्वश्रेष्ठ ढाका आयुर्वेद प्रतिष्ठान–

कलकत्ता केन्द्र :
डा. नरेशचन्द्र घोष एम. बी. बी. एस.,
आयुर्वेद- आचार्य
३६, गोआलपारा रोड, कलकत्ता-३७

अध्यक्ष : डा. योगेशचन्द्र घोष, एम. ए. आयुर्वेद- शास्त्री, एफ. सी. एस. (लन्दन), एम.सी.एस. (अमेरिका) भागलपुर कालेज के भूतपूर्व रसायनशास्त्र के प्रोफेसर।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुहृत्संमितैर्धर्म-नीत्यादिभिरुपदेशैस्तदिदमशक्यत । किन्तु लोकान् आत्मवशे कृत्वा कान्तासंमितैरेभिर्नाटकाभिनयैस्तथा प्रभावः समासादितो यथा एतत्कृतः सोयमुपदेशस्तथा सुस्थिरप्रभावः समभूद् यथा युगयुगान्तरेऽपि सोयं हृदयपटान्न प्रमृष्टोऽभूत् । आर्याणां समग्रेऽपि भूमण्डले गुरुसिंहासनमिदं सर्वसंमानितमसिध्यत् । "आर्या एव नाट्यकलाया आविष्कर्तारः" इति सर्वैरेव गवेषणापण्डितैस्तथ्यमिदं सममन्यत । वर्तमानयुगे रङ्गमञ्चात् पूर्वप्रोक्ता नाट्यकला विसर्जिताऽभूत् । तत्स्थानं चित्रपटैरेभिः समासादितम् ।

चित्रपटानामतिप्रवृद्धिः

चित्रपटाः समग्रेऽपि भारते सूर्यरश्मय इव सर्वतोऽपि व्याप्ताः । येषु प्रान्तेषु, नगरेषु, नवीनप्रभावः अतिन्यूनतया, अतिकठिनतया च व्याप्नुते स्म, तेष्वपि देशेषु चित्रपटानां लोकप्रियता तथा प्रवृद्धा यथा चित्राणामेषां चतुर्दिक् चर्चामाकलय्य चिरानुभविनः स्वयं चित्रीयन्ते । नगरे नगरे, स्वल्पे स्वल्पे पत्तनेऽपि, साम्प्रतं चित्रगृहाः सोन्मेषं परिचलन्ति । देशे सर्वतोऽपि संप्रति महर्घता व्याप्ता । मूल्यवृद्धेः कारणेन दीनानामन्नभोजनमपि कठिनं संवृत्तम् । किन्तु रात्रौ चित्रपटानामेषां चमत्कृतिः सर्वमपि दुःखादिकं परिमार्ष्टि । सर्वदिनं कठिनपरिश्रमेण यत्किञ्चिदुपार्ज्य, अर्द्धोदरं भुञ्जाना अपि जना रात्रौ चित्रपटे चित्रीयन्ते ।

पूर्वमुक्तवानस्मि--चित्रपटानां प्रभावो भूरिभूरिलाभदायकोऽपि संभवति, हानिकारकश्चापि । देशेऽस्मिन् अपराधप्रवर्धने यदिमे चित्रपटाः कारणीभवन्ति, अत्रहि चित्रपटनिर्मातॄणां मनोवृत्तिः कारणम् । चित्रपटनिर्माताश्चित्रपुत्तलिका इव परतन्त्राश्चित्रपटनिर्माणे । भारतीयचित्रपटनिर्मातॄणां, विशेषतो हिन्दीचित्रपटनिर्मातॄणां प्रेरणासूत्रं वैदेशिकाश्चित्रपटाः। विदेशेषु आचारव्यवहाराः, सभ्यताप्रवृत्तिश्च भिन्नविधा । तत्रहि मनोरञ्जनसाधनेषु अपराधमयचित्रावलोकनमपि न दुष्यति । अतएव तत्रापराधचित्राणि प्रतिपदं स्फुरन्ति । स्फुरत्प्रभावैरमीभिश्चित्रपटैः प्रभाविता अस्माकं भारतीया अपि तादृशानेव चित्रपटान् अत्रापि निर्मान्ति । तेषां प्रभावो जनरुचेरुपरि कीदृशः प्रसरेदिति, ते न विचारयन्ति । यैश्चित्रपटैर्वैदेशिकाः प्रसीदन्ति, नवशिक्षाशालिनस्तेऽपि तैरेव प्रसीदन्तस्तानेव स्वदेशेऽपि निर्मान्ति । एतस्यैव तदिदं फलम्-यद् भारतेऽपि अपराध-चित्राणामेव पूरोत्प्लवः ('बाढ़') समागतोस्ति साम्प्रतम् ।

रक्षाधिकारिणां संमेलने दस्युलुण्ठनाद्यपराधानां चित्रपटानाममीषां दायित्वं न किलाऽद्यैव निर्धारितम् । एतदवसरात्पूर्वमपि बहून् वारान् समाजसेविभिः, अधिकारिभिः, न्यायालयैःचापि एवंविधानां चित्रपटानां कुप्रभावस्य मध्येसमाजं चर्चा प्रचालिता । एवं सर्वतः समालोचनेऽपि "हिन्दी--चित्रपटकला" यस्मिन् मार्गे निःसंभ्रममग्रे प्रवद्धते, तेन प्रजाहितकारिणः समीहितस्य सिद्धिः स्वप्नायितैव नूनम् । अद्यास्माकं जनतायाम्—"गैम्बलर" 'चोरलुटेरे डाकू', 'डाका', 'स्मगलर', 'जाली नोट', 'मिस चालबाज', 'बम्बई का चोर', 'किशोरी मर्डर केस', प्रभृतिनामवाहिनश्चित्रपटाः सोत्साहं निर्मीयन्ते । आभिश्चित्रमालाभिः कस्यचिदुत्तमकथानकस्य, कस्याप्युन्नतस्य आदर्शस्य, कस्यचित् समाजहितसाधकस्योद्देश्यस्य आशा आकाशकुसुमायिता । चुक्षुषी निमील्य अर्थराशिसंग्रहपराः चित्रपटाधिकारिणो यावत् धनलालसां मार्गे न नियच्छेयुस्तावत् समाजहितस्य वार्ताकरणं सुतरां व्यर्थम् ।

यदि देशे प्रवृद्धयुन्मुखानामपराधानां निरोधः समभीष्टस्तर्हि अपराध-चित्रपटेषु सुदृढं नियन्त्रणं स्थापनीयं भवेत् । सामाजिकसंस्थानामपि साम्प्रतं सुमहत् कर्तव्यं समुपस्थितं यत् ताः समाजे अपराधप्रोत्साहकान् चित्रपटान् निर्भरं निरुन्ध्युः । चित्रपटानामेषां विरोधे निजस्य निरोधघोषणाः प्रोज्जृम्भयेयुः । एतेन सहैव, 'नियन्त्रकमण्डलस्य' (सेंसरबोर्ड) अपि दायित्वपूर्णं महत्वं समुपस्थितं यत् मण्डलमिदम् अपराध-चित्रपटानां निरीक्षणसमये निष्पक्षभावेन, महता अवधानेन, च कार्यं कुर्यात् । एवं कृते एव हिन्दीचित्रपटानां स्वरूपे, उपयोगितायां च, परिष्कारः साध्यः स्यात् । अन्यथा शन्या-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपदेशमालायां

व्यायाम-सेवनम् चतुर्थो मणिः

पूर्वानुवृत्तम (ले० महोपाध्याय आशुकविः श्रीहरिशास्त्री दाधीचः, जयपुरम्)

पूर्वोक्तेन मानसेन आभ्यन्तरेण प्राणायामरूप व्यायामेन तु नायं क्षयो वेदनीयः प्रत्युत प्राणायाम-विधिना श्वासनिरोधने (कुम्भके) नियतश्वासेभ्योऽल्पा एव श्वासा उपयुज्यन्त इति श्वासानामवशेषतया रक्षणं भवति न व्ययः ।

यदि दिनक्रमेण एकघटीकालाभ्यासवतां त्रिशतं श्वासानां मध्यतः शतं श्वासाः अवशिष्टा भवेयुस्तन्मामेनैकेन त्रिसहस्त्र श्वासाः अस्मानधिकं जीवयिष्यन्ति इति न सन्देहः । एवं दिनमासवर्षक्रमेण प्राणायामं कुर्वतां आयुर्वृद्धिः सुनिश्चता भवति । गुणाश्च पूर्वोक्ता लभ्यन्त एव ।

अत्र व्यायामविषये प्रमाणीभूता नैकशो जनाः विख्याता आदर्शभूता अभूवन् तत्र प्राचीनेषु बाली, हनूमान्, भीष्मः, भीमश्चेति अप्रतिमबलवैभवाः व्यायाम-सेवनेन ब्रह्मचर्यरक्षणेन च सञ्जाताः । एतेषां चरितानि रामायण, महाभारतादिषु द्रष्टव्यानि । बालिचरितं हि वाल्मीकिरामायणे उत्तरकाण्डे प्रतिपादितं यथा—बाली व्यायामप्रणयी बभूव । स हि धावनभ्रमणरूपं व्यायामं विशेषतया सेवते स्म । तस्य धावनगतिरीदृशी समृद्धासीत् यत् स यथारुचि एकेन दिनेन प्रहरचतुष्टय एव भूमिं परिक्रम्य गृहमागच्छति स्म । यथा-प्रातःसन्ध्यां पूर्वसागर-तटे कृत्वा मध्यान्हे पश्चिमसागरं प्राप्य मध्याह्नसन्ध्यां कुरुतेस्म । ततः पुनः पूर्वसमुद्रं प्राप्य सायंसन्ध्यां कृत्वा गृहमायाति स्म । अस्य बले देवा दानवाश्चापि सर्वे विस्मिता आसन् । एवं हनूमान् भीष्मो भीमश्चापि व्यायामविषेरुत्कर्षोदाहरणभूताः अभूवन् । तदिदं सर्वं समवधार्य वदामः—व्यायामः सर्वदा सेव्यः स ह्यालस्यं व्यपोहति । उत्साहं वर्धयत्येष, ददाति क्षमतां बलम् । इति । एवं व्यायामगुणान् उरीकुर्वद्भिर्भवद्भिः हिताहितविवेक-

ऽभिमुखं प्रसृतानामेषां गतिनिरोधः सुतरां कठिनः । प्रदेयाद् भारतसहायकश्चराचरनायकः सुबुद्धिमेभ्यः, इति किं विशेषतो विस्तरेण ।

★

और पूर्वोक्त मानस व्यायाम (प्राणायाम) में न तो यह क्षय है न अन्य कोई हानि है । प्रत्युत प्राणायाम विधान से श्वास निरोध होने से क्योंकि कुंभक में प्राण के रोकने से थोड़े ही स्वांस उपयोग में आते है । इस तरह रक्षा ही (बचत ही) होती है खर्च नहीं होता । विचार कीजिए एक दिन में एक घड़ी अभ्यास वालों के ३०० सासों में से १०० सांस बचें तो एक महीने में तीन हजार सांस सुरक्षित रहते हैं, सुरक्षित रहे वे सांस हमें अधिक जीवन देंगे, इसमें सन्देह नहीं है । इस तरह दिन मास वर्ष ऋतु के क्रम से प्राणायाम करने वालों की आयुर्वृद्धि सुनिश्चित होगी और पूर्वोक्त लाभ होंगे ।

इस व्यायाम सेवन से अनेक जन भारत में प्रमाण रूप विख्यात आदर्श हुए हैं उनमें बहुत प्राचीन बाली, हनुमान, भीष्म, भीम ये व्यायाम सेवन से अप्रतिम बल वैभवशाली हुए । इनके चरित्र वाल्मीकि--रामायण, महाभारत आदि मे देखिये । बाली का चरित्र वा० रामायण के उत्तर कांड में है । बाली धावन भ्रमण रूप व्यायाम का अधिक प्रणयी हुआ । इसके धावन की गति इतनी बढी हुई थी कि वह जब चाहता एक दिन में, ४ प्रहर में भूमि के चारों ओर घूम कर आजाता था । प्रभात संध्या पूर्वी सागर के तीर पर तथा मध्याह्न में पश्चिम सागर पर सन्ध्या करता । फिर पूर्वसमुद्र पर आकर सायं सन्ध्या कर लेता था । इसके बल पर देव दानव सभी आश्चर्य चकित रहते थे ।

इसी तरह हनुमान, भीष्म, भीम आदि बहुत से व्यायाम विधान के उत्कृष्ट उदाहरण हुए हैं । तो हम इन सभी बातों का विचार कर कहते हैं—व्यायाम सदा करना चाहिए इससे आलस्य मिटता है । यह व्यायाम उत्साह बढाता है, क्षमता और बल देता है ।

इस व्यायाम के इन उक्त गुणों को स्वीकार करते हुए और हिताहित-विवेक में प्रवीण आप लोगों को हमारा बताया हुआ मानस व्यायाम रूप नहीं भूलना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतीय-औषधानां सर्वाधिकं बृहत् विश्वस्तं निर्माणकेन्द्रम्

श्री वैद्यनाथ-आयुर्वेद-भवनम्

(आयुर्वेद लिमिटेड)

कलिकाता ★ पटना ★ झांसी ★ नागपुरम्

सर्वेषामायुर्वेदिकौषधानां तथा सर्वरोगेषु उपयुक्तानां भेषजानां
सावधानतया, वैज्ञानिकरीत्या प्रचुरपरिमाणे

निर्माणकारकम्

भारतवर्षे सर्वत्र एकमूल्येन भेषजानीमानि लभ्यते

हरिनगर सूगर मिल्स लि०

★★★ फेक्टरी ★★★

हरिनगर [एन० ई० रेल्वे] [चम्पारन जिला] उत्तर बिहार

दूरभाषयन्त्रम्—

मर्यादा—रामनगर [चम्पारन]

प्रधानकार्यालय—

२०७, कालबादेवी रोड, बम्बई—२

दूरभाषयन्त्रम्—

'क्रिसूगर' [बम्बई]

निर्मातारः—(अत्युत्तम-शुद्धशर्करायाः)

★ प्योअर, ★ फर्स्टक्लास, ★ क्रस्टल ★ फेन सूगर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपयोगिनी लघुकथा :-

अन्तरात्मनो नादः

(ले० कमलानाथशर्मा जयपुरम्)

वर्षाणि व्यतीतानि । सौराष्ट्रनिवासी एकोऽध्यापकः एकदा कालिकात्तानगरं गच्छन्नासीत् । मार्गे देहली बाष्पयानविश्रमस्थाने, तस्य पार्श्वपुटात् सर्वमपि द्रव्यपुटकं (जेब) विच्छिद्य केनाप्यपहृतम् । अतिकष्टेन यथाकथंचित् स्वगृहं परावर्तिष्ट महाभागोऽयम् । अस्तु, व्यतीतानि दश वर्षाणि । सा वार्ताऽपि विस्मृतिमुपयाता । अस्मिन्नवसरे अकस्मात् त्रिंशन्मुद्राणां धनादेशपत्रमायातम् । तस्मिन्नवसरे कस्यचित् धनादेशोपलब्धेः प्रसङ्ग एव नाऽऽसीत् । अत एवाध्यापकेन परिज्ञातं यत् प्रेषणावाहिनः (पोस्टमेन) सोयं भ्रमः । किन्तु धनादेशपत्रस्य वृत्तकोष्ठकम् ('कूपन') यदा दृष्टम् तदा आश्चर्येण सह कृतज्ञता, संतोषश्चाप्यभवत् । पत्रे आसील्लिखितम्—

"असहनीयपरिस्थितेः कारणाद् भवदीयात् परिधानीयपार्श्वपुटकात् मया विंशतिरूप्यकाणि प्राप्तानि । तस्य व्यतीतानि दश वर्षाणि । किन्तु अन्तरात्मा मां मुहुर्मुहुः पातकस्यार्थे अक्रोशत् । दुःखमिदं शूलमिव हृदये अविध्यत् । अद्य पार्श्वपुटकात् प्राप्तैः विंशतिरूप्यकैः सह दश रूप्यकाणि संयोज्य भवत्समीपं प्रेषयामि । पार्श्वपुटके एव भवतः स्थानसंकेतोपि मया प्राप्तः । द्रव्यमिदं परावर्त्य अद्याहमात्मानम् ऋणमुक्तं भावयामि ।"

प्रेषकस्य नासीन्नामलेखः । किन्तु मम मानसे प्रेषकं प्रति प्रोद्बभूव कृतज्ञभावः । अहो ! अस्माकमन्तरात्मनः सर्वदैव कश्चित् शब्दः, सत्यपरामर्शश्चोदेति । किन्तु स्वार्थान्धा वयम् अन्तरात्मनस्तं शब्दं नाऽवधारयामः । धन्योऽस्माकं हृदये स्थितः परमात्मा ।

बहुत वर्ष बीत गए । सौराष्ट्र निवासी एक अध्यापक एकबार कलकत्ता जा रहे थे । रास्ते में देहली स्टेशन पर उनकी जेब काट कर किसी ने बटुए में से सारे रुपये निकाल लिये । बहुत दुःख से वह जैसे-तैसे अपने घर लौटे । खैर दस वर्ष बीत गए । वह बात भी भुला दी गई । इस ही अर्से में अचानक तीस रुपयों का एक मनीआर्डर आया । उस समय किसी देश से मनीआर्डर भी मिलने की बात नहीं थी । इसलिये अध्यापक ने सोचा कि यह पोस्टमैन की ही गलती है । लेकिन मनीआर्डर के कूपन में उन्होंने जैसे ही देखा वैसे ही उसे आश्चर्य के साथ कृतज्ञता व संतोष भी हुआ । कूपन में लिखा हुआ था—

"किसी असहनीय परिस्थिति के कारण, मैंने आपके कोट की जेब से बीस रुपये निकाले थे । उस बात को दस वर्ष बीत गए । लेकिन मेरी आत्मा इस पाप के लिए बार बार कोसती थी । दुःख भी हृदय में काँटे की तरह चुभता था । अब आपके बटुए में से निकाले हुए बीस रुपयों में दस रुपये और जोड़कर आपके पास भेजता हूं । बटुए में से आपका पता मुझे प्राप्त हुआ । यह द्रव्य आपको लौटा कर आज मैं अपनी आत्मा को ऋणमुक्त सोचता हूं ।"

भेजने वाले का नाम नहीं था, लेकिन मेरे मनमें भेजने वाले के प्रति श्रद्धा हुई । ओह ! हमारी अन्तरात्मा से सदा ही शब्द और अच्छे परामर्श निकलते हैं । किन्तु स्वार्थ से अन्धे हम अन्तरात्मा की आवाज नहीं सुनते हैं ।

धन्य है हमारी आत्मा में स्थित भगवान को ।

प्रवणतया अस्य मानसो व्यायामः प्राणायामरूपो न विस्मर्तव्यः । तेन सर्वे गुणाः समुदेष्यन्ति आयुश्चापि वृद्धिमेष्यतीति संभाव्य विरमामः । पुनः कदाचन कांचन वार्तां प्रस्तोष्यामः ।

चाहिए, उससे पूर्वोक्त सभी गुण मिलेंगे और आपकी आयुर्वृद्धि भी होगी । बस, इतना कह कर हम विश्राम करते हैं फिर कभी समय पाकर आपके आगे कोई बात प्रस्तुत करेंगे । —क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

स्वजातीयविघाताय माहात्म्यं दृश्यते नृणाम् ।
श्येनो विहङ्गमानेव हिनस्ति न भुजङ्गमान् ॥ १

मनुष्यों का बड़प्पन (सामर्थ्य) प्रायः अपने स्वजातीय पुरुषों का नाश (हानि) ही करता है, देखिये, बाज (शिकरा) पक्षिओं को ही मारता है, सांपों को नहीं ॥ १

बहुभिर्मूर्खसंघातैरन्योन्यं पशुवृत्तिभिः ।
प्रच्छाद्यन्ते गुणाः सर्वे मेघैरिव दिवाकरः ॥ २

मूर्खों के बहुत से समूह इकट्ठे हो जांय (और अपने स्वभाव के माफिक) और वे आपस में पशुओं के से काम करने लगें (मारने, नुकसान पहुंचाने लगें) तो अच्छे अच्छे संपूर्ण गुण भी ढक जाते हैं। काले काले बादल यदि इकट्ठे होकर ठेलंठेली करते हैं तो सूर्य भी ढक जाता है ॥ २

मनागनभ्यावृत्त्या वा कामं क्षाम्यतु यः क्षमी ।
क्रियासममिहारेण विराध्यन्तं क्षमेत कः ॥ ३

जो क्षमाशील है वह थोड़ा अपराध करने पर, अथवा एकाधबार अपराध करने पर क्षमा कर देगा। किन्तु निरन्तर (बारबार) अपराध करने वाले की कौन क्षमा करेगा ॥ ३

राजा बहादुर मोतीलाल पूना मिल्स लि०

कार्यालयः]२५५६६७ २५२६५८

तडित्पत्रम् :-रामोपून

आर. बी. चिह्नितवस्त्राणां

धौतानि, सुन्दर जैकार्ड वस्त्राणि, पुष्पांकितशाटी, लम्बवस्त्रम्, मलमल्लवस्त्रम्, नवपद्धतिपुष्पाङ्कितानि वस्त्राणि, अतिविशिष्टानि

मैनेजिंग एजेन्ट्स—

मुकुन्दलाल बंसीलाल एवं पुत्राः

विक्रयाभिकर्त्तारः—

पित्ती एजेंसीज़ प्राइवेट (सीमितम्)

हमाम हाउस, हमाम स्ट्रीट फोर्ट, बम्बई १

प्रकाशक—जयबहादुरसिंह पता—गोपालजी का रास्ता जयपुर (राजस्थान)
मुद्रकः—श्री शङ्कर आर्ट प्रिण्टर्स, त्रिपोलिया बाजार, जयपुर
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

243

संस्कृतस्य प्रमुखं मासिकपत्रम्

Librarian,
Gurukula Kangri (Hardwar)

दीने दयाविधायिनी
निजसेवकमनुयाति ।
ज्ञानविभव-वरदायिनी
हंसवाहिनी भाति ॥१

वर्षम् १०] [चतुर्थोऽङ्कः

वार्षिकमूल्यम् ४) चतस्रो मुद्राः
एकप्रतेः चत्वारिंशत् नवपणाः
(४० नये पैसे)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



क्या आप

इसे जानते हैं ?

मनुष्य को जीवन के त्रितापों से मुक्ति प्रदान करनेवाला यह सनातन ज्योतिर्लिंग देश के सबसे बड़े और विश्वासी आयुर्वेदीय प्रतिष्ठान का बोध-चिह्न बनकर लाखों-करोड़ों लोगों के जीवन को आरोग्य प्रदान करने के कार्य में आज अग्रसर है। आपने यदि अब तक बैद्यनाथ औषधियों के गुण का स्वयं अनुभव नहीं किया है, तो एक बार इसे अवश्य आजमाइये।

देशी दवाओं का सब से बड़ा और विश्वासी कारखाना

श्री बैद्यनाथ

आयुर्वेद भवन प्राइवेट लि०

कलकत्ता · पटना · झाँसी · नागपुर

P48

राजस्थान-मद्रास-मध्यप्रदेश-सौराष्ट्र-भूपाल-उत्तरप्रदेश-बिहार-पचनद-आन्ध्र-बम्बई-सर्वकारै-स्वीकृता—

विषय-सूची

क्रम संख्या	लेखाः	लेखकाः	पृष्ठ संख्या
१.	श्रीमाघः	श्रीमुदिगोंडज्वालापतिलिङ्गशास्त्री, इननि, आंध्र	७५
२.	सुन्दरसेनः	पं० श्रीवासुदेवशास्त्री बागेबाड़ीकरः शोलापुरम्	७७
३.	न गृहं गृहिणीं विना !	श्रीगणेशरामशर्मा, झालावाड़	७९
४.	वेदान्तदर्शनस्य वासनाभाष्यम्	श्रीमल्लिनाथशर्मा, चूरू (राजस्थान)	८२
५.	स्व० श्रीनन्दलाल भुवालकाश्रेष्ठिप्रवरेण विहितानि सार्वजनिककार्याणि		८४
६.	संस्कृतसमाचारः	सम्पादकः	८५
७.	वेदस्य सर्वविद्यानिधानत्वम्	श्रीमुक्तरक्तशर्मा-आङ्गिरसो, भारद्वाज	८६
८.	श्रीवेणीशङ्करशर्ममहाभागस्य परिचयः	श्रीदीनानाथत्रिवेदी "मधुप", जयपुरम्	८८
९.	हीरक-महोत्सवः		८९
१०.	जीवनस्य पृष्ठद्वयम्	सहसम्पादकः	९१
११.	सम्पादकीयम्	सम्पादकः	९२
१२.	सन्ध्योपासनम्	श्रीहरिशास्त्री दाधीचः, जयपुरम्	९४
१३.	परीक्षा	श्रीरामेश्वरप्रसादउपाध्याय 'भयङ्कर' जयपुरम्	९६
१४.	सूक्ति-सुधा	सम्पादकः	९८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्र० सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादक :—
देवर्षिकलानाथशास्त्री
साहित्याचार्यः एम. ए.
जयपुरम्

भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

प्रबन्धसम्पादकः—
गिरिराजशर्माशास्त्री
भारती-भवन
गोपालजी का रास्ता,
जयपुर

वर्षम् १० | माघमासः, सं० २०१६ | अङ्कः ४

श्रीमाघः

(ले० मुदिगोंडज्वालापतिलिङ्गशास्त्री, ईमनि, आंध्र)

माघो नाम बभूव किं कविवरः किं लोकमान्योऽभवत्
किं तत्संस्कृतभारती बुधजनैस्संस्तूयमाना हि किम् ।
काव्यं तेन नवोदितं रसमयं दिव्यं जगच्छ्रेयसे
किं यूयं वयमप्यनेनकवयो भूयास्म तर्को महान् ॥१॥

माघे मासि कृषेःफलं भुवि जनैस्संकीर्त्यते सर्वदा
नानासस्यविपाककालनियमात्मानन्दसद्बोधनात् ।
माघे चापि तथैव संस्कृतमहाभाषाप्रवर्तारकाः
वाञ्छन्त्येव पदार्थभावमधुरालंकारसद्बोधनात् ॥२॥

यद्भारतीयपुरुषार्थचतुष्टयं हि
माघेन काव्यकथनेन प्रचारितं तत् ।
काव्यं कलारसमयं हितधर्मबद्ध-
माबालवृद्धजनसेव्यमलं वचोभिः ॥३॥

भवानधोऽधोऽवतरन्तमम्बरात्
विलोक्य वद्ब्रह्मसुतं विरच्य ।
अनन्यविद्वत्कविताशलाकया
प्रदर्शयत्यर्हमनल्पशिल्पम् ॥ ४ ॥

यद्भारते किमपि भागवतेपि यच्च
कृष्णस्य धर्मविहितं शुभमाचिकीर्षोः ।
भास्वत्सुधा मधुकथायुगयोजनं त-
त्काव्यस्य कर्तुरनुभावमहो प्रदत्ते ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वज्ञस्य महात्मनो भगवतः कृष्णस्य नीतिज्ञता
पूर्णाऽसीत्कथमुद्धवेन कथितं किं राजनीतिप्रदम् ।
लोके नीतिविदोपि कस्यचिदपि स्वार्थप्रयत्ने सदा
वृद्धैर्बोधितसद्वचः प्रतिपदं भक्त्या गृहीतं शुभम् ॥ ७ ॥

को वा रसोंगी चलतीति माघे
तर्के रसेष्वित्यनुचिन्त्यमाने ।
बीभत्स एवं करुणस्तथैवं
श्रीमल्लिनाथेन विभाति वीरः ॥ ७ ॥

वृत्तं स्वजातिविहितं पदमर्थसत्वं
भावं तदर्थविहितं गुणसूचिभावम् ।
गौणं स्फुटं ध्वनिरलंकृतिरात्मकाव्य-
श्रीभूषणानि विविधानि नवानि सन्ति ॥८॥

एवं स्रविष्यति भवत्कविताप्रवाहः
पुष्पस्रवन्मधुमरंदरसप्रसक्तः ।
ज्ञात्वा पिता कुसुमसंभृतमाघमास-
नाम प्रसिद्धमकरोद् भुवि सार्थकं तत् ॥ ९ ॥

एवं काव्यकला विभाति सुकवेर्माघस्य यस्योत्तमा
तस्याग्रे कवयो भवाम इति वक्तुं के समर्था वयम् ?
वृत्तं यच्च पुराणबोधितमपूर्वत्वेन चित्रीकृतं
दृष्ट्वा भावरसोर्जितं हि सहसाऽनन्दोल्लसच्चेतसः ॥ १० ॥

माघे मेघे गतमिति वयो मल्लिनाथस्य वाचः
व्याख्याकर्तुः किमपि च ध्वनंतीत्यलं वाग्विशेषैः ।
वृद्धत्वं तद्वपुषि यशसि प्रायशो ह्यागतं किं
व्याख्यां कर्तुं विविदिषुरगाद् वृद्धतां साधनानि ॥ ११ ॥

श्रीमत्काव्यांबुराशौ ललितगुणमणीन् मूलभागान्तरस्थान्
उत्क्षिप्त्वा तस्य वेला बहिरवकिरति ज्ञातुमिच्छत्सुधीभ्यः ।
व्याख्या सर्वंकषाख्या गुणगणमहिता मल्लिनाथस्य सूरेः
नो चेत्कः काव्यगर्भस्थितगुण निचयं प्राप्तुमिच्छन् यतेत ॥१२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ले० महोपाध्याय पं वासुदेव शास्त्री बागेवाड़ी
करः साहित्याचार्यः काव्य-तर्क-वेद-तीर्थम्
शोलापुरम्

आसीत् पुरा किल निषधेषु अलका नाम नगरी विश्रुता। यस्यां पौरवधूवदनैर्दिनकौमुदी जायते स्म। यस्यां च सौधशिखरस्वच्छपताकापंक्तिभर्बहुधा व्योम्नि जान्हवी विप्रकीर्णेव दृश्यते स्म। तत्र चापरो महासेनः शक्तिमान् महासेनाभिधो नृपतिरभूत्। यस्य प्रतापो रिपुस्त्रियामश्रुताम्रेषु नयनेषु स्थितिमभजत्। शुभ्रैर्यशोभिर्गौरीगुरुः स्वं गिरिं हंसवाहनः स्ववाहनं क्षीराब्धिशायी क्षीरोदधिं धवलिते जगति मृगयते स्म। शचीव शतक्रतोस्तस्य शशिप्रभा नाम राज्ञी बभूव। तस्यां च स सुन्दरसेननामानं विलासस्थानमिव सुन्दरीणां सुन्दरं तनयं प्राप।

अथैकदा यौवनारूढः स नृपात्मजो मित्रैः समानवयोभिः सह पुरयात्रायाम् उत्सवं द्रष्टुं ययौ। व्यूढोरस्कं प्रांशुबाहुं कमललोचनं तं पथि यदृच्छया संगता कात्यायनी नाम तापसी वीक्ष्य विस्मितस्तब्धनयना क्षणात् लिखितेवाभवत्। आशिषा तमभिनन्द्य प्रहृष्टा गन्तुमुद्यता सेवकासक्तदृशा तेन न वीक्षिता सदर्पमिव तं मत्वा उच्चैरुवाच—"अहो! रूपसंमत्तो राजपुत्र एष मदाकुलो हंसद्वीपपतेः पुत्रीं कान्तां प्राप्नोति चेत् न जाने कीदृशोऽयं भविष्यति" इति। तस्यास्तद्वचनं गर्वमन्थरं श्रुत्वा सेवका विस्मिता राजपुत्राय न्यवेदयन्त। स तामानाय्य प्रणम्य विनयान्वितः पृष्टवान्। सा प्राह—"राजपुत्र, हंसद्वीपाधिपस्य मन्दरदेवस्य मन्दारवती नाम सुता वर्तते। मन्ये च यां विधाय विधेर्मनश्चिरादुच्छ्वसितम्। शङ्के च विधिः शशिक्रियां मासे मासे समभ्यस्य तन्मुखसादृश्येनैव अद्यापि प्रगल्भते। पश्य चित्रस्थं तत्सौन्दर्यम्। मया लिखितेयं सौन्दर्यानुरक्तया" इत्युक्त्वा राजपुत्रायाददात् तत्प्रतिमां चित्रस्थाम्।

चित्रस्थां तां विलोक्य सोऽपि चित्रन्यस्त इवाभवत्। एवंविधं स्वसुहृदं समवलोक्य तद्वयस्या विस्मयाकुलास्तापसीं प्राहुः—"आर्ये, चित्रस्था राजकन्या तत्सदृशी कै प्रतीयेत? सादृश्ये कुशलाऽसि चेद् राजपुत्रोऽयं लिख्यताम्।" तैरेवमुक्ता तापसी अविसंवादिलावण्यं दर्पणे संक्रान्तमिव तं राजसुतमलिखत्। चित्रे तुल्यरूपं भूपात्मजं लिखितं संवीक्ष्य ते 'साधु' इत्यभाषन्त। तापस्यां प्रयातायां महीपालपुत्रः कामानलतप्तः श्वासताम्राधरः आपाण्डुगण्डोऽभवत्। सुहृन्मुखात् पुत्रं भ्रमरज्वरातुरं विदित्वा तापस्या निवेदितं मन्दारवतीवृत्तान्तं च निशम्य महासेनो हंसद्वीपाधिपं दिक्षु विश्रुतां कन्यां सुन्दरसेनाय दूतमुखेनायाचत। महासेनविसृष्टं फलके लिखितं राजपुत्रं वीक्ष्य हंसद्वीपाधिपः स्वसुतानुमत्या महासेनाय प्रतिसंदेशं विसृष्टवान्। अनुपदं च वरं प्रत्यक्षीकर्तुं स्वकन्यां दासदासीवृतां प्राहिणोत्।

अथ पितुराज्ञया सा प्रवहणेन सपरिवारा महासेनपुरीं प्रस्थिता तरङ्गावर्तभीषणं सागरस्य मध्यं प्राप्नोत्। ततोऽकस्मात् समुद्रः समुद्भूतमहावातैः प्रोत्तुङ्गतरङ्गोऽभवत्। कल्लोलमालिकाभिराहतं राजकन्याश्रितं प्रवहणं सागराम्भस्यमज्जत्। दैववशात् सहसा वात्यासु प्रशान्तासु विगतचेतना सा राजपुत्री वीचिहस्तैः क्वचित् तीरं प्रापिता सागरेण। चिरात् संज्ञां समासाद्य त्रासशोकातङ्काकुलाऽभवत्। यूथात् प्रभ्रष्टा कुरङ्गीव तारप्रलापिनी निर्जने तालीवनश्यामे जलधेस्तटे बभ्राम। "हा तात, क्वासि? पश्य माम्" इति सुदारुणं सुचिरमाक्रन्दत्। अत्रान्तरे तत्र वनप्रदेशे रचिताश्रमो मतङ्गो नाम मुनिपुङ्गवस्तं देशं सपुत्रीकः समागच्छत्। शोकक्षाममुखीं निःश्वासग्लपिताधरां तां वीक्ष्य करुणासागरः स मुनिः सान्त्वयन्निवाब्रवीत्—"वत्से, समाश्वसिहि। मा बिभीहि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

का त्वम् ? कथं च प्रदेशमिममनुप्रविष्टा" इति । तेनैवं समाश्वासिता दुःखकारणं च पृष्टा सा बाला समाश्वासमुधया लब्धजीविता आत्मनः सकलं वृत्तान्तं तस्मै न्यवेदयत् । श्रुतवृत्तान्तः स महर्षिः 'हे पुत्रि, नेमा विपत्तयश्चिरं तिष्ठन्ति । मा विक्लवा भव । तवेप्सितसमागमो नचिरादेव भविष्यति" इति भूयोभूयः समाश्वास्य तां पुत्र्या समं स्वीयमाश्रममनयत् । तत्रैव सा कञ्चित् काल न्यवसत् ।

अथैकदा सुन्दरसेनः सुहृज्जनपरिवृतो जलधेस्तटे स्थितं शशाङ्कपुरं राज्ञो महेन्द्रादित्यस्य राज्ञीं निजां मातृष्वसारं द्रष्टुं समागतः । तत्र स्थितः स एकस्मिन् अहनि वयस्यगणैः साकं नौविहरणाय नाव समारुह्य प्रस्थितः । महोदधेस्तटात् सुदूरं गता नौः प्रवाहागतेन महता तुहिनखण्डेन घर्षिता भग्ना सती जले न्यमज्जत् । नौकाश्रितास्ते सर्वे बाहुभ्यां तरणोद्यता वा प्रेरितैस्तरङ्गैः पृथक् पृथक् तीरस्थलेषु विन्यस्ताः । एकेन वयस्येन सार्धं नृपसुतः क्वापि तीरप्रदेशं प्राप्य नियतेर्भुजङ्गकुटिलं विलसितं व्यचिन्तयत् । कन्दमूलफलाहारः स तत्र वनस्थले सवयस्योऽभ्राम्यत् ।

घोरं कुलिशपातदारुणं महोदधिव्यसनवृत्तान्तं तं निशम्य निषधाधिपो विपन्नं पुत्रं समुद्दिश्य बहु व्यलपत् । देवी शशिप्रभा पुत्रशोकविह्वलाऽभवत् । अस्मिन्नेव क्षणे हंसद्वीपाधिपतिः स्वसुतां सागरे निमग्नां विज्ञाय शोकाकुलोऽलकां सपत्नीक आगतः । समानदुःखिनोस्तयोः संगतयोः सबन्धिनोः सपरिवारयोः शोकाक्रोशरवो महासेनपुरं तारमचरत् । "समानदुःखसङ्गेन बाष्पग्रन्थिर्हि भिद्यते ।" वृद्धामात्यपुरस्सरैः पौरजनैः शनैः शनैराश्वासितौ तौ शोककर्शितौ सभार्याकौ भूमिपती नियतौ देवार्चनपरायणौ अभूताम् ।

अत्रान्तरे स राजसुतः सवयस्यो वने पर्यटन् मतङ्गाश्रमनिकटं प्राप्तः । आश्रमोपकण्ठे नदीतीरे उपविष्टः सः नातिदूरं प्रवाहे जलिकेलिलोलाः काश्चन मुनिकन्यका अपश्यत् । ताराणां मध्ये रोहिणीव तासां मध्ये अभिभतेन्दुबिम्बेन वदनेन विराजतां कुवलयेक्षणाम् अग्राम्यवेषभूषां कन्यकां विलोक्य वयस्येन सह विस्मयलोललोचन आसीत् ।

अथ सलिलक्रीडाव्यग्रां तां सलीलं ग्राहेण गृहीतां वीक्ष्य मुनिकन्यकाः "हा ! हा ! अस्माकमेषा प्रियसखी मन्दारवती ग्राहेण दुष्टेन गृहीता आकृष्यते । संरक्ष्यतां संरक्ष्यताम्" इति आक्रोशन् । तां सुन्दरीं ग्राहग्रहणव्यसनापन्नां श्रुत्वा प्रक्षुब्धहृदयः प्रियतमानामश्रवणाच्च उत्फुल्लश्रवणः सावेगं गत्वा ग्राहं च हत्वा तामरक्षत् । सखीभिः कदलीदलैर्वीज्यमाना सा बाला लब्धसंज्ञा सती पुरस्थितं राजसुतं वीक्ष्य व्यचिन्तयत्—"अहो स एवायं युवा यः पुरा मया चित्रस्थो वीक्षितः" इति ।

ततः "लावण्यलतिकाकारा कस्येयं कन्यका ? नेयं दृश्यते मुनिकन्यका" इति सादरं पृष्टानां तेन तासां मध्यादेकया कथितम्—"आर्य, यथा त्वया चिन्तितं तथा नैषा मुनिकन्यका । एषा हंसद्वीपाधिपस्य मन्दरदेवस्य सुता मन्दारवती सुन्दरसेनाख्यं निषधाधिपसुतं वरं वरीतुं जलयानेन प्रस्थिता । जलमध्ये प्रवहणे मग्ने दैवात् तटमत्र प्राप्ता वीचिहस्तैः मतङ्गमुनिना समासादिता कन्यकेव प्रतिपालिता" इति । श्रुतवृत्तान्तोऽसौ प्रतीतः प्रहर्षसंप्लुतोऽभवत् । मन्दारवत्याः सख्या संपृष्टस्तत्सखस्तत्कथां न्यगदत् । अनेन परस्परवृत्तान्तज्ञानेन तावुभौ क्षणम् आनन्दसंदोहसागरेऽमज्जत् । ततो त्रासतत्कथो भगवान् मुनिस्तां नृपतिसुताय प्रादात् ।

अथ संप्राप्तकान्तासमागमो राजपुत्रो वल्लभया सुहृदा च समं मुनिं यमुनां च समामन्त्र्य शुभे मुहूर्ते प्रातिष्ठत । कञ्चिदध्वानं गत्वा उदधेस्तीरं समागत्य वाणिज्यार्थं गमनागमनं कुर्वाणं प्रतीक्षमाणोऽतिष्ठत् । अल्पेनैव कालेन कस्यचिद् वणिजः प्रवहणं तत्र तीरभूमिं समागतम् । तेन भूपसुतेन प्रार्थितः स वणिक् तान् प्रवहणेनेष्टं स्थलं नेतुं तस्मै प्रतिश्रुतवान् । सुन्दरीसौन्दर्यलोभाकृष्टः स दुष्टवणिक् नावारूढमात्रायां तस्यां तावुभौ पश्चादपसार्य झटिति नावं सावेगं प्राचालयत् । आक्रोशन्तीं तां हृत्वा तस्मिन् अदृश्यतां याते स पृथ्वीपतिसुतः उन्मत्त इव चिरं व्यलपत् । प्रियाविप्रयोगाग्निना दह्यमाने

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न गृहं गृहिणीं विना !

(ले० विद्याभूषण श्रीगणेशरामशर्मा, साहित्यरत्नम , झालावाड़)

अद्य तावत् दीपावलीमहामहोत्सवः । नगरे लोकाः स्नातधौता नवनवाम्बराणि, अलङ्कारान्, पुष्पहारान्, सुगन्धद्रव्याणि च परिदधाना हर्षनिर्भरमानसाः सौत्सुक्यं सोत्साहं च सर्वतो यातायातं कुर्वाणास्तमिमं महोत्सवमुद्यापयितुं तन्मनस्कास्तद्गतप्राणा व्यस्तसमस्तचित्तवृत्तयश्च परिदृश्यन्ते ? विपणिषु, चत्वरेषु हट्टेषु, वीथीषु गृहेषु च यत्र तत्र सर्वत्र तमिमं राष्ट्रियं महामहोत्सवं सोत्साहं साडम्बरं च भाक्यन्तो जना आबालवृद्धं मोदमानाः शोभन्ते । गोमयमृत्पूर्वं सुधालिप्तेषु सुस्फीतशृङ्गारितेषु धवलामलवर्णेषु भवनेषु, हर्म्येष्वट्टालिकासु, गृहद्वारतोरणेषु, प्राङ्गणेषु, पण्यवीथिकासु, देवालयेषु तथा सार्वकारकार्यालयेषु सर्वत्राधुना प्रदोषसमये

तस्मिन् दिनेश्वरः अस्ताद्रिमारुह्य जलधेर्जलेऽपतत् । ततश्चन्द्रोदयपाण्डुरा रात्रिः कर्पूरहरिचन्दनैः संसक्ता वियोगिनीव बभौ । तां कान्तां शोचन् सुन्दरसेनः कौमुदीधवलत्विषि वनोद्देशे शोकसागरे विन्यस्त इवाभात् । शोकान्मूर्च्छामापन्नं तं विलोक्य तद्वयस्योऽपि विह्वलोऽतिकरुणं व्यलपत् ।

ततः प्रभाते संज्ञामासाद्य नरेन्द्रसूनुः वनाद्वनं भ्राम्यन् सारमेयरावगर्जितां लम्बमानबृहत्तूणीरां संसक्तवागुरां पुलिन्दपल्लीं व्यलोकयत् । प्रविष्टमात्रः स चापपाणिभिर्नैकैः शबरैः अभियातः । हतानेकशबरः स बद्धो दुर्गोपहाराय वयस्यसहितः कारागारं प्रवेशितः । तत्र प्रथममेव दृढैर्निगडैर्निगडितान् स्वान् सचिवान् वीक्ष्य स प्राह—"दिष्ट्या वयमस्मिन् व्यसने संगताः" इति । अपरेद्युः शबरास्तं शरव्रणाङ्कितकायं अपरैर्निगडितकरचरणैर्बन्दिभिः साकं चणिकालयमनयन् ।

अथ समागतः शबराधिपस्तं हन्तुं समुद्यतो मरणक्षणेऽपि निर्विकारं तं निर्वर्ण्य संजातप्रत्यभिज्ञः ससंभ्रमोऽभाषत—"हा धिक् ! एष मे स्वामिसुतः । राज्ञा महासेनेनाहम् आटविको राजा कृतः । तस्य पुत्रोऽयं सुन्दरसेनः" इत्युक्त्वा पादयोः प्रणिपत्य निगडसंन्यासम् अकारयत् । बद्धमुक्तान् तान् सर्वान् निजमन्दिरमनयत् । तेन सत्कृताः संपादितस्नानपानभोजनास्ते सर्वे सुखिनः कारिताः । शबरराजेन पृष्टः सुन्दरसेनः सर्वमात्मनो वृत्तान्तं तस्मै न्यवेदयत् ।

तेनादिष्टस्तत्सेनापतिर्नचिरात् समभ्येत्य बद्धाञ्जलिर्व्यजिज्ञपत्—"देवादेशाद्बहुधनो वणिक्सार्थोऽटवीमध्ये निरुद्धतत्पतिः संयम्यानीतः । सा कन्याऽपि समानीता यत्कान्त्या क्षीणोऽपि शशाङ्कः वर्धते इति । परस्परसंदर्शनेन तावुभौ सहसा शोकहर्षाभ्यां क्षणं निष्पन्दाविवातिष्ठताम् । शबराधिपेन पृष्टो दुष्टचेष्टितो वणिक् प्राह—"वञ्चितो राजपुत्रोऽसौ हृता च राजपुत्री । परं सत्यं वदामि असंशयं पावनेयम् । क्षम्यतां पापबुद्धिरयं जनः । **प्राप्नुवन्ति कथं नाथ परदाररताः सुखम्**" इति । "हन्यतामेष दुर्मतिः । अथवा निगडितकरचरणः श्वभिः खाद्यताम्" इति पुलिन्दराजे आदिष्टवति राजपुत्रोऽभाषत—"सखे, किमस्य वधेन । मुच्यतां जीवितसंकटादेषः । द्रव्यमेवास्य सकलं गृह्यताम् । यतः **"वणिजां द्रविणं प्राणाः शरीरं तृणमेव तत्"** इति ।

ततो राजपुत्रस्य वचनानुरोधात् स जीवन्मुक्तः सानुगो यथेष्टं स्थलं प्रायात् । विन्ध्यकेतुना शबराधिपेन निषधाधिपतये इमं प्रहर्षदं वृत्तान्तं कथयन् दूतो विसृष्टः । अपत्यप्राप्तिपीयूषनिर्भरां वार्तां समाकर्ण्य आनन्दसान्द्रमानसौ निषधाधिपहंसद्वीपाधिपौ सपरिवारौ पुलिन्दराजाधिष्ठितं वनमध्यं संप्राप्तौ । परस्परदर्शनेन सकलास्ते प्रहर्षस्य परां काष्ठां प्राप्ताः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रज्वालिता दीपमालापङ्क्तयः स्वर्णमयं स्फुरत्प्रभाभास्वरं दिव्यालोकप्रकाशं विकिरन्त्यो विराजन्ते ।

तमिमं महोत्सवं सम्भावयता मयापि चाद्य सर्वदिनापेक्षयाधिकशीघ्रतरं प्रत्यूष एव शय्यां त्यक्त्वा शौचस्नानादिका नित्यक्रिया निर्वर्त्य, सन्ध्यामुपास्य निखिलमपि दिनं सुहृन्मित्रगोष्ठीषु तैस्तैर्वार्तालापविनोदैर्मिष्टान्नपानभोजनैरितस्ततो भ्रमणैर्गृहकार्यसाधनैश्च महतानन्देन समतिवाहितम् ।

अथ सायं रजनीमुखे, स्वगृहे दीपमालिकां प्रज्वाल्य, देवदर्शनानि विधाय, नगरे दीपावलीं परिपश्यता मया यथारुचि यत्र तत्र पर्यटितम् । ततः पुनर्गृहमागत्य किलेन्द्रादिदेवान् गणेशाम्बिकां भगवतीं महाकालीमहालक्ष्मीमहासरस्वतीरूपां त्रिगुणां दुर्गादेवीं चाराधयम् । देवतानां प्रसादं गृहीत्वा तदर्पितशेषं सुगन्धद्रव्यं पुष्पमालादिकं च 'यथा देवे तथा देहे' इत्यात्मनः परितोषाय सर्वमङ्गीकृतम् । एवं प्रकुर्वतो मे निशीथप्रायः समयो व्यतीयाय । अधुनाहं स्वभवनस्य मार्गाभिमुखं गवाक्षमध्यासीनो विश्राममनुभवन् ताम्बूलवीटिकां चर्वयन् यावद्बहिः सुदूरं दृक्पातं करोमि तावन्नगरनिवासिनीनां सद्गृहस्थरमणीनां वस्त्रालङ्कारशृङ्गारशोभासुन्दरीणां मङ्गलगीतिका गायन्तीनां वस्त्राञ्चलैः स्थालीषु प्रज्वलन्तीर्दीपावलीर्वाताघातेभ्यः प्रयत्नात् संरक्षन्तीनां, हर्षोत्साहपूर्वकं परस्परं निगूढव्यङ्ग्यकटाक्षैः परिहासविनोदवचनान्यालपन्तीनां मदोत्कर्षान्मत्तगजगामिनीनां पुनः स्त्रीविरहितान् विधुरानाजन्मकुमारानभिबीक्ष्य साक्षेपमिव मन्दं मन्दं हसन्तीनां रथ्यासु व्रजन्तीनां युवतीनां यूथान्यपश्यम् । निर्गतेषु तेषु ललनारत्नयूथेषु यावदन्तर्गृहं दृष्टिं व्यापारयामि तावन्मया प्रज्वालिता दीपका उन्निद्राणा इवावलोकिताः । दीपवर्तिकानां भूयः संस्करणे किमपि मन्दोत्साहमिवाभून्मे मनः । अन्तर्मुखतामभजन्ममाशेषाश्चित्तवृत्तयः । यावदात्म गतमन्तःकरणे किमपि चिन्तयामि तावन्मे मनसि सहसोद्वेगलवलेशइव, खेदखिन्नतेवाशांतिरिव निर्वेद इवाभाव इवाविर्बभूव । नाहं तत्वतस्तथ्यतश्चाज्ञासिषं किमिति मे हृदयमिदानीमाकुलतामनुभवति, दीर्घमुष्णं च निःश्वसितीति । मया क्षणमेकं चिन्तितम्—'अहं स्वस्थोऽस्मि, प्रसन्नोऽस्मि, भुक्तभोगोऽस्मि, न मे किमप्यपहीयतेऽन्ततस्तथाप्यधुना किमर्थं मम मनश्चाञ्चल्यमञ्चति ? किं कारणात् तदिदं मे मानसं निर्वृतिं नैति ?? किमर्थं चैतन्ममान्तःकरणमिदानीं बाल इव विमनायते ??? घण्टाद्वयपर्यन्तमित्थं सङ्कल्पविकल्पपूर्वकं बहु चिन्तयतो मम चिन्ताहेतुः प्रत्यक्षमभूत्—'अये, ज्ञातम् ! अद्य तावन्मे जीवनसहचरी श्रीमती गृहिणी देवी नात्र मया साकं विराजते । तदेव नूनं कारणं मम मानसोद्वेगस्यान्यमनस्कतायाश्च । ज्ञातं भोः । श्रीमती गृहदेवी तावद्दिवसेष्वेषु पितृगृहं जगामातो हि मे मनः प्रज्वलत्स्वपि दीपसहस्रेषु खेदखिन्नमिवान्तर्हृदि प्रगाढान्धकारमिवानुभवद्व्याकुलं क्षोभूयमानं वर्ततेऽधुना ! सत्यं, सत्यं भोः । 'न गृहं गृहिणीं विना' इति निस्संशयमेव सत्यम् ।'

तदस्य मानसोद्वेगस्य जातेऽपि हि निदाने नास्य किमप्यौषधं ममाधीनम् । स्वमनः समाधातुमहं बहुयत्नमकरवम् । गृहिणीमेवान्तर्दृशा पश्यता मया तस्या मंगलं कामयानेनास्मिन् पुण्यपर्वणि निशीथे किं कर्तव्यमिति सोहापोहं तर्कवितर्कावर्ते भ्रमतान्ते तदर्थं भगवती महामाया विष्णुप्रिया लक्ष्मीदेवी प्रार्थितेत्थमुपांशु—

"हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥१॥

इत्थं चेष्टमानोऽप्यहं कथमपि मनः समाधातुं न प्राभवम् । गृहिणीदेव्याः सर्वे गुणा एकैकशो मन्मानसे भावचित्रपटे साक्षादिवाविर्भूय मां विलोभयितुमिवारभन्त । 'कथं सा मम साहित्य-सेवा-समये मूर्तिमती प्रेरणेव मे भावोन्मादं जनयतिस्म । कथं सा ललितमधुरैर्नर्मालापैर्मनो मे विनोदयन्ती प्रसङ्गानुसारं शृङ्गारहास्यरसरसश्रियमाविष्कृत्य मम श्रमापनोदाय सटिप्पणं व्यङ्ग्यकटाक्षच्छटाचमत्कारैराह्लादायति स्म । किं बहुना, सा तपस्विनी समग्रामपि मे दिनचर्यापद्धतिं छायेवानुवर्तनपरापि स्वकीयं शारीरं क्लेशश्रमक्लान्तिखेदमगणयन्ती गार्हस्थ्यजीवनसङ्घर्षे ममाग्रतः प्रगतिशीलं दृष्टिकोणं स्थापयति स्म । कथं सा मयि कार्यालयाद् गृहं समागते द्वारदेशे सोत्कण्ठं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मामेव प्रतीक्षमाणा मत्स्वागताचरणाय तत्परा समन्दस्मितं प्रत्युद्गम्य मामाह्वयतीव प्रमोदमानमनसा कमपि लोकातिशायिनमानन्दमनुभवति स्मेत्यादयो गुणास्तस्या मम कल्पनायां प्रास्फुरन्। सामान्यतो नित्यमेव हि गृहमेधीयकर्मसु व्यापृतायास्तस्याः स्फूर्तिलाघवादिनैपुण्यं श्रमशीलताप्रभृतीन् गुणान् तस्याः संयोगे यानहमजानानोऽभवं ते सर्वेऽधुना स्वानुभवाद्यथार्थतः स्वयंसिद्धा इव प्रत्यक्षमजायन्त। एवं कुर्वतोऽपि मे यदा मनो न कथमपि धृतिमधत्त तदा 'किं क्रियतामिदानीम्?' इति क्लिश्यन्नहं निद्राविरहितो जागरखिन्नो गृहिण्या महत्त्वं तत्प्रीतिप्रवणतां, तत्त्यागं, तपो, रमणीरत्नसुलभांस्तांस्तानशेषान् विशेषान् हृदि स्मरन् 'गृहिणीदेवीमेवाधिकृत्य किमपि लिखेयम्।' इति कृतमतिस्तमिमं लेखं लिखितुं प्रावर्ते। 'गृहिणीं गृहमित्याहुर्न गृहं गृहिणीं विना।' इति प्राचामुक्तिमेव शीर्षकं परिकल्प्य लिखितुमुपाक्रमे। अस्तु।

मन्ये, गृहिणीं विना गृहस्थोऽर्द्धाङ्गविकल इव भवति। गृहिणीं विना पक्षाघातहतस्यातुरस्येव पुंसो बतोत्साहः सामर्थ्यमुद्योगपरायणता, आनन्दानुभूतिः, स्फूर्तिः सर्वमपि जडीभूतमिवोपजायते। गृहिणीं विना गृहस्य कल्पनामात्रमपि पुरुषमस्वस्थं विधत्ते। अप्येतावदपि गृहसाम्राज्ञ्या महत्तां न्यूनाधिकं बोधयितुं नालम्? गृहराज्ञीं विना गृहराजस्य स्थितिं वर्णयता गुर्जरभाषायाः सुप्रसिद्धेन लेखकेन श्रीरामनारायणपाठकमहाभागेनोक्तम्:—

"पुरुषेण किं कर्तव्यं किं वा न कर्तव्यम्? स्नानं न कर्तव्यम्। उष्णजलं विनैव निर्वाहो विधेयः? चायपानं न कर्तव्यं? किं वा निकृष्टं चायपानं विधातव्यम्? अपि क्वचिद्भोजनालयं गत्वा भोक्तव्यम्? केशविन्यासो न कर्तव्यः किम्? नौकरीकार्यालये नियतसमयेन गन्तव्यम्? अपि रात्रौ दीपो न प्रज्वाल्यः? रजन्यां जागरणं कृत्वा किं दिवा तन्द्रिलेन भाव्यम्?? किं च कर्तव्यं किं वा न कर्तव्यम्???"

अनेनास्माकं गृहदेव्या महत्त्वस्य विचारो भवितुमर्हति। ततो हि 'गृहिणी गृहमित्याहुः।' यदि समन्ततः परिदृश्यमानेषु गृहेषु तत्प्राणरूपिणी गृहिण्येव न भवेत्तदा का दशा स्यात्? गृहस्यास्तित्वे विद्यमानेऽपि सति न तद् यथार्थतो गृहमुच्यते। गृहस्य प्राणा गृहिण्येव। यतो गृहस्य चारुता, सुपरिष्कृतिः, समृद्धिः, सिद्धिरित्यादिकं सर्वमपि गृहिण्याः कार्यकौशले तस्याश्च व्यवहारनैपुण्यामेवावलम्बमानं भवति। एतस्य कौशलस्य, निपुणतायाश्च पात्रं प्रामाणिकत्वेन गृहिण्येव प्रसिद्ध्यति। अस्य तथ्यस्य पूर्णा प्रतीतिर्गृहिणीविरहितेन गृहेणैव सरलतयाप्तुं शक्यते।

गृहिणीशून्यं गृहं धर्मशालास्वरूपासादने न मनागपि विलम्बते। तदा गृहे यत्र तत्राव्यवस्थाऽस्वच्छता च दृष्टिगोचरतां यायादेव। साकमनेनोपेक्षाभावो ह्यालस्यं तथा तज्जन्यं तमश्चापि दृष्टिपथं गच्छेदेव। एतत् सर्वं पुरुषस्य निर्बलताया वाऽपात्रत्वस्य चावश्यमेव निन्दां परीवादं च कुर्यात्।

गृहिण्या दीर्घकालीनाद्वाल्पकालीनाद्वा गृहत्यागात् अन्येद्युः प्रत्यूषे शय्यां त्यक्त्वा पुरुषः सर्वादावित्थं सङ्कल्पविकल्पान् कुर्वन् संचिन्तयति—'किमहं स्नायां न वा स्नायाम्? यदि च स्नायां, तर्हि केन जलेन? शीतेनोताहोस्विदुष्णेन?' यदि च तन्मनसे न रोचेत तदा श्रीमान् गृहपतिः स्नानस्य विचारमेवापजह्यात्। अथवा येन केन प्रकारेण यथा तथा शीतं जलं शिरसि कथमप्यपक्षिपेन्नाम। परंतत्र चाय-पानस्य जटिलः प्रश्नो नूनं मुखं व्यादायोपतिष्ठेत। अगत्या फूत्कारपूर्वकमाध्मायाध्माय मृच्चुल्लीं यन्त्रचुल्लीं (Stove) वा वारद्वयं त्रिवारं वा सभ्रपभ्रपाशब्दं महता श्रमेण काठिन्येन च कथमपि प्रज्वालयेत्। चुल्लीज्वलनं प्रतीक्षमाणः श्रीमान् पतिदेवः पुंस्त्वाभिमानी तत्क्षणे नूनं दर्शनीयश्चित्रणीयाकृतिश्च भवति। इत्थं बहु परिश्रम्य महता विलम्बेन कष्टेन च कथमपि निकृष्टतरं चायपानं यद्वा तद्वा साधयेद् बत श्रीमान् पुरुषसिंहः। नैत्यिकं चायपानं तु ननु कथं नाम तदभ्यासकौशलमासादयेत्? सत्यपीदमित्थमेकेनाद्भुतेन विजयोन्मादमदेन स्वाक्षिणी निमील्य वैद्यप्रदत्तं च क्वाथमिव तदिदं चायपानं सगटगटाशब्दं गलाधः कुर्यान्ननु पतिपदवाच्यो जीवः।

हा, हन्त! यदा गृहिणीदेवी गृहादनुपस्थिता भवति तदानीं पुरुषोत्तमस्यापि दीना दशात्रैकस्यानुचरस्येव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदान्तदर्शनस्य वासनाभाष्यम्

ले० श्रीमल्लिनाथशर्मा चौमालः, चूरू (राजस्थान)

भगवता बादरायण-आचार्येण देवयानप्रतिपादकानाम् अनेकासाम् श्रुतीनां समन्वयार्थं कतिपयानि सूत्राणि रचितानि। बादरायण-आचार्येण सर्वासां श्रुतीनाम् समन्वयं कृत्वा एक एव मार्गो निश्चितः, परन्तु तन्न, यतः अनेकेषां ऋषि-मुनीनाम् यत्र तत्र स्थाने स्थितानां लोकानां च, एकस्मिन्नेव मार्गे प्रयुक्तानां समन्वयो न भवितुमर्हति। यथा लक्ष्यं कलकत्तानगरं, तत्र गन्तव्यानां नानास्थानस्थितानां लक्ष्यन्तु एकमेव भवति, परन्तु मार्गा भिन्नाभिन्ना भवन्ति। यथा बम्बई नगरात् कलकत्तानगरं प्रति नीयमाने मार्गे नागपुर, बिलासपुर, रायपुर, टाटानगर-आदि नगराणि सन्ति। एवं बीकानेरनगरात् कलकत्तानगरं प्रति नीयमाने मार्गे दिल्ली, हाथरस, अलीगढ़, कानपुर, इलाहाबाद, गया, आसनसोल, बर्दवान आदि नगराणि आयान्ति। एवं हरिद्वारात् कलकत्तानगरं प्रति नीयमाने अन्यानि नगराणि आयान्ति। लक्ष्यन्तु कलकत्तानगरं परन्तु मार्गाणां मध्ये भिन्न २ नगराणि सन्ति। अतः तेषां एकस्मिन् मार्गे प्रयोगः सम्यग् न। यतः बम्बईनगरात् कलकतानगरं प्रति सरलमार्गेण, गमनेन तत्र दिल्लीआदिनगराणां नियुक्तिः कथमपि युक्तियुक्ता न भवति। एवमेव भिन्न २ स्थानेभ्यो देवयान-मार्गविषयकोनुभवः भिन्न २ एव। अतः बादरायणाचार्यस्य न युक्तियुक्तः देवयानमार्गस्य निर्णयः।

देवयानमार्गस्य निर्णयार्थं "वायुमब्दादविशेषविशेषाभ्याम्" इति प्रथमम् सूत्रं रचितम्। अत्र छान्दोग्योपनिषद्स्थितायां श्रुतौ स्थितस्य सम्वत्सर-

---

भवति। तस्य च सास्वस्थता यदा श्रीमती गृहिणीदेवी प्रतिनिवर्तते तदैवोपशाम्यति। परन्तु यावत् सा नो निवर्तते तावत्पर्यन्तं तु पुरुषेणात्मनः शरीरे स्वास्थ्यसम्पत्तौ च निरन्तरं पतन्तो बहवो हि वज्रपातप्रहाराः सतूष्णीभावं सोढव्या एव भवन्ति, यतस्तेन गृहाद्बहिः क्वचिद्भोजनालये भोक्तव्यं भवेत्। तामिमां कठोरां स्वास्थ्यपरीक्षणपद्धतिमनुसरतो गृहपतेः सहनशीलतायाः परा हि काष्ठा परिणमति। अथ मध्याह्ने भोजनोत्तरं सः स्वकार्यालयं प्रतियायात्; यदा कार्यालयगमनस्य नियतवेलानुपालनं सम्पन्नं तदा तु शोभनं, नो चेत् विलम्बजन्यः परिणामोऽपि च तेनैव सह्यः स्यात्। सायं कार्यश्रमाद्भृशं क्लान्तः परिक्लिष्टश्च गृहपतिः पुरुषर्षभो गृहं प्रतिनिवर्तेत। यदि तदानीं बुभुक्षापबाधेत तदा पुनर्भोजनालयं गत्वा तत्र भुक्त्वा वा परावर्तेत। अथान्धकारे प्रसृते दीपकं प्रज्वाल्य शय्यां प्रति स्वामिनो बतासक्तिं परित्यज्य तत्कालमेवारामवेत्रासनमाश्रित्य तन्निषीद्य च स्वनेत्रे निमीलयेदेवेति ध्रुवमव्यभिचारि सत्यम्।

यदि चैवंविधे कठिने, परिक्लिष्टे, कष्टमये च समये गृहसम्राजः शिरसि बतातिथयः समापतेयुस्तदा किं स्यादिति तु कोऽपि भक्तभोग एव हि ज्ञातुं पारयेत्। जाते चातिथिदमने गृहपतेः स्थितिर्नूनं किं कर्तव्यविमूढा भाविनी। यदि च कोऽपि सुहृज्जनो वा स्नेहीजनो वाऽऽपतति तदा? स खलु रूक्षमेव सत्कारमाप्नुयात्। इत्थंविधायां विचित्रायां परिस्थितौ पुरुषस्य मनस्येक एव प्रश्नः समुद्भवति,—'किं वा कुर्याम् किं वा न कुर्याम्?' तदानीं यदि सः साङ्गोपाङ्गं सर्वमेवातिथ्यं सम्पादयितुमिच्छां सेवेत तदा सा तत्कृतेऽशक्यैव परिणमेदन्ततः। यदि च पुनः सः सर्वं न कुर्यात्तदा न्यूनाधिकं वा शान्त्या बत कथं नाम जीवेत्? परिणामतो गीतोक्तस्य स्थितप्रज्ञस्य भङ्ग्या सोऽर्धमाचरति कर्मणार्द्धं च संन्यसति। तस्मादेव केनचित् भुक्तभोगेन पुरुषर्षभेण स्थाने खलु प्रोक्तम्—'न गृहं गृहिणीं विना।' इति। अत्र पुनरिह प्रसङ्गोपात्तमेकं पद्यमपि मे स्मृतिपथमवतरतिः—

★

"न स्नानं न च भोजनं न पठनं नान्यत्र सौख्यं धृतिर्नान्यस्त्रीजनसेवनं न च कथा निद्रा विलासोद्यमः।
किन्तु त्वां परिचिन्तयामि सततं ध्यानेन सद्मस्थितां,
स्वप्नालोकनकामकेलिविधिना जीवामि कान्ते! तव।१"

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दस्य अर्थः अब्दः (वर्ष) कालवाचकः कृतः, परन्तु आचार्यस्य एष सिद्धान्तोपि युक्तियुक्तो न, यतः वैदिक-वाङ्मयार्णवे सम्वत्सरशब्दस्य अर्थः कालवाचको न गृहीतः। तत्र सम्वत्सरशब्देन प्रजापतिः ब्रह्मा एव गृहीतो दृश्यते। यथा 'सम्वत्सरः प्रजापतिः' तैत्तिरीयसंहिता ७-२-१०-३ "सम्वत्सरः प्रजापतिः" ऐ० ब्रा० २-१७ तथा ४।२२ शतपथ-ब्राह्मणः ११।३।१।१। अत्र सम्वत्सरशब्देन प्रजापतिः ब्रह्मा एव गृहीतः प्रतिभाति। तथा वेदेपि ऋतं च सत्यं चाभिद्धात्तपसोध्यजायत, ततो रात्र्यजायत, ततः समुद्रो अर्णवः, समुद्रादर्णवादधि सम्वत्सरो अजायत (ऋ ८।८।४८) अत्र समुद्रात् अनन्तरं सम्वत्सरस्य उत्पत्तिर्लिखिता। अस्य एव वैदिकसिद्धान्तस्य स्पष्टीकरणं श्रीमद्भागवते तृतीये स्कन्धे अध्याये अष्टमे कृतं यथा—

उदाप्लुतं विश्वमिदं तदाऽऽसीद्
यन्निद्रया मीलितदृङ् न्यमीलयत्।
अहीन्द्रतल्पेऽधिशयान एकः
कृतक्षणः स्वात्मरतौ निरीहः॥
(श्रीभा० ३।८।१०)

अत्र ऋग्वेदस्थितस्य समुद्रोऽर्णवः इत्यस्य अर्थः श्रीमद्भागवते उदाप्लुतं विश्वमिदं तदाऽऽसीद् इत्यर्थः कृतः। तथा "समुद्रादर्णवादधि सम्वत्सरो अजायत" इत्यस्य ऋग्वेदे स्थितस्य मन्त्रस्य अर्थः श्रीमद्भागवते

तल्लोकपद्मं स उ एव विष्णुः
प्रावीविशत्सर्वगुणावभासम्।
तस्मिन् स्वयं वेदमयो विधाता
स्वयम्भुवं यं स्म वदन्ति सोऽभूत्॥
(श्रीभा० ३।८।१५)

अत्र समुद्रात् अनन्तरं ब्रह्मणः उत्पत्तिर्लिखिता। एषः एव वैदिकः सिद्धान्तः। अतः "तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्य्यमाणपक्षमापूर्य्यमाणपक्षाद् यान् षड्डदङ्ङेति मासांस्तान्।१। मासेभ्यः संवत्सरं, संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत् पुरुषोऽमानवः, स एनान् ब्रह्म गमयत्येष देवयानः पन्थाः" (छा० ५।१०।२) इति छान्दोग्योपनिषद् श्रुतौ प्रतिपादितः संवत्सरशब्दः एवमेव ब्रह्मवाचकोऽस्ति। परन्तु बादरायण आचार्येण कालवाचको गृहीतःअब्दशब्देन ज्ञायते। परन्तु अत्र संवत्सरशब्देन अब्दः कालवाचकः शब्दो गृहीतव्यः। किन्तु प्रजापति (ब्रह्मा) वाचकः एव ग्रहीतव्यः। छान्दोग्योपनिषत्कर्तुः ऋषेः अनुभवानुसारं "ते य एवमेतद् विदुर्ये चामी अरण्ये श्रद्धां सत्यमुपासते तेऽर्चिरभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्य्यमाणपक्षमापूर्य्यमाणपक्षाद् यान् षण्मासानुदङ्ङादित्य एति, मासेभ्यो देवलोकं देवलोकादादित्यम्" (बृ० ६।२।१५)। अनेन ऋषिणा यस्मात् स्थानात् देवयानमार्गस्य अनुभवः कृतः तस्मात् स्थानात् मासेभ्योऽनन्तरं देवलोकः आयाति-"यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति, तस्मै तत्र विजिहीते यथा रथचक्रस्य खं, तेन स ऊर्ध्वमाक्रमते" (बृ० ५।१०।१)। अनेन ऋषिणा यस्मात् स्थानात् देवयानमार्गस्य अनुभवः कृतः तत्र वायुलोकोपि दृष्टः तथा च "स एतं देवयानं पन्थानमापद्याऽग्निलोकमार्चिषमागच्छति, स वायुलोकं स आदित्यलोकं स वरुणलोकं स इन्द्रलोकं 'स' प्रजापतिलोकं स ब्रह्मलोकम्" (कौ० १।३)। अत्र अस्याःश्रुतेः लेखकस्य ऋषेः अनुभवे श्रुतिलिखित लोकानां देवयानमार्गे स्थितिः दृश्यते। अतः अस्य अनेन ऋषिणा यस्मात् स्थानात् देवयानमार्गस्य अनुभवः कृतः, तत्र अग्निलोकं वायुलोकम् आदित्यलोकं वरुणलोकम् इन्द्रलोकं, अन्ते ब्रह्मलोकं अन्ते ब्रह्म च निर्दिष्टम्। अतः ज्ञायते लक्ष्यन्तु ब्रह्मलोक एव। परन्तु भिन्न २ स्थानेभ्यः मार्गा भिन्ना २ एव। अतः मार्गाणां एकीकरणं न शक्यते।

अत्र बृहदारण्यकश्रुतौ (५।१०।१) वायुलोकस्य बृहदारण्यके इव ६।२।२५ श्रुतौ देवलोको निर्दिष्टः। अतः देवलोकः वायुलोकरूप एव। देवलोकेन ब्रह्मणः ग्रहणेऽपि दोषो नाऽस्ति। अतः "वायुमब्दादविशेषविशेषाभ्याम्" इति सूत्रं विचारणीयं प्रत्याख्यातव्यमेव।

अथ "तडितोधिवरुणः सम्बन्धात्" इति सूत्रस्य विचारः। छान्दोग्यश्रुतौ चन्द्रमसो विद्युतं इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्व० श्रीनन्दलालजी भुवालकाश्रेष्ठिप्रवरेण विहितानि सार्वजनिककार्याणि

(१) रतनगढ़ (राजस्थानम्) नगरे श्रेष्ठि-रामविलासभुवालका महोदयस्य महिला—चिकित्सालयः—

यतो हि नासीत् रतनगढ़नगरस्य इतस्ततः कुत्रापि बालानां स्त्रीणां च चिकित्सासुव्यवस्था अतः निर्मितः उपर्युक्तः चिकित्सालयः। साम्प्रतं चास्मिन् चिकित्सालये पंचनदपर्यन्तात् रुग्णाः समायान्ति । उद्घाटनं चास्य कृतं डा० कैलाशनाथकाटजूमहाभागेन ।

(२) श्रीमती जड़ियादेवी भुवालका अतिथिभवनम्:—

निर्मितो यदा चिकित्सालयः तदा जातानुभूतिः भुवालकाश्रेष्ठिप्रवरस्य यत् रुग्णेन सह समायान्ति ये परिचर्यार्थम् नास्ति, तेषां निवासाय समुचितं स्थानम् । कश्चित् तिष्ठति धर्मशालायां कश्चित् इतस्तत आश्रयार्थमवलोकयति। तदा श्रीरघुनाथहिन्दूजन–सेवा–ट्रस्टान्तर्गतमेव निर्मितमिदं भवनम् । सोद्यानेऽस्मिन् भवने प्रकाशनिवासजलादीनां समुचितः सर्वविधः प्रबन्धः ।

(३) उपर्युक्तातिथिभवनस्य पृष्ठत एव प्रतिष्ठितानां सज्जनानां राज्याधिकारिणां च कृते निर्मितमेकमाधुनिकभवनप्रसाधनप्रसाधितं भवनम् (कोठी) इत्थमेकाऽन्या महती आवश्यकता नागरिकाणां पूरिता श्रेष्ठिप्रवरैः।

(४) 'रतनगढ़ चेरिटेबल सोसाइटी' नाम्नी संस्थास्ति रतनगढ़े। अस्याः प्रधानं कार्यालयं कलिकाता नगर्यां विद्यते । संस्थायामस्यामन्तर्गतं विविधानां संस्थानां, याषां विवरणं निम्नाङ्कितमस्ति, भवति संचालनम् । अस्याः सोसाइट्या आसीत् श्रेष्ठिप्रवरः ट्रस्टी प्रमुखः कार्यकर्ता च ।



श्री नन्दकुमारजी भुवालका

(१) श्री रघुनाथविद्यालयः

विद्यालयस्यास्य हाईस्कूलतः मल्टीपरपजप्रकारे (स्कीम) परिणतौ प्रमुखाः श्रेयभागिनः भुवालिकामहाभागाः। एषां प्रयत्नैरेव श्री मोहनलालजी जालाणः (फर्म सूरजमल नागरमल) समुद्यतः नूतनं भवनं निर्मातुम् ।

(२) रतनगढ़े पिंजरापोलम् ।

(३) सहायक समिति औषधालयः ।

(४) टीबड़ेवालाभवनम् यदस्ति वस्तुभण्डारम् ।

लिखितम् । तस्य सूत्रकारेण कौषीतकिश्रुतिप्रतिपादितस्य वरुणलोकस्य निवेशः विद्युत्लोकात् अनन्तरं निर्दिष्टः। परन्तु अत्र तडित्-लोकस्य वरुणलोकस्य च कीदृशोऽपि सम्बन्धो न, यतः विद्युत्लोकः वरुणलोकश्च पृथक् पृथक् पिण्डविशेषः तारात्मकलोकाः सन्ति। तत्र तस्य निवेशः कथमपि न युक्तः, अतः एतत् सूत्रमपि चिन्त्यमेव । क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपर्युक्तायाः चेरीटेबलसोसाइट्याः कृते लक्षाधिकानि रुप्यकाणि एकत्रीकृतानि दाने ।

(२) रतननगरम् (राजस्थानम्)

ग्रामोयं रतनगढ़तः ११ क्रोशदूरं वर्तते । श्री भुवालकामहाभागानां अतीव श्रद्धासीत् रुग्णानां कृते । अत एव यत्र कुत्रापि विलोकयन्ति स्म कष्टप्रदं वातावरणं ते विदधति स्म तनुमनोधनतः सेवाकार्यम् । अत्रापि निर्मितः चिकित्सालयः । उद्घाटनसमारोहेऽस्य चिकित्सालयस्य रुग्णावस्थायामपि भुवालकामहाभागाः समायाताः वाराणसीतः इति तेषां कर्तव्यपरायणता निष्ठा च । अथ च ग्रामवासिनां सौकर्यार्थं विवाहादिष्ववसरेषु अस्य मित्रमण्डलस्य संरक्षकः श्री शिवकुमारभुवालकामहोदयो वर्तते ।

(३) स्व० भुवालकामहाभागः फतेहपुर (राजस्थान) कालेजट्रस्टस्यासीत् ट्रस्टी ।

(५) वाराणस्याम् (उ० प्र०)

(१) हिन्दूसेवासदनम् (काशी)

स्व० भुवालकामहाशयाः आधारस्तम्भमिवासन्नस्य साम्प्रतं संस्थेयं सुचारुरूपेण वर्तते । श्रीमानमल भुवालकामहाशयः (सुपुत्र श्री नन्दलालभुवालका) अस्य ट्रस्टी ।

(२) काशी मुमुक्षुभवनसभा

अस्याः सभायाः भवनं अस्सीस्थाने विद्यते । मोक्षेच्छुकाः मानवाः बहवः दण्डिस्वामिनश्च निवसन्त्यस्याम् ।

(३) काशी विश्वविद्यालये बहुसुन्दरस्य २५६ फी० उन्नतस्य विश्वनाथस्य मन्दिरस्य निर्माणकार्यं प्रचलितम् । निर्माणकार्ये एककोटिरूप्यकाणां व्ययो भविष्यति ।

श्री शिवकुमारजी भुवालका

कलिकातानगर्याम्

अस्यां नगर्यां विशालाभिः संस्थाभिः सहासीत् सम्बन्धो भुवालकामहाभागानाम् । मुक्तामाणिक्यादीनां सुप्रसिद्धाः परीक्षकाः बहूनां ट्रस्टानां सदस्याश्चासन् ते । विधवानां निर्धनानां च विशेषतः साहाय्यकरा इमे महाभागाः संस्कृतस्य संस्कृतेश्च पोषका अभूवन् । "भारती" पत्रिका एषां विशेषस्नेहभागिनी आसीत् ।

★

संस्कृतसमाचारः— राजस्थानसंस्कृतसाहित्यसम्मेलनम्

अष्टममेतस्याऽधिवेशनं भीलवाडानगरे १३-१४-१५ फर्वरीतारिकासु ससमारोहं भवेत् । उद्घाटनमस्य केन्द्रीयगृहमन्त्री बलवन्तनागेशदातारमहोदयः कुर्यात् । शिक्षामन्त्री डा० श्रीमालिमहाभागेपि समागच्छेत् । मुख्यमन्त्री श्रीसुखाडिया -महाभागः संस्कृतमन्त्रणामण्डलस्योद्घाटनं कुर्यात् । भारतस्य सर्वेभ्योऽपि प्रान्तेभ्यः संस्कृतपण्डिताः समागच्छेयुः । पूर्णश्चोत्साहः स्वागतसमितेः । अवश्यावश्यं राजस्थानीयाः संस्कृतसेविनः संमेलनेऽस्मिन् प्रचुरसंख्यायां समवेता भवेयुरिति सर्वेप्याशासते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदस्य सर्वविद्यानिधानत्त्वम्

यः कश्चिदपि मुक्तरक्तशर्म्मा–आङ्गिरसो भारद्वाजः–जयपत्तनाभिजनः

वाचं देवा उपजीवन्ति विश्वे वाचं
गन्धर्वाः पशवो मनुष्याः ।
वाचीमा विश्वा भुवनान्यर्पिता सा
नो हवं जुषतामिन्द्रपत्नी ॥१॥

वागक्षरं प्रथमजा ऋतस्य वेदानां
माताऽऽमृतस्य नाभिः ।
सा नो जुषाणोपयज्ञमागादवन्ती
देवी सुहवा मेऽस्तु ॥ २ ॥

प्राक्कर्म्मोदयतो हि यस्य मिथिलादेशे शरीरोदयः ।
श्रीविश्वेशदयोदयाच्च समभूत् काश्यां सुविद्योदयः
राज्ञा प्रीत्युदयादभूज्जयपुरे सम्पत्तिभाग्योदयः
सिद्धस्तन्मधुसूदनाय गुरवे नित्यं प्रणामोदयः ॥३॥

सर्वान् सावयवाञ्छब्दान् वक्तुं वा लेखितुं तथा ।
यया सर्वो जनः शक्तस्तां भाषां संस्कृतां नुमः ॥४॥

ओष्ठापिधाना नकुली दन्तैः परिवृता पविः ।
सर्वस्यै वाच ईशाना चारु मामिह वादयेत् ॥५॥

नूनमेष महान् महोत्सवो यदद्य विविधभाषाभिज्ञाः सर्वैरप्यार्य्यजनैर्व्यवह्रियमाणानां सर्वासां भाषणां मूलभूतायास्तत्रभवत्या गीर्वाणभाषाया अभ्युदयायाजस्रं प्रयतमानास्तत्रभवन्तो भवन्तः सभ्या अदभ्या बुभूषन्त सुशोभन्ते । तदत्र महामाङ्गलिकेऽस्मिन्नवसरे धर्म्मक्षेत्रात्मके पुण्यतमे कुरुक्षेत्रे सर्वतन्त्रस्वतन्त्रप्रज्ञभारतराष्ट्रस्य राष्ट्रपतिपदे राजेन्द्र इव प्रतिष्ठितानां 'प्राच्यसंस्कृतिनिष्ठ–महामहिम—राष्ट्रपति–श्री राजेन्द्रप्रसाद महाभागानामध्यक्षत्वे राष्ट्रीयमूलसंस्कृतिरूपस्य संस्कृतवाङ्मयस्य प्राणप्रतिष्ठार्थं समुपस्थितानां नीरक्षीरविवेकविचक्षणानां तत्रभवतां भवतां समक्षे किञ्चिद्वक्तुमुपक्रमे ।

साम्प्रतं हि राष्ट्रीयप्रजा सर्वतन्त्रस्वातन्त्र्यसुखमनुभूयमाना स्वच्छन्दरूपेण विहरति राष्ट्रप्राणेऽस्मिन् भारताग्निप्रधाने भारतवर्षे । अवश्यमेव सञ्जातानि भारतीयराष्ट्रमानवस्य चान्द्रभावप्रधानानि मनस्तन्त्राण्यपि सर्वथैव स्वतन्त्राणि, पार्थिवभावप्रधानानि शरीरतन्त्राण्यपि च ! किन्तु सौरभावानुगतानि धर्म्म–ज्ञान–वैराग्य–ऐश्वर्य्य–भेदेन चतुर्द्धा विभक्तानि विद्याबुद्धितन्त्राणि, एवं परमेष्ठिगर्भित-अव्यक्त-स्वयम्भु-प्रजापतिभावनिबन्धनानि आत्मतन्त्राणि तु अद्यावधि–अपि–एकान्ततः 'पर'तन्त्रानुगत–प्रतीच्यशिक्षा–संस्कृति–सभ्यता–आचार–व्यवहारादिनिबन्धनेन वारुणपाशबन्धनेन आबद्धानि परतन्त्राण्येवेति मुकुलितनयनैरेव तत्रभवद्भिर्भवद्भिराकलनीयमन्तर्जगति । आत्म–बुद्धि--तन्त्रस्वरूपविघातिका सर्वस्वसंहारिणी सैषा आत्मबुद्धिपरन्त्रता कथमभिभूता भवेदस्य राष्ट्रस्य, इति जिज्ञासायां गीर्वाणवाणी सुरभारती एवास्माकं पुरतः प्रस्फुटिता जायते ।

यतो ह्यस्ति संस्कृतभाषायामेव भारतराष्ट्रस्य मौलिकज्ञानकोशः सुप्रतिष्ठितः । तद् विज्ञानं तु संस्कृतभाषाधीनमेवेति न प्रच्छन्नं विदुषाम् । संस्कृतभाषाबोधविरहे स्वज्ञानकोशवञ्चिता वयं भारतीया असंस्कृताः, यथाजाताः प्राकृता एवेति नास्त्यत्र सन्देहलेशावसरः । भारतवर्षस्यास्य संस्कृति-सभ्यता-शिक्षा-ज्ञान-विज्ञान-शिल्प-कला-वाणिज्य-राजनीति धर्म्मनीति-समाजनीति-परराष्ट्रनीति-भावनां रहस्यविश्लेषणात्मकस्य, स्मृति-आगम-पुराण-दर्शन-आयुर्वेद-धनुर्वेद शिक्षा-कल्प छन्दो-निरुक्त ज्यौतिष-शास्त्रप्रतिष्ठाभूमित्वेन सर्वशास्त्रप्रतिष्ठात्मकस्य, अतएव सर्वविद्यानिधानस्य मन्त्रब्राह्मणात्मकवेदशास्त्रस्य हृदयाकाशे–एव किञ्चिदिवान्वेषणीयं भवति प्रश्नदिशायामिति नात्र तिरोहितमिवास्ति । अतीतेऽपि भारतराष्ट्रे असंख्यसंख्यानुगता विद्यन्ते स्म संस्कृतविद्यालयाः । वर्त्तमानभारतराष्ट्रेऽपि वर्त्तन्त एव संस्कृतकालेजा यत्र तत्र प्रान्तेषु । तत्र शिक्षिता विद्वांसोऽपि शास्त्री–आचार्य्य–महामहोपाध्यायादि–विवि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतीय-औषधानां सर्वाधिकं बृहत् विश्वस्तं निर्माणकेन्द्रम्

श्री वैद्यनाथ-आयुर्वेद-भवनम्

(आयर्वेद लिमिटेड)

कलिकाता ★ पटना ★ झांसी ★ नागपुरम्

सर्वेषामायुर्वेदिकौषधानां तथा सर्वरोगेषु उपयुक्तानां भेषजानां
सावधानतया, वैज्ञानिकरीत्या प्रचुरपरिमाणे

निर्माणकारकम्

भारतवर्षे सर्वत्र एकमूल्येन भेषजानीमानि लभ्यते

हरिनगर सूगर मिल्स लि०

★★★ फेक्टरी ★★★

हरिनगर [एन० ई० रेल्वे] [चम्पारन जिला] उत्तर बिहार

दूरभाषयन्त्रम्—

मर्यादा—रामनगर [चम्पारन]

प्रधानकार्यालय—

२०७, कालबादेवी रोड, बम्बई—२

दूरभाषयन्त्रम्—

'क्रिसूगर' [बम्बई]

निर्मातारः—(अत्युत्तम-शुद्धशर्करायाः)

★ प्योअर, ★ फर्स्टक्लास, ★ क्रस्टल ★ फेन सूगर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीवेणीशङ्करशर्ममहाभागस्य परिचयः

(ले० श्रीदीनानाथत्रिवेदी "मधुपः" जयपुरम्)

पं० श्री वेणीशंकरशर्माणः कलिकातानगर्य्यां सुप्रसिद्धा वाक्कीलाः सन्ति। एतेषां मूलनिवासस्थानं राजस्थानस्थ खेतड़ीति प्रसिद्धं वर्तते। एषां महाभागानां पूज्याः पितृपादाः पण्डित् श्रीबालीरामशर्माणः संस्कृतस्य धुरन्धरा विद्वांस आसन्, ये स्वजीवनकाले वार्धक्यप्राप्तिपर्यन्तं दृढतर--सनातनपद्धत्या धर्मस्य धार्मिकसंस्कृतेश्च प्रचारप्रसारौ समनोयोगमन्वतिष्ठन्। धर्म दृढानुरागिणः पितुः सत्पुत्रा धर्म-संस्कृति-संस्कृत-बद्धादरा एते श्री वेणीशंकरशर्माणो अपि वाक्कीलताकार्यं सम्पादयन्तोऽपि ततः स्वस्य समधिकं बहुमूल्यं समयं निष्कास्य सामाजिककार्येषु कामेन मनसा वाचा धनेन चोदारतापूर्वकं सत्सहयोगं प्रयच्छन्तो वर्तन्ते।

विहारे बांकानगरे चैभिरेव महानुभावैः अनेकलक्षमितानि रूप्यकाणि व्ययीकृत्य एको महाविद्यालयः प्रतिष्ठापितः यस्य नाम स्वर्गतस्य पूज्यस्य स्वस्य पितुरेव नाम्ना 'पं० बालीरामशर्माकालेजः' इति रक्षितमस्ति। गते अक्टूबर २३ दिनाङ्केऽस्य 'पं० बालीरामशर्माकालेजस्य समुद्घाटनं च कांग्रेसस्य भूतपूर्वाऽध्यक्षा श्रीमती इन्दिरागांधी महोदया स्वकरकमलाभ्यां कृतवती। अस्योद्घाटनावसरे च कलिकाता, भागलपुर, देवघर, जसपुर, मुंगेर प्रभृति सुमहानगरेभ्यः समायाताः अनेके विद्वांसस्तथा श्रेष्ठिनश्चासन् समुपस्थिताः। पटनाविश्वविद्यालयस्य उपकुलपतिः डा० श्री दुखनराममहोदयः श्री वेणीशंकरस्य—महाविद्यालयभवननिर्माणस्य तथा विद्यालयसंचालनार्थं प्रदत्तसात्विकधनराशेश्च विषये मुक्तकण्ठं प्रशंसां कृतवान्।

भारतीपरिवारः प्रतिवर्षं भवद्भिः दीयमानाय भवतां सत्सहयोगाय कृतज्ञतां प्रकटयति तथा एवमेव भवता देशोन्नतौ तथा समाजस्य कल्याणे समुन्नतकार्यकलापे च ध्यानम् सदैव संलग्नम् तिष्ठेत, तथा दीर्घायुष्यम् प्राप्नुवन्तो भवन्तः सफलम् पारिवारिकं जीवनम् यापयन्तु इति प्रार्थयते च प्रभु भूयो भूयः।

धोपाधिभारसमन्विता इतस्तो दन्द्रम्यमाणा अवलोक्यन्त एव। किन्तु संस्कृतवाङ्मयस्य मूलोद्देश्यभूतस्य सर्वविद्याकोशात्मकस्य वेदशास्त्रस्य ज्ञानविज्ञानसम्मतपारिभाषिक–स्वाध्याय-वञ्चितेन–केवल--अङ्गशास्त्रभक्तिसमन्वितेन संस्कृतेनैव भारतराष्ट्रस्य सुगुप्तकोशस्य समुद्धारो नैव सम्भाव्यते कदापि। अतश्च संस्कृतप्रतिष्ठानेषु पुरातनेषु, संकल्पितअभिनव–संस्कृतविद्यालयेषु च अङ्गशास्त्राध्ययनपरम्पराप्रतिष्ठापनार्थं बद्धपरिकरा विद्वांसो राष्ट्रीयनेतारश्च मन्त्रब्राह्मणात्मकवेदशास्त्रस्य प्रतिष्ठापनं यदवधि न करिष्यन्ति, तदवधि केवलसंस्कृतभक्त्या न भारतीयसंस्कृतेः समुद्धारः सम्भाव्यते, इति स्पष्ट ब्रूमः। नातोऽन्यथा लक्ष्यसिद्धिसम्भावनापीति–उररीकृत्य संस्कृतवाङ्मयाधारभूतायां 'छन्दोभ्यस्तेति' नाम्ना प्रसिद्धायां वेदभाषायामुपनिबद्धस्य वेदशास्त्रस्योपासनासाफल्या राष्ट्रीयप्रजोद्बोधनाय राष्ट्रस्वातन्त्र्यप्राणभूतायाः, वेदविद्यासम्बधे एव **वेदस्य सर्वं 'विद्यानिधानत्वम्'** इति विषयमवलम्ब्य किञ्चिदिव निवेदयति यः कश्चिदपि मुक्तरक्तो मोतीलालशर्म्मोपाह्वो राजपत्तनस्थः आङ्गिरसो भारद्वाजो वेदवीथिपथिकः। आशास्यते तच्छ्रुत्वा–परिस्थितिविशेषकृतसहजदोषानुपेक्ष्य उत्साहयुक्तं भावयिष्यन्ति मां तत्रभवन्तो भवन्त इति। क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दत्तात्रेय-कृष्ण-सांडु-ब्रादर्स प्रा० लि० चेम्बूर मुंबई ७१

हीरक--महोत्सवः

आयुर्वेदस्तु दरिद्र्यपूर्णदेशाय देवेन प्रदत्तं वरदानम्। —महात्मा गांधी

भारतीया ग्रामवासिनी दारिद्र्यग्रस्ता जनता आयुर्वेदीयौषधीः विज्ञाय अत्यर्घानां विदेशीयौषधीनां सेवनं कर्तुं न पारयति। इति ज्ञात्वा सांडुबन्धुभिः स्वातंत्र्य पूर्वकाले पञ्चाशद्वर्षेभ्यः आगेव ठाकूरद्वारे (मुम्बापुरीं) आयुर्वेदीयौषधीनां उत्पादनं प्रारब्धम्। स्वदेशस्य आवश्यकतानुसारं निखिलौषधयः देशेस्मिन् एव उत्पादयितव्याः इति राष्ट्रकर्तव्यतायाः भावना सांडुबन्धुभिः परतन्त्र्यकाले एव स्वहृदयेषु परिपोषिता। तैः गंभीरवृत्या निश्चयात्मकया च बलशालिन्या बुद्धिमत्तया सह कर्तृत्वोद्योगिता समन्विता, तस्माच्च शून्यात् ब्रह्माण्डं निर्मितम्। सातत्यपूर्णतया प्रयत्नशीलतया संशोधनवृत्या च सांडु-औषधयः गुणकारकाः अत्युत्कृष्टाश्चेति सर्वे अभिमताः।

अत्यधिकं लाभं विचार्य, अनुशासनबद्धया कार्यप्रणाल्या उत्पादनक्षमतां आवर्ध्य, गतषष्टिवर्षाणि यावत् अनेकाभिः आपत्तिभिः संयुध्य तैः सांडु-बन्धुभिः आयुर्वेदीयौषधयः सा प्रणाली च संगोपिताः। तासां उत्पादनपद्धतिश्च अद्य यावत् सुधारिता।

आयुर्वेदीयौषधीनाम् उत्पादनं तु प्रयोगावस्थायाः बहिः निःसृतं इति यत् सर्वं श्रेयः सांडुबन्धुभ्यः दीयते तद् उचितमेव। तेषां उत्पादनशाला अन्येषां स्फूर्तिस्थानं प्रेरणा-मार्गदर्शनार्थम्। सर्वं च उत्तरदायित्वं सहकार्येण कुशलतया च स्वस्कन्धैः ऊढ्वा सांडुकौटुम्बिकैः शनैः शनैः प्रगतिं साधित्वा स्वोत्पादनशाला (कारखाना) १९५६ खिस्तसंवत्सरे 'लिमिटेड कंपनी' नाम्ना परिवर्तिता। सांडुबन्धवः एव 'ओरिजिनलब्राह्मीतैलस्य' आद्योत्पादकाः।

तत्रस्थः चालकवर्गः आयुर्वेदीयौषधीनां शास्त्रशुद्धपद्धत्या स्वल्पमूल्येन एव उत्पादनं कर्तुं सविशेषं स्वलक्ष तत्कर्मणि केंद्रयति। तेषां औषधयः भारते कतिपयेषु लोकलबोर्ड-नगरपालिकयोः चिकित्सालयेषु अद्यतने सप्रभावं उपयोजिताः वर्त्तन्ते। तेषां 'कंपन्याः' बोधचिन्हं (ट्रेडमार्क) दत्तमूर्तिः इति। तत्तु कार्यक्षमता-शुद्धता-विश्वसनीयतादीनां गुणानां प्रतीकम्।

एतादृशस्य तेषां आयुर्वेदीयौषध्युद्योगस्य हीरकमहोत्सवस्य सुप्रसंगे अत्यानन्दिताः वयं तेषां बन्धूनां उज्ज्वलं यशः चिन्तयामः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५ से ५० मन

उपज में १० गुनी वृद्धि करने का श्रेय है शेख अब्दुल गफ़्फ़ार और उनके पांच भाइयों को, जिन्होंने नये तरीकों और संयुक्त ढंग से खेती करके यह आश्चर्यजनक सफलता पाई है।

बिहार के वाटगंज गांव के इन किसानों ने नया रास्ता पकड़ा। इन्होंने खेती के आधुनिक तरीके इस्तेमाल किये, उन्नत किस्म के बीजों को कतारों में बोया और काफी मात्रा में रासायनिक खाद डाली। इन्होंने अपनी ४५ एकड़ भूमि में संयुक्त खेती की, अपने दिमाग से उन्होंने नये ढंग के औजार बनाये और नये तरीके निकाले।

इसका फल यह निकला कि जहां पुराने तरीकों से प्रति एकड़ औसतन ४ या ५ मन गेहूं या धान मुश्किल से होता था, वहां अब नये तरीकों से ४० से ५० मन प्रति एकड़ उपज होती है।

आप भी अपनी धरती से अधिक उपजा सकते हैं। खेती के उन्नत तरीके अपनाइये और चौगुनी पचगुनी फसल काटिये। इसमें आपका भी लाभ है और आपके देशवासियों का भी, जिन्हें आप खाने के लिए अधिक अन्न देंगे।

योजना की सिद्धि
आपकी समृद्धि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धारावाहिकं कथानकम्

★ जीवनस्य पृष्ठद्वयम् ★

पूर्वकथाः— —ले० मानसी

(आत्मकथाया लेखिका बाल्यादेव संस्कृते रुचिमग्रहीत् । सा 'इण्टर' परीक्षायां संस्कृतविषयं गृहीतवती, किन्तु अध्यापनाय बालिकाविद्यालये समुचिता व्यवस्था नाऽऽसीत्, अतोस्याः पिता यो हि स्वयं सम्पन्नः, सम्भ्रान्तः एकस्याङ्गलविद्यालयस्याऽऽध्यक्षश्चासीत्—एकम् एम. ए. (संस्कृत) परीक्षार्थिनं एतां पाठयितुं नियुयोज । राकेशनामाऽयं युवकः सुशीलः, गम्भीरः, शान्तश्चाऽऽसीत् । तत्सकाशादियं कालिदासग्रन्थानामध्ययनमकरोत्—तस्मै च मनस्येव श्रद्धां समर्पितवती । बी० ए० परीक्षा अपि अनया तस्यैव प्रेरणया, अध्यापनेन च दत्ता । किन्तु परीक्षापरिणामस्य निर्गमनात्पूर्वमेव एका घटनाऽघटत । राकेशेन वृत्तिं गवेषयता तन्नगरं परित्यक्तम् । सोयमासीदस्या उपरि महानाघातः, तथाऽप्यनयाऽध्ययनं न परित्यक्तम् । तदानीमेव एतस्या विवाहस्य चर्चा प्राचलत् । जनकेनोक्तं यदस्मिन्नेव वर्षे तस्या विवाहो भवेत् । किन्तु एतद्विषये नैतया कापि जिज्ञासा प्रकटिता । शनैः शनैर्विवाहदिवसः समीपमागतः । तथापि नेयमजानात् क एतां परिणेतुमागच्छति । वाग्दानं सम्पन्नं, यस्मिन् श्वश्रूं श्वशुरं चेयं दृष्टवती । विवाहदिने लग्नमण्डपस्था इयं चिन्तितवती यदयं नरो यः कोऽपि भवतु–राकेशं विस्मृत्यैनमेव हृदये पूजयिष्यामि । अन्तःपटेऽपसृतेऽनया दृष्टं यद्यस्तां परिणीतवान् , स राकेश एवाऽभूत् । इयं चकिताऽस्थात् । अनया ज्ञातं यत्सोऽधुना प्रशासकीयसेवायाम् (I.A.S) अधिकारी वर्त्तते । विवाहानन्तरं राकेशेन निश्चितं यत्स देहरादूननगरे पत्न्या सह सप्ताहमतिवाहयेत् ।]

भारद्वाजमहोदयेन महान्तं विजयमधिगत्योपेयुषः पुत्रस्य शिरः आघ्राय हार्दिक्य आशिषः प्रदत्ताः । —राकेशस्य शरीरपरीक्षाऽभूत्–तदनन्तरं प्रशिक्षणमभूत् (Training) । तदैव प्रशिक्षणात्परावृत्तेन राकेशेन पितुर्मुखाच्छ्रुतं यत्तव पाणिग्रहणस्य मदीयाऽन्तिमाऽभिलाषाऽस्ति, कदा तां पूरयिष्यसि ?

"संकट-साफल्ययोः समग्रेऽपि सुदीर्घेऽस्मिन् संघर्षे प्रयतमानस्य मे हृदये त्वदीयः स्नेहदीपः सर्वदैव प्राज्वलत् । पावनस्यास्य प्रेम्णः काचन ओजस्विनी प्रेरणा साभूत्—यया ममाऽऽत्माऽजस्रं संघर्षाय प्रेरितः । इदं खलु किंचिदनिर्वचनीयं सूत्रमभूत्—येन सर्वमिदं दर्शितम् । संकटग्रस्तस्यापि ममाऽऽसीदिदमनुमानं यत्त्वां कश्चनाऽन्यो नेतुं न पारयिष्यति । ममैवायमधिकारः ।"

तस्यां निशि आवेगपूर्वकं यदा राकेशेन तदिदमुक्तं, मम समग्रेऽपि गात्रे रोमहर्षः समभूत् । शाकुन्तलस्य तत्सर्वं दृश्यं नयनयोरनृत्यत्—यदा शकुन्तलाऽऽशंकते—"तव नहि जाने हृदयं–मम खलु कामो दिवापि रात्रिमपि । निर्घृण, तपति बलीयस्त्वयि वृत्तमनोरथानि गात्राणि ।"

दुष्यन्तश्चापि तथाविधमेव स्नेहतापमनुभवन्नुत्तरयति—"तपति तनुगात्रि मदनस्त्वामनिशं, मां पुनर्दहत्येव । ग्लपयति यथा शशाङ्कं न तथा हि कुमुद्वतीं दिवसः ।"

स्वपितुर्मुखाद्विवाहप्रस्तावं श्रुत्वा राकेशेन—अधिकारिसुलभया स्पष्टतयोक्तं यन्मम प्रथमो दोहदः "कल्पनायां" (मयि) वर्त्तते । सा मया बहुवर्षपूर्वं पाठिताऽभूत्—इत्यादि ।

मद्विवाहं पुरस्कृत्य भृशं चिन्तितेन मत्पित्रा सहसैव भारद्वाजमहोदयस्य पत्रं प्राप्तं यस्मिन्निदं पृष्टमभूत् "यत्किमधुनाऽपि कल्पनाऽविवाहिताऽस्ति किमधीते ?"

सर्वस्य पत्रव्यवहारस्यानन्तरं यज्जातं तदद्य चक्षुषोरग्रे । प्रशासनाधिकारिणा सह स्वकन्यकाया विवाहमद्य को नाभिलषति ? किन्तु मत्पितृभ्यां सर्वमिदं मयि न प्रकटितमित्याश्चर्यमासीत् । किन्तु तदिदमपि ताभ्यां युक्ततरमेव कृतम् ।

"भारद्वाज" इति नाम श्रुत्वा अन्यं कंचनाऽऽशंकमानया मया यस्य कस्यचनापि "पाणिग्रहीतुः" चरणयोर्जीवनार्पणस्य या प्रतिज्ञा कृता—तदनन्तरं विवाहमण्डपे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

स्पर्द्धायाः स्थाने सहयोगः शिक्षाया ध्येयं भवेत्

भारतराष्ट्रपतेरभिभाषणम्

जनवरीमासस्य षष्ठ्यां तारिकायां भारतराजधान्यां देहल्यां "विश्वशिक्षावित्संमेलनस्यासीत्प्रकाण्डसंमेलनम्। तत्र भारतराष्ट्रपतेः श्रीडा० राजेन्द्रप्रसादमहाभागस्य शिक्षाया उद्देश्यविषये समभून्मार्मिकं भाषणम्। अहह भूमण्डलस्य निखिलानपि शिक्षाविदः संबोध्य कीदृङ् मार्मिकमुक्तं राष्ट्रपतिना—"यदि वयम् ईदृशस्य समाजस्य रचनां कर्तुमभिलषामो यत्र सर्वेऽपि सुखिनः संतुष्टाश्च भवेयुस्तर्हि स्पर्द्धायाः स्थाने सहयोगोपरि, भौतिकसमृद्धेः स्थाने च सुखस्य, आत्मसंतोषस्य चोपरि, सर्वात्मना बलं देयं स्यात्। मनुष्यसमाजे एवंविधपरिवर्तनस्यार्थं न केवलं बालानां, न वा नवयुवकानां शिक्षायां प्रत्युत प्रौढानां, बुद्धिजीविनां चापि विचारेषु परिवर्तनं कर्तव्यं भवेत्। एवं सत्येव आगामिसततीनां कृते मित्रतायाः, सहयोगस्य च वातावरणे प्रवृद्धेरवसरः प्रदत्तो भवेत्। तदैव च तेषां वास्तवं ज्ञानं भवेद् यत् भौतिकसाधनैः मनुष्यस्य न कदाचिदपि वास्तवः सत्यश्चानन्दः प्राप्यो भवेत्।

विसर्जनभाषणे राष्ट्रपतिना प्रोक्तम् —"संसारेऽस्मिन् न कश्चिदपि अधिकारपुरस्सरमेतद्वक्तुं शक्नुयात्—यत् सांसारिकवस्तुभिराजन्म यस्मै कस्मैचिदपि पुरुषाय वास्तवं पूर्णं च सुखं दत्तमिति। किन्तु प्रत्येकदेशे, प्रत्येकयुगे च एवंविधाः बहवः स्त्री-पुरुषाः संजाताः सन्ति, ये हि भौतिकीनामावश्यकतानां सीम्नो बहिः, तत उपरि उत्थाय महदान्तरिकं सुखं प्राप्तवन्तो नूनम्। ये केचिदेवं कथयन्तः श्रूयन्ते यत् अज्ञानवशादेव तैरिदं सुखं प्राप्तमिति। किञ्च तत्सुखम् अनित्यं क्षयिष्णु चेति।' तदिदं भ्रम एव। ते हि वस्तुतो ज्ञानिनः, परमार्थदर्शिनश्चासन्। यतो हि तैर्भौतिकवस्तूनामन्तस्तत्त्वं मूलतः परीक्षितमासीत्।

प्रोक्तं महाभागेन—"आधुनिकी शिक्षा सर्वेषु देशेषु, सर्वेषामपि लोकानां प्राप्तव्या नास्ति, यतो हि तदर्थं महतां साधनानामावश्यकता। एतत्प्रतिकूलम्, सोयमात्मसंतोषः, तदर्थं संदेशश्च, प्रत्येकदेशे आबाल-

---

राकेशं वीक्ष्य मदन्तस्तले विस्मयोद्वेगेन यत्खलु कृतं—तत्सर्वं लज्जानम्रमुख्या मया राकेशाय निवेदितम्।

* * *

अन्योन्यम्य विदितरहस्याभ्यामावाभ्यां परिज्ञातमपि न, यद्रात्रेः प्रथमो यामो व्यतीतः, द्वितीयोऽपि। शीतं प्रवृद्धम्—आवां च—स्वपान्थावासात् गव्यूतिपर्यन्तं (क्रोशद्वयं) समागतौ। प्रकोष्ठबद्धां घटिकां वीक्ष्य राकेशस्त्वरितमेव पान्थावासमार्गं प्रति परावृत्तः। त्वरितं पादन्यासमाचरद्भ्यामप्यावाभ्यां पान्थावासं प्रति पुनः परावर्त्तने सार्धहोरा समापिताऽभूत् पान्थावासमागत्यावाभ्यां। ज्ञातं यद्रात्रेः केवलमेक एव यामोऽवशिष्टः। किन्तु सर्वप्रथमेऽस्मिन् सहभ्रमणे—अनिर्वचनीयमननुभूतपूर्वं यत्तादात्म्यं—याऽऽत्मनोस्तल्लीनता—हृदययोस्तन्मयता—अचिन्त्यश्च मधुरिमाऽनुभूतस्तमधुनापि स्मरामि। मानवहृदयमर्मज्ञेन भवभूतिना यदुक्तं तत्तदा मे स्मृतिमारुरोह। मया शनकैरवनतमुखया मदीयां घटिकां वीक्ष्य सोऽयं श्लोकार्धः पठितः—

"किमपि किमपि मन्दं मन्दमासक्तियोगा—
दविरलितकपोलं जल्पतोरक्रमेण....."

राकेशः स्नेहगद्गद इवाऽजायत। तस्यापि संस्कृतग्रन्थानां स्मृतिस्तीव्राऽऽसीत्। तेन स्मयमानेन श्लोकार्धं पूरितम्—

"अशिथिलपरिरम्भव्यापृतैकैकदोष्णो-
रविदितगतयामा रात्रिरेव व्यरंसीत्

* —क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृद्धवनितं सर्वस्यापि कृते प्राप्तव्योस्ति। एनमधिगत्य यस्यां कस्यामपि दशायां, यस्मिन् कस्मिन्नप्यवसरे ते संतुष्टाः सुखिनश्च भवितुमर्हन्ति। संदेशमेनमधिगम्य तेषामात्मोन्नतेः, आत्मप्रवृद्धेश्च कामना न नाम नष्टा भवेत्। प्रत्युत निर्भयाः सन्तस्ते निष्कामकर्ममार्गे निःसंशयमग्रगामिनो भवेयुः।

प्रतिस्पर्द्धायाः, सहयोगस्य चेत्यनयोर्द्वयोरन्तरं सुस्पष्टीकृतं महाभागेनाऽनेन—"यत् प्रतिस्पर्द्धाया मूले हिंसा निहिता, सहयोगस्य तु मूले प्रीतिः प्रतिवसति। अतएव प्रत्येकराष्ट्रस्य, प्रत्येकव्यक्तेश्च मानसिकपरिवर्तनार्थं मानवसमाजस्याऽस्य प्रत्येकोपक्रमे पारस्परिकप्रीतये एव प्रधानं स्थानं दातव्यं स्यात्। कार्यं च तदिदं शिक्षाविज्ञस्यैव सर्वथा कर्तव्यं समुचितं च।

भारते शिक्षाक्षेत्रस्य परिस्थितिं सूचयता राष्ट्रपतिना सोत्साहं प्रोक्तं यत्—वयमपि निजदेशे प्रत्येकपुरुषं शिक्षितं कर्तुं कामयामहे। किन्तु शिक्षासाधनानां सीमितत्वादस्माकं लक्ष्यसद्धौ बाधाः समुपतिष्ठन्ते। अस्माकं राष्ट्रनेता महात्मा गांधीमहोदयस्तदिदं सम्यक्तया अनुभवति स्म। बहुभिः शिक्षाशास्त्रिभिः सह संमन्त्र्यैव महात्मना तेन सेयं 'बुनियादी शिक्षा' सर्वतः स्वीकृताभूत्। स्वतन्त्रताप्राप्तेरनन्तरकालादेव सेयं शिक्षाप्रणाली अस्माभिः सर्वतः प्रचारितास्ति। नेदं वयं वक्तुमुत्सहामहे यदस्माभिरस्मिन् विषये सफलता प्राप्तास्तीति। किन्तु सोयं पूर्णो विश्वासोस्ति यत्स्वल्प एव काले सोयमनुभवेऽस्माकमवश्यं भवेद् यत् भारतस्य कृते सेयमेव प्रणाली उपयुक्ताऽस्तीति।

अन्ते राष्ट्रपतिना प्रोक्तमतिविनयेन यत्—भारतमुपगतैः सर्वैरेव भवादृशैरस्मिन् अवसरे (स्वल्पेऽप्यवकाशे) यावच्छक्यं 'बुनियादी' शिक्षाया अस्याः सर्वे सिद्धान्ताः, सर्वेऽपि च व्यावहारिकपक्षाः यथार्थतो निरीक्षिताः परीक्षिताश्च स्युः। अवश्यमस्माकं सर्वास्वपि योजनासु नवनवविचाराणां, नवनवसंमतीनां चास्ति नूनं समावेशाऽवसरः। शिक्षासाः सम्बन्धे ननु को नाम प्राचीनाग्रहिलः 'लकीरका फकीर' भवितुमर्हेत्।

एतदनन्तरं अन्तर्राष्ट्रियनवशिक्षावृत्तेरध्यक्षः के० जी० सैयदेनमहाशयोऽभाषिष्ट यत्— "श्रीमन्तः शिक्षाविषये सर्वभावेन सर्वानुभविनः अनुरक्ताश्च सन्ति। ये च श्रीमतां परिचयेद्यावयि समागताः सन्ति ते सर्वथा विदन्ति यत् भवन्तः प्रधानमन्त्रिप्रभृतीनां भवत्सहयोगिनां तुल्याः हृदयतो राजनीतिज्ञा न सन्ति, प्रत्युत भवन्तो नूनं शिक्षाशास्त्रिणाः सर्वथा। राजनीतिरर्थशास्त्रं चाऽस्माकं जीवनस्य बाह्यं वातावरणं नियन्त्रयतः, शिक्षा त्वस्माकमान्तरिकविचारान् उन्नयति। वयं मनुष्यस्य विचारान् आन्तरिकभावांश्च उन्नमयितुं कामयामहे, येन स हि समाजस्याभ्युत्थाने योगं दातुं समर्थः स्यात्।

तदुत्तरं दिल्लीविश्वविद्यालयस्य डा. वी.के.आर.वी. रावमहोदयेन वर्तमानकाले छात्रेषु प्रसृतायाः अनुशासनहीनताया विषये भूयसी चिन्ता व्यक्तीकृता। उपायनिर्धारणे प्रोक्तं—'यत् एतस्य प्रतीकारो रक्षापुरुषाणाम् (पुलिस) साहाय्येन तेषां निर्दयदमनं नास्ति। किन्तु शिक्षाप्रणाल्या एव परिवर्तने सति एतस्य प्रत्युपायो भवेत्।'

राष्ट्रपतिमहोदयस्य वक्तव्यसारं बहोः कालात् संस्कृतसेवाव्रतिनो देशस्य कर्णधाराणां समक्षे निवेदितवन्तः सन्ति यत् शिक्षा हि मनुष्यस्य हृदयपरिष्कारे प्रभवति। या शिक्षा केवलमुदरचिन्तामेव शिक्षयति, सा हि प्राप्तेऽवसरे अनुशासनहीनतामप्यवलम्बते। ततश्च प्राचीनैरार्यैरनुमोदिता संस्कृतिसंबद्धैव शिक्षा देशस्यैतस्य हिताय भवेदिति किं वा मुहुर्मुहुराम्रेडनेन। भगवान् वितरतु हितबुद्धिं शिक्षाकर्णधारेभ्य इत्यलम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपदेशमालायां

सन्ध्योपासनम्

पंचमो मणिः

पूर्वानुवृत्तम्

(ले० महोपाध्याय आशुकविः श्रीहरिशास्त्री दाधीच , जयपुरम्)

ऋष्यादयो भारतदेशिकार्याः
सन्ध्यामुपास्यैव सुदीर्घमायुः ।
विद्या बलं स्वास्थ्यमुदग्रमापुः
तद्बालकाः ! सान्ध्यविधिं श्रयध्वम् ॥

प्रिया बालकाः !!! अपि जानीथ किं नाम सन्ध्योपासनम् किमर्थं च क्रियते ? नो चेत् , वयमद्य किंचिद्वदामः श्रोतव्यं तदवधारयत च ।

प्रातःकृत्येषु आचारप्रतिपादकशास्त्रैः धर्मग्रंथैः स्मृत्यादिभिः सन्ध्योपासनं द्विजानां (ब्राह्मण क्षत्रियवैश्यानां) कृते परमावश्यकं निर्दिष्टम् । तच्च प्रातःशौचस्नानादिभिर्निवृत्य स्वस्थचित्तैः पुरुषैः कार्यम् । अनेन कर्मणा मानवानां मनोबलं बुद्धिः श्रद्धा स्मृतिर्धारणा चौजश्चापि वृद्धिमाप्नोति धर्मश्च पुष्यति ।

यो हि सर्वेश्वरो महामहिमशाली सत्य-ज्ञानानन्द रूपः परमात्मा अस्मान् स्वचैतन्यादंशांशं प्रदाय जीवयति श्वासान् प्रश्वासान् च ददाति । द्रष्टुं चक्षुषी, श्रोतुं कर्णौ, घ्रातुं नासा, भक्षितुं मुखं, वक्तुं जिह्वां, चलितुं पादौ, कर्म कर्तुं हस्तौ ददाति । पुनश्च जीवनसाधनानि अन्नजलवायुप्रभृतीनि समुपस्थापयति । तादृशाय महामहोपकारिणे वयं किमपि प्रतिकर्तुं न शक्नुमस्तत् तस्य गुणगायनं तत्स्मरणं ध्यानं कृत्वा कृतज्ञतां प्रकाशयाम इत्येवं रूपं तु कर्तव्यमस्माकमस्त्येव, न चेद्वयं कृतघ्ना भवामः तदुक्तं महाभारते—कृते प्रत्युपकारो यो वणिग् धर्मेति साधुता । तत्रापि ये न कुर्वन्ति पशवस्ते न मानुषाः ॥ इति । उपकर्तुः प्रत्युपकरणं वणिग्धर्मः ।

भारतवर्ष देशीय आर्य ऋषि महर्षि आदि लोग सन्ध्योपासन से ही दीर्घ आयु समुन्नत विद्या बल अच्छा स्वास्थ्य प्राप्त करते थे, इस कारण हे बालको सन्ध्योपासन का आश्रय कीजिये ॥१॥

प्रिय बालको ! क्या तुम जानते हो कि सन्ध्योपासन क्या है और वह क्यों किया जाता है । यदि नहीं तो आज हम सन्ध्योपासन के लिए ही कुछ कहते हैं इसे सुनो और धारण करो—

प्रातःकालीन कार्यों में आचारसंहिताओं ने तथा धर्मग्रन्थ श्रुति-स्मृति आदि ने सन्ध्योपासन द्विजों का (ब्राह्मण क्षत्रिय वैश्यों का) परम आवश्यक कर्म बतलाया हैं ! और वह प्रातः शौचादि (स्नानादि) से निवृत्त हो स्वस्थ चित्त से करना कहा है । इस से मनुष्यों का मनोबल बुद्धि श्रद्धा स्मृति धारणा और ओज सभी बढ़ते हैं तथा धर्म पुष्टि पाता है ।

यह निश्चय ही समझना चाहिये कि जो महामहिमशाली सत्य ज्ञान आनन्द स्वरूप परमात्मा हमको निज चैतन्य में से अंश अंश देकर जीवित रखता है जीने को सांस पर सांस देता है, देखने को आंखें, सुनने को कान, सूंघने को नाक, खाने को मुख, बोलने को जीभ, चलने को पैर, काम करने को हाथ देता है और जीवन के साधन अन्न जल वायु आदि सभी आवश्यक तत्व आगे उपस्थित करता है । ऐसे महान उपकारी का प्रत्युपकार करने को हम कुछ भी नहीं करते हैं यह कितनी स्वार्थपटुता और कृतघ्नता है । हां हम उस महामहादयालु विश्व के उपकार करने वाले का प्रत्युपकार तो नहीं कर सकते हैं फिर भी उसके गुण गायन और उसका समय पर स्मरण तथा ध्यान करके तो कृतज्ञता प्रकाश करें यह कर्तव्य तो हमारा हो जाता है । यदि ऐसा भी नहीं करते हैं तो हम निश्चय कृतघ्न होते हैं । महाभारत में कहा है—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा वणिक् पणमादाय पण्यं ददाति तद्वत् । पुनश्च ये तदपि न कुर्वन्ति ते पशव एव न मानुषाः । इत्यनुसन्धीयैव अस्मत्पूर्वजाः महर्षयो महान्तः सन्तो जनाः प्रभाते परमेश्वराराधनं सन्ध्यासमये नियतीकृतवन्तः । तदिदमवश्यं कर्तव्यमस्माकम् । यत् प्रातः शौचादिभ्यो निवृत्य सन्ध्योपासनं कुर्वीमहि ।

सन्ध्यापदनिरुक्तिस्तु इत्थं ज्ञातव्या—सम् सम्यक् ध्यायन्ति अस्यां सा सन्ध्या । ध्यै चिन्तायां इति धातोः सं पूर्वकात् आतश्चोपसर्गे इति अङ् प्रत्यये सन्ध्या शब्दः सिद्ध्यति ।

केचन धा धातोरपि संपूर्वकात् इदं पदं साधयन्ति, ते इत्थं वदन्ति सम्यक् दधति मनोवधानं कुर्वन्ति जना यस्यां सा सन्ध्या । तदपरे दिवारात्र्योः सन्धिः अतिशयितः सम्बन्धः । तत्र यत्कर्म ध्यानादि तत्सन्ध्यापदेनोच्यते । अस्तु कथमपि मन्यताम् तस्य परमेश्वरस्य ध्यानं सन्धौ (दिनरात्र्योः) करणस्य परमावश्यकतास्ते ।

रात्रेरन्त्यो भागः दिवसस्य चादिमो भागः ध्यानार्थं उत्तमो मन्यते पूर्वजैर्महर्षिभिः इति सन्ध्यासमये भगवान् ध्यातव्यः । सन्ध्या च त्रिधा भवति प्रातः मध्याह्ने सायंकाले च । प्रातःकालीना सन्ध्या सूर्योदयात् प्राक् उत्तमा भवति । सायंकालीना सन्ध्या सूर्येऽस्ताभिमुखे उत्तमा भवति ।

सन्ध्याकर्मणे श्रुतिर्वदति अहरहः सन्ध्यामुपासीत, इति । ऋषयो दीर्घसन्ध्यत्वाद्दीर्घमायुरवाप्नुवन् सन्ध्यायां प्राणायामस्य करणेन श्वासनिरोधनतः आयुर्वृद्धिस्तु स्पष्टैव भवति । अघमर्षणादि--कर्मतः पापापनोदनमपि सुकरम् । वाम नसय जलमाकृष्य दक्षिणनासया तन्निः-

कृते प्रत्युपकारो यो वणिग्धर्मो न साधुता ।
तत्रापि ये न कुर्वन्ति पशवस्ते न मानुषाः ॥१॥

उपकार के बदले प्रत्युपकार करना वणिग्धर्म ही है साधुता नहीं है । जैसे बनिया पैसा लेता है और वस्तु देता है । और यदि यह भी न कोई करते हैं तो वे कृतघ्न पशु ही हैं मानव नहीं हैं । इस बात को ध्यान में रख कर ही हमारे पूर्वजों ने प्रभात में सन्ध्योपासन में परमेश्वर का आराधन स्मरण ध्यान को नियत किया है यह हमारा अवश्य कर्तव्य है कि हम प्रातः शौच स्नान से निपटकर सन्ध्योपासना करें ।

सन्ध्या पद की निरुक्ति इस प्रकार समझने की है सम् सम्यक् अच्छी प्रकार ध्यान्ति ध्याते हैं जिस वेला में सन्ध्या होता है ध्यै चिन्तायां इस धातु से सम् उपसर्ग सं० आतश्चोपसर्गे इस व्याकरण सूत्रानुसार अङ् प्रत्यय करने से सन्ध्या पद बना है । कोई आचार्य धा धातु से भी सम् उपसर्ग पूर्वक सं. इस पद को सिद्ध करते हैं वे कहते हैं जिस वेला में मन को सम् सम्यक् दधति धारण करते हैं अवधान करते हैं वह सन्ध्या होती है । तीसरे लोग दिन रात्रि की सन्धि जोड़ के काल को सन्ध्या कह कर उसमें जो ध्यानादि किया जाय उसे सन्ध्या पद से मानते हैं ।

कोई कैसा भी मानें उस परमेश्वर का ध्यान दिन रात की सन्धि में करना यह आवश्यक हुआ ।

रात का अन्तिम भाग और दिन का आदिम भाग ध्यान के लिए उत्तम लाभप्रद माना है, हमारे सभी पूर्वज महर्षिजनों ने यही काल (सन्ध्या का समय) परमेश्वर के ध्यान के लिए विशिष्ट माना है ।

वह सन्ध्या तीन प्रकार की होती है । १ प्रातःसन्ध्या २ मध्याह्न सन्ध्या ३ सायं सन्ध्या । प्रातः सन्ध्या सूर्योदय से पहले करना अच्छा है । और सायं सन्ध्या सूर्यास्त से पूर्व करना अच्छा है ।

सन्ध्या के लिए श्रुति कहती है—अहरहः सन्ध्यामुपासीत । हर दिवस प्रतिदिन सन्ध्योपासन करना चाहिये । ऋषयो दीर्घसन्ध्यत्वाद्दीर्घमायुरवाप्नुवन् । ऋषि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपयोगिनी लघुकथा :-

परीक्षा

(ले० रामेश्वरप्रसादउपाध्याय 'भयङ्कर' जयपुरम्)

एकदा महाराजो भोजः पण्डितप्रवरो माघश्च यदृच्छया भ्रमन्तौ उज्जयिनीतः अतिदूरं निष्क्रान्तौ। परावर्तनसमये तयोः मार्गस्य नाऽऽसीत् स्मरणम्। आहिण्डमानौ एकस्य कुटीरस्य समीपे अगच्छताम्। कुटीरस्य स्वामिनीमेकां वृद्धां तौ अपृच्छताम्—"मातः! अयं मार्गः कुत्र गच्छति ?"

वृद्धा द्वावपि पुरुषौ अवधानेन पश्यन्ती अवदत्—"अयं मार्गस्तु कुत्रापि न गच्छति। आम्, अस्योपरि लोकां यातायातं कुर्वन्ति। कौ भवन्तौ ?"

माघः अवदत्—'आवां यात्रिणौ'।

'यात्रिणौ ? वृद्धाऽवदत्—यात्रिणौ तु केवलं द्वौ सूर्यः चन्द्रश्च। भवन्तौ कथं यात्रिणौ ? सत्यं सत्यं वदतम्, भवन्तौ कौ ?'

'आवां क्षणभङ्गुरौ मनुष्यौ', माघः सतर्कतया प्रावदत्।

"क्षणभङ्गुरौ मनुष्यौ ?" संसारे क्षणभङ्गुरे तु द्वे एव वस्तुनी स्तः यौवनं धनं च। माघः पराजित इवाऽऽदृश्यत। ततोऽपि सोऽवदत्—'आवां राजानौ'।

'राजानौ अपि केवलं द्वौ' वृद्धा प्रत्यवदत्--'चन्द्रश्च, यमश्च।' भवन्तौ कथं राजानौ ?

एक बार राजा भोज और पण्डितप्रवर माघ घूमते हुए उज्जयिनी से बहुत दूर जा निकले। लौटते समय उन्हें मार्ग स्मरण न रहा। भटकते-भटकते एक झोंपड़ी के पास पहुँच गए। झोंपड़ी की स्वामिनी एक वृद्धा से पूछा—"मां, यह रास्ता कहां जाता है ?"

वृद्धा दोनों व्यक्तियों को ध्यानपूर्वक देखती हुई बोली—'यह रास्ता तो कहीं नहीं जाता। हां, इस पर लोग आया जाया करते हैं। आप लोग कौन हैं ?"

माघ बोले—"हम यात्री हैं।"

"यात्री ?'—वृद्धा बोली—"यात्री तो सिर्फ दो हैं—सूर्य और चन्द्र। आप कैसे यात्री हुए। सच सच बताइए, आप लोग कोन हैं ?"

"हम क्षणभंगुर मनुष्य हैं।"—माघ ने सतर्कता से कहा।

"क्षणभंगुर मनुष्य ! संसार में क्षणभंगुर तो बस दोही वस्तुएं हैं। यौवन और धन।"

माघ कुछ पराजित से दीख पड़े। फिर भी बोले "हम राजा हैं"

सारणमन्त्रपठनपूर्वकं सन्ध्यायां अघमर्षणं वर्णितम्। एवं करणेन चक्षुरिन्द्रियं बलवत् स्वच्छं भवति दृष्टिश्च निर्मला भवतीति न सन्देहः पापापनोदनं तु भवत्येवेत्यादि अनेके लाभाः सन्ति अत एव स्मृतिषु सन्ध्यार्थं महर्षिभिरुक्तम्—

लोग दीर्घ सन्ध्योपासन से ही दीर्घ आयु पा चुके हैं। सन्ध्यायां प्राणायामकरणेन श्वासनिरोधतः आयुर्वृद्धिर्निश्चयेन भवतीति महर्षयः। सन्ध्या मे प्राणायाम से श्वासनिरोध होगा तो आयुवृद्धि अवश्य ही होगी यह तो स्पष्ट ही है हमने यह बात आप लोगो को व्यायाम सेवन नामक मणि से समझा आये हैं वहीं देखो।

अघमर्षणादि से पापापनोदन भी सुकर है, सहज ही हो जाता है। वामनासा से जल खींचकर मन्त्र पढ़ते हुए उसको दाहिनी नासिका से निकालना अघमर्षण कहलाता है। इस क्रिया से आंखें बलवान् दूर देखने वाली साफ होती हैं। और भी अनेक लाभ हैं, जुकाम नहीं होता है, नेत्र दुखने नहीं आते हैं। शिर के रोग नहीं होते हैं इत्यादि। इसी कारण स्मृतियों में महर्षियों ने कहा है—

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पश्चिमवङ्गप्रदेशस्य स्वायत्तशासनमन्त्रिणः श्री ईश्वरदासजालानमहोदयाः एम्. ए., बी० एल् एवं विधिविशेषज्ञाः (एटर्नी ला) सन्ति। साम्प्रतमेते स्वायत्त-शासन-पंचायत-विधिविभागानां मन्त्रिणः। १९२७तः ३० पर्यन्तं कलिकाता-निगमस्य (कार्पोरेशन) सदस्या आसन्। तदनन्तरं सर्वसम्मत्या एते कांग्रेसस्य प्रतियोगिनो घोषिताः। १९३९ वत्सरे एते विधानसभायाः सदस्या अभवन्। १९४७तः १९५२ पर्यन्तं विधानसभायाः प्रवक्तारः आसन्। तदनन्तरमेते अद्यापि मन्त्रिपदारूढाः सन्ति।



दृष्टं माघेन—वृद्धाया अस्या ज्ञानं न साधारणम्। इदानीं सावधानमवदत्—"आवां क्षमावन्तौ"।

'भ्रातः! क्षमावती त्वेका पृथिवी अस्ति, द्वितीया नारी। भवन्तौ तु न द्वयोरनयोः कावपि।'

माघो विचलितोऽभवत्। पुनः संयतस्वरे अवदत्—'आवां परदेशिनौ'।

"असंभवमिदम्। परदेशिनौ केवलं द्वौ—'एकं जीवनम्, द्वितीयानि वृक्षस्य पत्राणि'।

राजा भोजो माघश्च पूर्णतया पराजितौ नतमस्तकौ आभूताम्। निजमज्ञानं स्वीकुर्वन्तौ अवदताम्—"मातः! आवां पराजितौ"।

वृद्धा नेदमपि स्वीचकार। प्रावदत्—'पराजितौ केवलं द्वौ एव, एकः ऋणी, द्वितीयः कन्यायाः पिता।' सत्यं वदतम्—'भवन्तौ कौ?'

भोजो माघश्च लज्जितभावेन तूष्णीमतिष्ठताम्। वृद्धा साम्प्रतम् अस्मयत—"भवान् भूपो भोजः भवांश्चो पण्डितो माघः। अयं मार्गः साक्षात् उज्जयिनीं गच्छति

'राजा भी सिर्फ दो हैं"—वृद्धा ने कहा—"इन्द्र और यम। आप राजा कैसे?"

माघ ने देखा, इस वृद्धा का ज्ञान साधारण नहीं है। संभलकर बोले—"हम क्षमावान् हैं।"

"भाई क्षमावान् तो एक पृथ्वी है, दूसरी नारी। और आप लोग इन दोनो में से कोई नहीं।"

माघ कुछ घबराये। फिर संयत स्वर में बोले—"हम परदेशी हैं।"

"असम्भव! परदेशी सिर्फ दो हैं—एक जीवन, दूसरा वृक्ष के पत्ते।"

राजा भोज और माघ ने पूर्ण पराजय में सिर झुका लिए और अपने अज्ञान को स्वीकार करते हुए कहा—"मां हम हार गये।"

वृद्धा ने इसे भी स्वीकार नहीं किया। बोली—"हारे हुए व्यक्ति सिर्फ दो हैं। एक कर्जदार, दूसरा लड़की का पिता। सच सच बताइये आप लोग कौन हैं?

राजा भोज और माघपण्डित लज्जित भाव से चुप खड़े रहे। वृद्धा अब मुस्कराई—"आप राजा भोज हैं और आप पण्डित माघ!.....यह राह सीधी उज्जयिनी जाती है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

कामाय स्पृहयत्यात्मा संयतोऽपि मनीषिणः ।
वीथीनियमितोऽप्युक्षा शष्पमासाद्य धावति ॥ १

मनीषी (बुद्धिमान्, मन को वश करनेवाले) का बस में किया हुआ भी आत्मा (मन) कामनाओं (कामादि) की तरफ जाता है, कामों को चाहता है। रास्ते में बांधा हुआ भी बैल यदि सामने घास आजाय तो उसके लिये दौड़ता है ॥ १

रोगशोकपरीतापबन्धनव्यसनानि च ।
आत्मापराधवृक्षाणां फलान्येतानि देहिनाम् ॥ २

बीमारी, फिक्र, मानसिक पीड़ा, रुकावट (कैद आदि में पड़ जाना) कोई संकट आजाना ये सब मनुष्यों के अपने आत्मा के द्वारा किये हुए अपराधरूपी वृक्षों के फल हैं ॥ २

किमाराध्यं सदा, पुण्यम्, कश्च सेव्यः सदागमः ।
को ध्येयो भगवान् विष्णुः, किं काम्यं परमं पदम् ॥ ३

प्रश्न—सदा क्या आराधना (करना) चाहिये ? उत्तर—पुण्य (अच्छा कार्य) । किसमें लगे रहना चाहिये ? उत्तर—सत् याने अच्छे आगम अर्थात् शास्त्रों में । किं वा सज्जनों के आगम यानि संगति में । किसको ध्यान करै ? उत्तर—विष्णु भगवान का । किसकी कामना करै ? परम पदकी मोक्ष की ॥ ३

रागे द्वेषे च माने च द्रोहे पापे च कर्मणि ।
अप्रिये चैव कर्तव्ये चिरकारी प्रशस्यते ॥४॥

किसी से स्नेह, अथवा मान (रोष), किसी से वैर अथवा कोई बुरा काम करना हो, किंवा दूसरों को बुरा लगेगा ऐसा कोई काम करना हो तो यहां देर से काम करने वाले की प्रशंसा होती है। अर्थात् ऊपर कहे हुए काम के वक्त जल्दी न करे, धीरे धीरे समझ के काम करे ॥४॥

कन्या निष्कासिता श्रेष्ठा वधूः श्रेष्ठा प्रवेशिता ।
अन्नं संकलितं श्रेष्ठं धर्मः श्रेष्ठो दिने दिने ॥५॥

कन्या को अपने पति के घर भेज देना यही श्रेष्ठ है और अपने घर की बहू को बुला लेना, अर्थात् घर में लाना श्रेष्ठ है। अन्न का जितना संग्रह किया जाय श्रेष्ठ है। और धर्म को करना प्रतिदिन श्रेष्ठ है ॥५॥

भूमिपतावर्थपतौ बाले वृद्धे तपोनिधौ विदुषि ।
योषिति मूर्खे गुरुषु च विदुषा नैवोत्तरं देयम् ॥६॥

राजा, धनी, बालक, बूढ़े मनुष्य, तपस्वी पुरुष तथा पूज्य विद्वान्, स्त्री जन, मूर्ख और अपने गुरु लोग इनके सामने समझदार पुरुष को जवाब नहीं देना चाहिये। अर्थात् जरूरत होने पर भी इनकी कही हुई बातों को ज्ञानी पुरुष सहन ही करते हैं, सामने जवाब नहीं देते ॥६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वश्रेष्ठ
मालवा फेब्रिक
कोरा, धुलाहुवा
कोरी, रंगीन तथा
धुलीहुई
दी इन्दोर मालवा युनाइटेड मिल्स लि.
पताः मिल प्रेमिसेस इन्दोर (मैध्यभारत)
फोनः जनरल ऑफिस-६०६३
" सेल्स मैनेजर-६००६
तारः मालवामिल
रजिस्टर्ड ऑफिसः सेकसरिया चेम्बर्स,
१३९ मेडोज स्ट्रीट, फोर्ट, बम्बई १
फोन: २५-२२१४-५-६
तारः इन्दोरमिल

पद्म-पुरस्कारः—कथा - प्रतियोगिता

'दिव्य-ज्योति' संस्कृतमासिकपत्रस्यापूर्वमायोजनम्

संस्कृतसाहित्य--प्रसाराय प्रचाराय च एतस्य नाटकीय--औपन्यासिक—कथानक-क्षेत्रेषु नवजागरणाय अखिल-भारतीय-संस्कृत-कथा--प्रतियोगिताया आयोजनं विहितम्

त्रयः पुरस्काराः—

प्रथमः पुरस्कारः १५०) द्वितीयः पुरस्कारः १००) तृतीयः पुरस्कारः ५०)

नियमाः—कथानकमाधुनिकपद्धत्या लिखितं स्यात् । एकसहस्रशब्देभ्योऽधिकं विस्तृता कथा न स्वीक्रियेत । पुरस्कृताः प्रशंसित च कथा "दिव्यज्योति" पत्रिकायां प्रकाशयिष्यन्ते ।

अन्तिमा तिथिः—२९ फरवरी १९६०

प्रतियोगितायां भागं ग्रहीतुं "दिव्य--ज्योति" षः ग्राहकता अनिवार्या

व्यवस्थापकः—

दिव्य-ज्योतिः कार्यालयः आनन्द लाज जाखू (शिमला)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पत्रादि के शीघ्र वितरण में हमारी मदद कीजिए

Postcard

हिमांशु जोशी,
के/३६ लाजपत नगर,
नई दिल्ली १४

पते में
जोन नम्बर
लिखना न भूलिये

लगभग सभी बड़े शहर डाक वितरण के लिए इलाकों या ज़ोनों में बांट दिये गये हैं!

ऐसे इलाकों की चिट्ठियों के छांटने का काम भी अलग अलग डाकखानों में किया जाता है। इस प्रकार की व्यवस्था से डाकियों को कम फासला तय करना पड़ता है और लोगों की चिट्ठियां जल्दी मिल जाती हैं। जिन पत्रों पैकेटों, आदि पर ज़ोन नम्बर लिखा होता है उन्हें सीधे ही उसी ज़ोन के वितरण-डाकघर में भेज दिया जाता है।

ऐसे पत्रों की छंटाई जिन पर ज़ोन नम्बर नहीं होता, तेजी से नहीं हो पाती और उन में देरी की संभावना बढ़ जाती है। यदि आप ऐसे शहर में रहते हैं जो ज़ोनों में बंटा है तो अपने पत्र भेजने वालों को बता दीजिए कि वे पते में ज़ोन नम्बर अवश्य लिखा करें।

हमें उत्तम सेवा का अवसर दीजिए

डाक-तार विभाग

DA 59/348

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

प्रकाशकः—जयबहादुरसिंह पताः—गोपालजी का रास्ता, जयपुर (राजस्थान)

Digitized by Arya Samaj Foundation Chennai and eGangotri

२४३

गीरवाणी

संस्कृतस्य पञ्चमुखं मासिकपत्रम्

सौराष्ट्रे सोमनाथं[१] च श्रीशैले मल्लिकार्जुनम्[२],
उज्जयिन्यां महाकालम्[३] ओङ्कारममलेश्वरे[४] ।
परल्यां वैजनाथं[५] च डाकिन्यां भीमशंकरम्[६],
सेतुबन्धे तु रामेशं[७] नागेशं[८] दारुकावने ।
वाराणस्यां तु विश्वेशं[९] त्र्यम्बकं[१०] गोतमीतटे,
हिमालये तु केदारं[११] घुसृणेशं[१२] शिवालये ॥

द्वादश ज्योतिर्लिङ्गानि

GURUKULA KANGRI LIBRARY HARIDWAR

वर्षम् १०

पञ्चमोऽङ्कः

वार्षिकमूल्यम् ४) चतस्रो मुद्राः, एकप्रते चत्वारिंशत् नवपणाः (४० नयेपैसे)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गागर में सागर



अणु-शक्ति के आविष्कार ने आज भौतिक-स्तर पर भी ज्ञान-योग आश्रित रस-रसायनों के सूक्ष्मीकरण सिद्धान्त को समझना आसान कर दिया है। एक विशिष्ट द्रव्य या धातु को यदि निरन्तर सूक्ष्म से सूक्ष्म (बारीक) किया जाय तो उस पदार्थ में निहित शक्ति प्रकट होने लगती है; रस-रसायनों के विलक्षण प्रभाव का यही रहस्य है। बैद्यनाथ रस-रसायन सैकड़ों-हजारों अग्निपुटों, औषध-संस्कारों और स्वरसभावनाओं के द्वारा सूक्ष्मीकरण की शास्त्र-सम्मत प्रक्रिया से तैयार होते हैं।

बैद्यनाथ रस-रसायन

देशी दवाओं का सब से बड़ा और विश्वासी कारखाना

बैद्यनाथ सिद्ध मकरध्वज, बैद्यनाथ बसन्तकुसुमाकर रस, बैद्यनाथ पूर्णचन्द्र रस वृहत्, बैद्यनाथ श्वास चिन्तामणि रस वृहत्, बैद्यनाथ योगेन्द्र रस आदि आदि बैद्यनाथ रस-रसायन स्वयं सूक्ष्म शक्तिपुंज होते हैं।

श्री बैद्यनाथ आयुर्वेद भवन प्राइवेट लि०
कलकत्ता · पटना · झाँसी · नागपुर · इलाहाबाद

भारतीय-औषधानां सर्वाधिकं बृहत्
विश्वस्तं निर्माणकेन्द्रम्

श्री बैद्यनाथ-आयुर्वेद-भवनम्

(प्राइवेट लिमिटेड)

कलिकाता, पटना, झाँसी, नागपुरम्, इलाहाबाद

सर्वेषामायुर्वेदिकौषधानां तथा सर्वरोगेषु उपयुक्तानां भेषजानां सावधानतया, वैज्ञानिकरीत्या प्रचुरपरिमाणे

निर्माणकारकम्

भारतवर्षे सर्वत्र एकमूल्ये भेषजानीमानि लभ्यन्ते

राजस्थानस्य विक्रयकेन्द्राणि

कांसली आयुर्वेदिकस्टोर्स—जौहरी बाजार, जयपुर
जोधपुर आयुर्वेदिकस्टोर्स—सर्राफा बाजार, जोधपुर
अजमेर आयुर्वेदिकस्टोर्स—स्टेशन रोड. अजमेर

राजस्थान मदास-मध्यप्रदेश सौराष्ट्र-भूपाल-उत्तरप्रदेश-बिहार-पञ्चनद-आन्ध्र-बम्बई-सर्वकारै स्वीकृता—

विषय-सूची

१.	वसन्तागमनम्	श्रीप्रह्लादचन्द्रः, डीडवाना व श्रीरतनलालमिश्रः, नागौर	
२.	गर्वपरिहारः	श्रीवासुदेवशास्त्री वागेवाड़ीकरः, शोलापुरम्	१०४
३.	वेदान्तदर्शनस्य वासनाभाष्यम्	श्रीमल्लिनाथशर्मा चौमालः, चूरू	१०५
४.	वेदस्य सर्वविद्यानिधानत्वम्	श्रीमोतीलालशर्मा, मानवाश्रम दुर्गापुरा	१०७
५.	ललनाचक्कलकम्	श्रीहरिकृष्णशास्त्री, जयपुरम्	१०९
६.	अनसूया	श्रीदीनानाथत्रिवेदी 'मधुपः' जयपुरम्	१११
७.	होलिका	श्रीशङ्करलालशर्मा, फतेहपुरम्	११५
८.	जीवनस्य पृष्ठद्वयम्	सह सम्पादकः	११६
९.	यदा स्त्रियः पुरुषवेशधारिण्यो भवन्ति	श्रीलक्ष्मीकान्त महादेव चक्रदेव, मुंबई	१२०
१०.	विनोद-वाटिका	सम्पादकः	१२१
११.	कूपे भङ्गा कथं पतिता ?	सह सम्पादकः	१२२
१२.	नवयुगे किं किं न जातम्	श्रीपद्मादत्त ओझा 'पद्म', ब्यावर	१२३
१३.	सम्पादकीयम्	सह सम्पादकः	१२४
१४.	सन्ध्योपासनम्	श्रीहरिशास्त्री दाधीच, जयपुरम्	१२५
१५.	व्याघ्रचर्मावृतगर्दभः	श्रीशिशुपिया, जयपुरम्	१२६
१६.	सूक्ति-सुधा	सम्पादकः	१२७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्र० सम्पादकः—
कविशिरोमणि
भट्टश्रीमथुरानाथशास्त्री
सहसम्पादक :—
देवर्षिकलानाथशास्त्री
साहित्याचार्यः एम. ए.
जयपुरम्

भारती

भानुवद् भारतीयानां भास्वद्भवनभासिनी ।
भागीरथीव भावाढ्या भारते भातु भारती ॥

प्रबन्धसम्पादकः—
गिरिराजशर्माशास्त्री
भारती-भवन
गोपालजी का रास्ता,
जयपुर

वर्षम् १० | फाल्गुनमासः, सं० २०१६ (मार्चमासः सन् १९६०) | अङ्कः ५

वसन्तागमनम्

आम्रं जनानां परितापहेतो-
र्विकाशयन् मंजुलमंजरीभिः ।
सन्तानकं पुष्पभरैर्नमन्नु
समागतोऽयं ऋतुराड् वसन्तः ॥१॥

कामं सुराज्याय कृतप्रयत्नान्
साहित्य-संरक्षणतत्परांश्च ।
आशायुतं नूतनभावपूर्णं
सन्देशयन्नेष इतो वसन्तः ॥२॥

सुवर्णवच्चम्पककुड्मलानां—
विकाशिवृक्षस्य च मंजरीणाम् ।
रसं सुधावत् स्वदति द्विरेफे
समागतोऽयं सरसो वसन्तः ॥३॥

पुष्पाणि काशयन्नित्यं-
चालयन्मन्दमारुतम् ।
नन्दयन्निखिलाल्लोकान्
प्राप्तः कामसखो मधुः ॥४॥

—प्रह्लादचन्द्रः शास्त्री, डीडवाना (राजस्थान)

गङ्गादितीर्थ-पुलिनेषु हरिं स्मरन्तः
सन्तो वसन्ति समये तव हे वसन्त !
त्वत्तो विना गिरिगुहासु निगूहितुं ते
स्वात्मानमह्नि किल कौशिकवद् भ्रमन्ति ॥५॥

वासन्तमेव परिधानमतिप्रकृष्टं
धृत्वा यदा प्रकृति-सुन्दरिका ननर्त ।
नैजप्रमादकरवेण पिकस्तदासौ
गीतं जगौ यमिमनोमदमान-भङ्गि ॥६॥

लज्जावनम्रकलिकानिकपालियूथो
गुञ्जन् मनोहरतमं निजगाद गत्वा ।
प्रेम्णाधुनाऽऽगमदये कुसुमाकरोऽयं
भर्तुर्वगुण्ठनमिदं कथमस्ति वोऽत्र ॥७॥

नृत्यं शिखण्डिविसरैः प्रकृतं प्रियाभिः
प्राप्ते वसन्त-समये कलिका नु यूयम् ।
प्रीणीत नोऽधर-सुधा-चषकं निपाय्य
प्रोचुर्द्विरेफ-निवहा मकरन्द-लुब्धाः ॥८॥

आशासतो बहुदिनानि वसन्तमित्थं
भृङ्गव्रजान् समवलोक्य वगुण्ठनं तत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गर्वपरिहारः

ले० म० पं० वासुदेवशास्त्री बागेवाडीकरः, साहित्याचार्यः काव्य-तर्क-वेद-तीर्थः, शोलापुरम्

एतत् सर्वेषां सुविदितमेव यथा श्रीकृष्णसहायो ज्येष्ठपाण्डवो धर्मराजोऽनुजैः सह राजलक्षणं राजसूयमियाज । यियक्षमाणेन युधिष्ठिरेण समाहूता नैके राजानो राजर्षयो ब्रह्मर्षयश्च तत्र समुपस्थिताः । अभिचैद्यं प्रतिष्ठासुर्भगवानपि उद्धववचनश्रवणादपेतयुद्धाभिनिवेशः सौम्यो हरिर्हरिप्रस्थं प्रतस्थे । धर्मनन्दनो यदुनन्दनं यमुनामतीतं शुश्रुवान् निजनगरान्तं सानुजः प्रत्युजगाम । कृताभिवादनो देवकीनन्दनः पञ्चभिः पाण्डुनन्दनैः समं पुरं प्रविशति स्म ।

अथ मयेन मणिदारु चारु इन्दुसरसः समानीय निर्मितं नीलमणीनां रश्मिभिर्हरितीकृतान्तरं कलधौतधवलशिलामयम्, अवधूतसुरराजसंसद् सदः सपदि समुपासदत् । भगवता श्रीकृष्णेन प्रेरितो युधिष्ठिरो मखं यष्टुं प्रवृत्तः । वाक्यविदः ऋत्विजः उच्चैरनुवाक्यया याज्यया देवतामुद्दिश्य द्रव्याण्यत्यजन् । तत्र यागे सामविद् सप्तभेदकरकल्पितस्वरं साम अस्खलितमुदगायत् । सूनृतवाचः सूरयः ऋग्यजुषम् अपठन् । दर्भमयं काञ्चिदाम बिभ्रत्या यजमानजायया वीक्षितानि हवींषि प्रणयनादिभिः संस्कृते वह्नौ आजुहुवुः । तत्र ऋत्विजां धियो राज्ञः संपदश्च परस्परमत्यशेरत । पाकशासनसमानशासनः स भूपः पङ्क्तिशः अधिगम्य पंक्तिपावनेभ्यो ब्राह्मणेभ्यो राजसूयकीर्दक्षिणा दत्तवान् । भूयसीर्भूमीः आचन्द्रदिवाकरं द्विजसात्कृतवान् । समयकांक्षिणो भूमिपाला दुरासदान्यपि वस्तुरत्नानि स्वयमुपनीय तस्मै राजसूयदीक्षिताय उपायनीकृतवन्तः । अनुदिनं च विविधैः भक्ष्यभोज्यलेह्यचोष्यादिभिर्मिष्टान्नैः पायसादिभिः सूपान्तैः पाकैः सर्वेषां खादतमोदता चिरमवर्तत ।

एतादृशं महाक्रतुं यजमानो धर्मराजः किञ्चिदहङ्कारावेष्टः । "नास्ति मत्समो याजको न भूतो न भविष्यति च । यस्य मम यज्ञमहोत्सवे साक्षाद् भगवान् द्वारकाधीशः श्रियः पतिः परिवेष्टा" इति । तत्रैव सन्निधौ द्विजपंक्तिषु परिवेष्टा भगवान् श्रीकृष्ण इमं युधिष्ठिरस्याहङ्कारं तत्क्षणं विज्ञातवान् । मन्दं मन्दं च जहास ।

अथ क्षणेन कोऽपि नकुलः सुवर्णार्धकायस्तत्र समागत उच्छिष्टेषु लुलोठ । अनवलोकितपूर्वं तं कनकाधिष्ठितकायं नकुलं विलोक्य सकला अपि विस्मयापन्नाः । अत्रान्तरे धर्मसूनुः पुरस्सृतस्तं पप्रच्छ—"अयि भोः कस्त्वम् ? तवार्धशरीरमेव कथं हिरण्मयम् ? किमित्यत्रोच्छिष्टेषु लुठसि ? कथय" इति ।

अध्वरदीक्षितेन तेन राज्ञा पृष्टः स नकुलो मनुष्यवाचोवाच—"भो राजन्, श्रूयतां ममार्धदेहः कथं सुवर्णमयः संजात इति । इतो नातिदूरवर्तिनि ग्रामे कश्चन परमधार्मिको दानशौण्डो ब्राह्मणो निवसति । याचकेषु वितीर्णाखिलधनः स निर्धनो जातः । एकदा महति दुर्भिक्षे स ब्राह्मणः सकलत्रपुत्रो मासमेकम् अनासादितभैक्ष्य उपोषित आसीत् ।

प्रेमैकतानमनसा कलिकास्तदानीं
दूरीविधाय परिषस्वजिरे विनम्राः ॥९॥
वल्लर्य एव कुसुमाकर आगतेऽत्र
नेदिष्ठपादपगणान् परिषङ्क्तुकामाः ।
ऊर्ध्वं प्रयान्ति सततं परितः प्रसृत्य
सर्वत्र तेऽपि सुरभे रमतेऽनुभावः ॥१०॥
शीतोष्णयोर्मिलितयोः कुसुमाकरतौ
यद् द्वयाश्रयं सुखमलं लभते मनुष्यः ।
तद्वै गिरा गणयितुं गणकोत्तमोऽपि
शक्तो न शक्तिशिवयोरिव दर्शनोत्थम् ॥११॥

ले० श्रीरतनलालमिश्रः व्याकरणशास्त्री, काव्यतीर्थम्
नागौर, राजस्थानम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदान्तदर्शनस्य वासनाभाष्यम्

(ले० श्रीमल्लिनाथशर्मा चौमालः, चूरू राजस्थान)

देवयानमार्गस्य वास्तविक स्वरूपन्तु एतादृशं विद्यते—भूपृष्ठात् ब्रह्मलोकपर्यन्तं प्रकाशात्मको मार्गः। अत एव गीतायामपि एषः मार्ग शुक्लगतिरूपेण निर्दिष्टः। यथा–"शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते" इति। भूपृष्ठात् आदित्यपर्यन्तं सूर्यस्य प्रकाशः। अग्रे चन्द्रमसः प्रकाशः। अनन्तरं विद्युत् नामकस्य पिण्डस्य प्रकाशः। अन्ते ब्रह्मणः पिण्डस्य प्रकाशः। एवं भूपृष्ठात् ब्रह्मलोकपर्यन्तं प्रकाशमयो मार्गो भवति। परन्तु भूपृष्ठसमीपे रात्रि आदि अन्धकारस्य अवरोधनं भवति। तत्र प्रथमं अर्चेः ध्रुव-विद्युत्प्रकाशेन प्रकाशो भवति। अनन्तरं स ब्रह्मणः प्रजापतेः अन्तिकम् गच्छति। तदनन्तरं सूर्यलोकं, सूर्यलोकात् अनन्तरं अन्येषु लोकेषु गच्छन् ब्रह्मलोकं गच्छति। एषः प्रकाशात्मको मार्गो देवयानः।

देवयानमार्गे उपासकः रश्म्यनुसारी भवति। यथा भगवती श्रुतिर्वदति--"अथ यत्रैतदस्माच्छरीरादुत्क्रामत्य-थैतैरेव रश्मिभिरूर्ध्वमाक्रमते" (छा. ८।६।५) अर्थात् उपासकस्य शरीरात् लिङ्गशरीरं उत्क्रामति। स च एतैः सूर्य रश्मिभिःऊर्ध्वं आक्रमते ऊर्ध्वं गच्छति इत्यर्थः अग्रे आचार्यो वदति "निशि नेति चेन्न. सम्बन्धस्य यावद्देहभावित्वाद् दर्शयति च" अत्र एतत् न निश्चितं रात्रौ दिने वा रश्म्यनुसारित्वम् कदा भवतीति, परन्तु श्रुतेरनुसारं रात्रौ रश्म्यनुसारित्वम् न भवति, परन्तु आचार्यो निषेधं न करोति। स रात्रावपि रश्म्यनुसारित्वम् वदति, यतः सम्बन्धस्य यावद्देहभावित्वाद् अथोच्येत—न खलु मूर्धन्यनाड्या निष्क्रामतो ब्रह्मोपासकस्य ब्रह्मलोक-गमनाय सूर्य्यरश्म्यनुसारित्वमुपपद्यते। रात्रौ तद्धेतुनाड़ी-रश्मिसम्बन्धस्य विच्छेदात्। न च तन्निष्क्रमणं दिवैव

अथैकदा तेन महता प्रयत्नेनाञ्जलिमात्रं सक्तुपिष्टं समासादितम्। तेन समुत्पन्नया अंशतोऽपि क्षुधोपश-माशया सन्तुष्टः सपरिवारः स द्विजः कञ्चित् कालं महान्तं मनःसन्तोषमनुबभूव। तद् यावत्तो सर्वे भक्षयितुं प्रव-र्त्तन्ते तावत्कोऽप्यतिथिस्तद्द्वारदेशं सम्प्राप्त उवाच—"भो ब्रह्मन्, बहोः कालाद्भृशं क्षुधार्तोऽहम्। सत्वरं मे किञ्चिद्भक्ष्यं देहि" इति।

तन्निशम्य क्षुधाकुलानां कलत्रपुत्राणां दीनाननानि वीक्ष्य क्षणमेव स भूसुरश्चिन्तातुरो बभूव। परं सपत्न्येव सानन्दः सन् स तत् पिष्टं तस्यातिथेर्हस्ते समर्पितवान्।

भोः क्षत्रियोत्तम, त दूर्ध्वं तस्य पाणिद्वयस्य पराम-र्शाद् भूमौ विकीर्णे पिष्टे समीपस्थोऽहमलुठम्। तेन पिष्टेन ममार्धमङ्गं सुवर्णमयं संजातम्। संप्रत्यवशिष्ट-मर्धमङ्गं हेममयं संपादयितुमनसा मया भवतो दानशूरस्य यत्रोच्छिष्टे लुठितम्। परं तद् यथापूर्वमेव वर्तते। एतेनाहमेवं मन्ये मासमेकमुपोषितस्य मुष्टिमात्रमपि पिष्ट-मन्यस्मै ददतस्तस्य दानशौण्डत्वं वरं, न तु सर्वैश्वर्यसम-न्वितस्य तवैतत् समृद्धतमम्" इति।

एवमूचिवान् स नकुलो झटिति तस्मात् स्थानान्नि-र्गतः। तदा भगवान् कर्मोपदेष्टा हरिः साभिप्रायं तं विलोकयामास। अनेन विलक्षितो युधिष्ठिरोऽधोमुखताम-गच्छत्। क्षणार्धाद् विदितवेदितव्यः स भगवतश्चरणौ समस्पृशत् उवाच च—

"नाहं कर्ता हरिस्त्वं हि त्वत्पूजा कर्म चाखिलम्।
दूरादपि मखेषु त्वम्, इज्यसे भुवनत्रये॥
मगैवेदं कृतमिति मन्यते, मनुजो वृथा।
तेन दुःखमवाप्नोति मुच्यते ज्ञानयोगतः॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्यान्न रात्राविति नियन्तुं शक्यते । तस्यादृष्टाधीनत्वेनानियम्यत्वादिति । नैतद् वक्तव्यम् । यावच्छरीरभावित्वात् । यावच्छरीरभावी खलु नाडी–रश्मि–सम्बन्धो विद्यते । स यथा दिवाऽनुवर्तते, तथा रात्रावपि वर्तते, न कदाचिद् विच्छिद्यते । एतदपि न वक्तव्यम्, यतो रात्रौ रश्मेर्नाड़ीसम्बन्धो न भवति । यस्या भगवत्याः श्रुत्या आधारेण निशि नेति सूत्रं सूत्रितं, सा श्रुतिश्चैषा-- "तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमं चामुं च, एवमेवैता आदित्यस्य रश्मय उभौ लोकौ गच्छतीमं चामुं च । अमुष्मादादित्यात् प्रतायन्ते ता आसु नाडीषु सृप्ताः, आभ्यो नाडीभ्यः प्रजायन्ते तेऽमुष्मिन्नादित्ये सृप्ताः" (छा. ८।६।२) । भगवता बादरायणाचार्येण अस्याः श्रुतेः अर्थम् अबुध्वैव निशि नेति सूत्रं रचितं, श्रुतिस्तु कथयति यथा महापथ आततः विस्तृतः, उभौ ग्रामौ गच्छति इमं च अमुं च । एवमेव एता दित्य आदित्यस्य रश्मय उभौ लोकौ गच्छन्ति, इमं च अमुं च अमुष्माद् आदित्यात् प्रतायन्ते । ता आसु नाडीषु सृप्ताः आभ्यो नाड़ीभ्यः प्रतायन्ते । ते अमुष्मिन् आदित्ये सृप्ताः अत्र यथा कोपि महापथः महामार्गः उभयोः ग्रामयोर्मध्ये स्थितः उभयोः ग्रामयोरेव मार्गो भवति । तथैव एता आदित्य रश्मय उभौ लोकौ गच्छन्ति, भूलोकं सूर्यलोकं प्रति गच्छन्ति । एवमेव आदित्यस्य रश्मयः सूर्यलोकात् भूलोकं प्रति आगता उपासकस्य नाड़ीषु सृप्ताः भवन्ति आभ्यो नाड़ीभ्यः प्रतायन्ते । अनया श्रुत्या यावद्देहभावित्वम् न सिद्ध्यति । यतः यत्र भूलोके आदित्यस्य रश्मयः सृप्ताः भवन्ति, तत्र रात्रिः कदापि भवितुं नार्हति । अतः रात्रौ सूर्यरश्मीनां नाड़ीभिः सह सम्बन्धः कथमपि न भवति ।

अत्रैवमुक्तं भवति भूपिंडोपरि यत्र सूर्यस्य रश्मयः पतन्ति, तत्र दिनं, यत्र न पतन्ति तत्र रात्रिः । रात्रौ उपासकस्य मरणे कथं सूर्यरश्मिभिःसह नाडीनाम् सम्बन्धो भवेत् । अतः निशि नेति सूत्रं विचारणीयम् । यथा अस्याः श्रुत्या भगवता बादरायणाचार्येण अर्थः कृतः तथा कर्णेन छान्दोग्योपनिषद् ५।१०।२ श्रुतौ "अह अन्ह आपूर्य्यमाणपक्षं आपूर्य्यमाणपक्षात् यान् षडुदङ्ङेति मासान् स्तान्" इत्यादि कालवाचिका श्रुतिः व्यर्था भवति । अतः निशि नेति सूत्रे आचार्यस्य मतं, न सम्यक् । अतः यमर्थमङ्गीकृत्य आचार्येण निशि नेति सूत्रं लिखितं, तत् न । तन्न समीचीनम् । अतः उपासकस्य नाड़ीनां रात्रौ सम्बन्धो न । एवमेव अतश्चायनेपि दक्षिणे इत्यपि सूत्रं व्यर्थं, तेन पाठकरणे पुण्यप्रदमेव । अतः दक्षिणायनेपि सुमेरुस्थितानामुपासकानां नाडीनां सूर्य रश्मिभिः सह सम्बन्धः कथमपि भवितुं नार्हति । यतः मेरुस्थाने दक्षिणायनकाले दिनं भवत्येव न तत्र षण्मासपर्यन्तं सूर्यस्य दर्शनम् एव न भवति अतः रश्मिभिः सह नाड़ीनां सम्बन्धः कथं भवेत् ।

"योगिनः प्रति च स्मर्य्यते स्मार्ते चैते," अस्य व्याख्या—योगिनः प्रति च केवलं प्राणायामाभ्यासिनः स्वच्छन्दमृत्यवोऽत्र योगिनो विवक्ष्यन्ते, तान् प्रत्येव स्मर्य्यते = दक्षिणायनमावृत्तिकारणमनावृत्तिकारणं चोत्तरायणमुत्क्रमणे स्मर्य्यते, स्मार्ते च । स्मृतिप्रतिपाद्ये चैते = दक्षिणायनोत्तरायणे इत्यर्थः । अत्र आचार्येण एतत् प्रदर्शितं च । इह श्रौतो अर्थः खलु विचार्यते । परन्तु अत्र उत्तरायणदक्षिणायनात्मकः कालः श्रौत एव, न स्मार्तः । "तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते, तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरहनः आपूर्य्यमाणपक्षमापूर्य्यमाणपक्षाद् यान् षडुदङ्ङेति मा सांस्तान् । मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत् पुरुषोऽमानवः स एनान् ब्रह्म गमयत्येष देवयानः पन्थाः" (छा. ५।१०।२) अत्र अह आपूर्य्यमाणपक्ष उदङ्ङेति माँसास्तान् इत्यादि शब्दाः श्रुतौ एव लिखिताः । अतः एषः विषय श्रौत एव, न स्मार्तः

"अथ य इमे इष्टापूर्त्ते दत्तमित्युपासते
ते धूममभिभवन्ति, धूमाद्रात्रिं रात्रेरपरपक्ष–
मपरपक्षाद्यान् षड् दक्षिणेति मासास्तान्,
नैते सम्वत्सरमभिप्राप्नुवन्ति ।"

(छा. ५।१०।३)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदस्य सर्वविद्यानिधात्वम्

शास्त्रीः मोतीलालशर्मा मानवाश्रम दुर्गापुरा

इह खलु जगतीतले लब्धजन्मानः सर्वेऽपि मानवाः स्वाभ्युदयमैकान्तिकं सुखं च नित्यं कामयन्ते । कामयमानाश्च ते मन्यन्ते उपागतं दुःखं विषसंपृक्तान्नमिव । तदुन्मूलनाय बहुशः प्रयतमाना अपि ते निराशासमुद्रे—इतस्ततो दन्द्रम्यमाणा एवावलोक्यन्ते । तदित्थं भूपृष्ठेऽवतीर्णानां सर्वविधप्राणिजातेः ज्ञानक्रियार्थशक्तिविषये मूर्द्धन्यभूतानां, पुरुषार्थाधिष्ठातृत्वेन पुरुषपदाभिधानां, मनुवंशे समुत्पन्नानामेतादृशां मानवानामनवरतमुद्योगेनापि कुतो न लेशतोऽपि सुखप्राप्तिरिति सुलभतयैव प्रष्टुं शक्यते भवद्भिः । तस्यैतस्य प्रश्नस्यानेकान्यपि प्रत्युत्तराणि दीयन्तां नाम लोकैस्तथाप्यस्माकं त्वेष एव दृढनिश्चयः—यत्सर्वविद्यानिधानस्य, ज्ञानविज्ञानप्रवर्त्तकस्य, सर्वेषां श्रौतस्मार्त्तधर्म्माणां, कर्म्मणाञ्च मूलप्रभवस्य ब्रह्मणो निःश्वसितस्यात एवापौरुषेयाभिधस्य वेदपुरुषस्योपासनाविरह एवात्र प्रश्ने समाधानरूपेण परिस्फुरति नाममात्रेण श्रीमतामप्यश्रीमतां तत्रभवतां भवतामङ्गभक्तानां विदुषामग्रे—इति ।

क्षमाशीलास्तत्रभवन्तो गीर्वाणवाणीभक्ताः । आतश्च क्षमयन्तु मे धृष्टताम् । व्याकरणसाहित्य—न्याय—ज्यौतिष—छन्दः—कल्पादीनामङ्गानामेवाध्ययनाध्यापने बद्धपरिकरा अद्यतना भारतीया विद्वांसो वेदार्थपरिशीलने सर्वथा तटस्था एवेति सार्वजनीनम् ।

"योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः" ॥

—मनुः २।१६८

इति हि राजर्षि-मनोरुक्तमपि साम्प्रतं व्यर्थतामगादित्यपि सार्वजनीनम् । अस्माकमात्मकेऽपि मूले वेदपुरुषे प्रतिष्ठितः सनातनधर्म्मप्रासादोऽद्य कम्पित इव भग्न इव भूत्वा भूयो भूयस्तान् वेदविहितान् धर्म्मरक्षकान्, धर्म्मोपदेशकान्, महामहोपदेशकांश्च अभिशप्यतीत्यपि सार्वजनीनम् । ज्ञानलवदुर्विदग्धा पाश्चात्यशिक्षोच्छिष्टभोगिनो भारतीया अद्य वेदप्रतिष्ठसनातनधर्म्ममेव सर्वविधोन्नतेः परिपन्थिनमाकलयन्तीत्यपि सार्वजनीनम् । "भारतीयाः केवलमात्मदर्शने एव निपुणाः । 'नित्यं विज्ञानमानन्दं ब्रह्मे' ति मुखरा लपन्तोऽपि ते विज्ञानशून्याः, अत एव ते सर्वशून्याः इत्येवंरूपेणास्ति पाश्चात्यानां वो घण्टाघोषस्तं प्रत्यहं शृण्वन्तोऽपि राजनीतिकाद्यनुसारिणो विद्वांसो न शृण्वन्ति । शृण्वन्तोऽपि तत्प्रतीकारोपायं न विचिन्वन्ति । विचिन्वाना अपि न पश्यन्ति प्रतीकारम् । तदित्थं वेदस्वाध्यायविमुखा अद्य विद्वांसोऽहर्निशं धर्म्मनिष्ठामाजपन्तोऽपि धर्म्मरक्षायामसमर्थमेवात्मानं भावयन्ती भोगैव मन्त्रौषधिरुद्धवीर्या एवासते-इति मुकुलितनयनैर्भावनीयम् ।

तस्मात्—

१—"वेद एव द्विजातीनां निःश्रेयसकरः परः" ।

२—"धर्म्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः" मनुः २।१३)।

३—"वेदाद्धर्म्मो हि निर्बभौ" मनुः ६।४४)।

४—"वेदमेवाभ्यसेन्नित्यम्" मनुः १।८७)।

५—"वेदोऽखिलो धर्म्ममूलम्" मनुः २।६)।

अत्रापि-श्रुतौ रात्रि, अपरपक्ष, यान् पेड्दक्षिणेति मासास्तान् इत्यादि शब्दाः श्रुतौ एव लिखिताः । अतः दक्षिणायनमार्गोऽपि श्रौत एव न स्मार्त्तः अतः आचार्येण सूत्रे "स्मार्ते" चैते इति कथनं न सम्यक् अर्थात् उत्तरायणदक्षिणायने श्रौते एव न स्मार्त्ते अतः एतत् सूत्रमपि प्रत्याख्यातव्यम् पाठमात्रे पुण्यप्रदं ज्ञेयम् ।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[illegible] वेदात् प्रसूयते" मनुः १।२३७॥

[illegible] विषयेऽस्मिन्

[illegible] वेदपुरुषस्यैवा-

[illegible] तत्र,—

[illegible] सकाशादग्रजन्मनः ।

[illegible] शिक्षेरन् पृथिव्यां सर्वमानवाः" ॥

—मनुः २।२०।

इति प्राप्तवरस्य पिप्पलादो भविष्यामो वयमिति [illegible] मतोवेदनां निवेद्य—"कथं वेदः सर्वविद्यानां निधानम्?" इत्येतस्य प्रश्नस्य समाधौ यत्नः क्रियते ।

वेदस्य सर्वविद्यानिधानत्वनिरूपणात् प्राक् वेद-विद्या-शब्दयोर्निर्वचनमावश्यकम् । कोऽयं वेदपदार्थः?, कथं च सा विद्या?, इत्युच्यते जिज्ञासा । तत्र तावत् प्रथमं वेदस्वरूप एव तन्नेपेण पुरत उपस्थाप्यते श्रीमतां वेदितॄणाम् । अस्ति सत्तार्थको विदधातुरन्यः, लाभार्थको [illegible] ज्ञानार्थको विदधातुश्च तृतीयः । विदलृ लाभे, विदलृ सत्तायां, विदज्ञाने-इति-पाणिनिस्मरणात् । तत्र विद्यते-इति वेदः, विन्दति-इति वेदः, वेत्ति-इति वेदः-इति कृत्वा वेदशब्दस्य त्रीणि विवर्त्तानि भवन्ति । विद्यते-इति सत्ताभावमाह, विन्दति-इति रसभावमाह, वेत्ति-इति च ज्ञानभावमाह । सत्ताभावः सत्, रसभाव आनन्दः—'रसो ह्येवायं लब्ध्वा आनन्दी भवति' इति श्रुतेः । ज्ञानं चित् । तदित्थं विद्यते-विन्दति-वेत्ति इति कृत्वा वेदस्य सच्चिदानन्द-[illegible] । तत्-प्रमेयभावः साधूपपद्यते । यदिदं सच्चिदानन्द-[illegible] सोऽयं वेदपदार्थः इति निष्कृष्यते । अत एवेश्वर-[illegible] वेदविरूपणोपस्तूयते तत्र तत्र श्रुतिस्मृत्यादिषु । 'वेदैश्च सर्वैरहमेव वेद्यः' इत्यादि स्मृत्या वेदोपाधि-[illegible] ब्रह्मण एव वेद्यत्वं निरूप्यते ।

[illegible] विश्ववपदार्थानां योऽयं प्रत्ययः, [illegible] यदिदं ज्ञानं, तत्सत्यमपि वेदशब्देन वक्तुं [illegible] । घटोऽस्ति, पटोऽस्ति, मठोऽस्ति, पुरुषोऽस्ति, [illegible] रसस्वरूपेण सामान्यतः प्रतीयमानो यः सत्ताभावः, अस्तित्वं वा, सा वेदस्यैका कला सोऽयं ऋग्वेदः । सत्तोपलब्धिरेव ऋग्वेदः । स एष प्रस्ताव-स्थानीयः । घटोऽस्ति—इति प्रथमं पर्व । तमहं जानामि—इति द्वितीयं पर्व । घटोऽस्ति, तमहं जानामि । तद्वस्तुन एवोपलब्धिर्भवति । घटो नास्तीति नोपलभ्यते, न ज्ञायते । 'यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते' इति हि कथाशास्त्रराद्धान्तः । तदिदं ज्ञानात्मकं द्वितीयं पर्व चेतनोपब्धिः । स एष उद्गीथस्थानीयो यजुर्वेदः । यस्य तत्त्वविशेषस्य अस्तित्वं, यस्य च ज्ञानं, सोऽयं रसात्मकस्तृप्तिलक्षणस्तृतीयोऽन्यभावः । स एष आनन्दः आनन्दस्यैव सत्ता, आनन्दस्यैव ज्ञानम् । आनन्दमयाभ्यां सत्ताज्ञानाभ्यामेवात्मनि शान्तिभावोदयः । सैषानन्दोप-लब्धिमुख्या । 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते, आनन्देन जातानि जीवन्ति, आनन्दं प्रयन्त्यभिसंविशन्ति' इत्यादिश्रुतेस्तथैवाम्नातत्वात् । आनन्दप्राप्त्यनन्तरमात्मा उपशान्तो भवति, विरमति । सैमानन्दमयी-अवसानभूमिरात्मनः । अवसानं साम । स एष आनन्दलक्षणोऽवसनाधिष्ठाता तृतीयः सामवेदो निधनस्थानीयः । तथा च प्रस्तावोद्गीथनिधनभावैः कृतरूपा सच्चिदानन्दोपलब्धिमयी सैषा वेदत्रयी एव सर्वत्र नामरूपकर्मभिर्व्याकृताऽवलोक्यतेऽवलोकयद्भिः । नान्यो ऽन्यत् किञ्चिदस्ति । 'सर्वं खल्विदं ब्रह्म'—'नित्यं विज्ञानमानन्दं ब्रह्म'—'सत्यं ज्ञानमनन्तं ब्रह्म'—इति हि वेदमहर्षयः प्राहुः । तस्यैतस्य ब्रह्मणः सर्वतो अस्तिलक्षणोपलब्धिरूपवेदाधीनैवेति कृत्वोपनिषच्छ्रुतिराह—

नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा ।
अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते ॥१॥
अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयोः ।
अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति ॥२॥

—कठोपनिषत् ६।१२,१३ ।

तमेतमानन्दज्ञानगर्भितं, अस्तिभावात्मकं, वेदमूर्ति मीश्वरभावं मन्यमानास्तत्र श्रद्दधाना पुरुषश्रेष्ठा एव 'आस्तिकाः' इति जोषुष्यन्ते । ये तु मूढधियः सर्वशून्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ललनाचक्षुःशतकम्

ले० श्रीहरिकृष्णशास्त्री, जयपुरम्

नारीनयने नवरसाः

दोहाच्छन्दः—

नारीनयने नवरसा, नवनवतामुपयान्ति ॥
नयनपथं याते प्रिये, पत्यौ भावा भान्ति ॥१॥

शृङ्गारः सुतनोर्विभाति नयने, दृष्टेऽनुरक्तप्रिये
वीरः सौरतसङ्गरे विजयिनोः प्रत्यर्द्धिभावोद्धते ।
सद्यो योगवियोगसर्जनपटौ सद्भ्रूविलासेऽद्भुतः
कारुण्यामृतनिर्झरेऽथ करुणः प्रेमारुणे चक्षुषि ॥ २॥

हास्यः सस्मितवीक्षणेन विकचन्नेत्रारविन्दे द्वयोः
रौद्रः क्रोधकषायितेऽक्षिणि, बलादागत्कृताऽऽलिङ्गने ॥
बीभत्सोऽथ भयानकः प्रियतमे दृष्टे सपत्नीरते,
शान्तः साञ्जलिबद्धपादविनमद्बालप्रियालोकने ॥३॥

ललनाऽवयवेषु षड्ऋतुविलासाः

कपोले लोलाक्ष्या विलसति वसन्तस्य सुषमा
भ्रुवोर्मध्ये माने क्षणकुटिलभावेऽथ तपनः ॥
स्फुरत्प्रेमाधारे प्रणयिनवलोकैकमरणे
सुधासारे प्रावृड् लसति रमणीनेत्रयुगले ॥
शरत्स्मेरावासे द्विजकुमुदकाशेऽनि-मधुर-
स्रवत्स्नेहोल्लासे सुललितविकासे हि वचसाम् ॥
अहोऽयं हेमन्तः प्रणयिविपदन्तोऽथ निटिले
ससीत्कारे हारे ह्यधरघनसारे च शिशिरः ॥

वादिनः, अतएव क्षणिकवादिनः, अतएव स्वलक्षणवादिनः, अतएव च दुःखवादिनो लौकायतिका न ते वेदमयमस्तिब्रह्मोपासते, नापि तत्रास्तिब्रह्मणि श्रद्धां कुर्वन्ति, त एते नास्तिसारा यथाजाता नास्तिकशब्देन व्यवह्रियन्ते वैज्ञानिकैः ।

पूर्वोक्तस्य सच्चिदानन्दलक्षणस्य वेदस्य रसवेदः, वितानवेदः, छन्दोवेदः, अग्निवेदः, सोमवेदः, स्थितिगतिलक्षणो वेदः, इत्येवमादयोऽनेके विवर्त्ता भवन्ति । तेषामेतेषां विवर्त्तभावानामीशोपनिषद्भाष्यादौ सुविशदं निरूपणमिति—अप्राकृतत्वादिदं वेदस्वरूपनिर्वचनादविरम्यते । सेयं संक्षिप्ता वेदनिरुक्तिः प्रदर्शिता त्रयस्या ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

टिकट सावधानी से चिपकाइये

इससे

डाक प्रेषण में शीघ्रता आती है



• तोल के अनुसार ठीक टिकट लगाइये

कम टिकटों और बिना टिकटों वाली चिट्ठियां देरी से पहुंचती हैं, क्योंकि छंटाई के समय उन्हें हिसाब लगाने के लिए अलग रख दिया जाता है।



• टिकट, पते वाली तरफ ऊपर के दाहिने कोने में चिपकाइये

इससे छंटाई के काम में कम समय लगता है और साथ ही स्वचालित मशीन से मुहर लगाने का काम तेजी से होता है।



• आवश्यक मूल्य की कम से कम टिकटें लगाइये

इससे साफ पता लिखने के लिए काफी जगह बच रहेगी और टिकटों पर मुहर लगाने में भी सुविधा होगी।



• टिकट अच्छी तरह चिपकाइये

अच्छी तरह न लगे टिकट यदि गिर गए तो उन पत्रों को बेरंग अथवा कम टिकट वाले पत्र समझा जाता है। इनके जाने में देरी भी हो सकती है।

अपर्याप्त और ठीक ढंग से टिकट न लगाने से पत्रों के पहुंचने में देर ही नहीं लगती अपितु उससे समूची डाक-व्यवस्था में अड़चनें पैदा हो जाती हैं।

अपने टिकट ध्यान-पूर्वक लगाइये

हमें उत्तम

सेवा का अवसर दीजिये

डाक-तार विभाग

DA 39/356

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनसूया

ले० श्रीदीनानाथत्रिवेदी 'मधुपः' दर्शनशास्त्री, जयपुरम्

दधार निश्छलां भक्तिं पत्यौ या देववन्दिता ।
सर्वत्र विगताऽसूया साऽनसूया प्रणम्यताम् ॥

पतिव्रताशिरोमणिः रमणीकुलवन्द्याऽनसूया भगवती भगवतः कर्दममहर्षेः सकाशाद् देवहूत्यां लेभे जनिम् । सांख्यशास्त्रप्रवर्त्तकः कपिलदेवो महानुभावोऽस्याः सहोदरस्तथाष्टौ भगिन्यश्चासन् सा हि सर्वास्वपि भगिनीषु सरलस्वभावा महामतिमती धर्मे च विशेषां रुचिमादधाना समवर्तत । वेदादिसकलशास्त्रप्रवीणेन जपतपोनियमपरायणेन महर्षिणाऽत्रिणा सह चास्याः सम्बभूव विवाहाख्यः सम्बन्धः । सा हि मुनेः शुश्रूषणमेव मन्यतेस्म परमं धर्मम् । सा वेत्तिस्म—सम्यग्—यदत्रैव सर्वमपि वर्तते कल्याणं निहितम्-इति । एवं सा सती संसारेऽस्मिन् सर्वविधमपि दुःखमनुभूय पूर्वं, पश्चात् साहसं धैर्यं च न मनागपि परित्यजन्ती महान्तममन्दमानन्दमवाप ।

एकदा देशेऽतिदुःखदं दुर्भिक्षमपतत् । सर्वेषामपि प्राणिनां कृते तदानीमन्नकणाः सुजना इव बभूवुर्दुर्लभाः । पादपानां पर्यशुष्यन् पुष्पाणि फलानि मूलान्यपि । जगत्यां सर्वेऽपि जना जन्तवश्च क्षुत्क्षामकण्ठाः समजायन्त । तस्मिन्नेव काले पवित्रीकर्तुमात्मानं दृढीकर्तुं च स्वभावं महामुनिः सः योगाभ्यासमासेवितुमभूत् तत्परः । सुदीर्घं कालं यावदत्रेः सोऽयं समाधेर्योगः प्रचलति स्म । यदा समाधिविधिं समाप्योत्तिष्ठति स्म, तदा येन केनाप्युपायेनाऽनसूया तस्य क्षुत्पिपासे परिहरति स्म । व्यतीतेऽपि सुमहति काले नानाविधानि दुःखानि सहमानाऽपि सा पतिसेवापरायणैवाऽऽसीत् । अन्नप्राप्त्यभावेन कदाचन सा निरशनैव सर्वं दिनमतिवाहयति स्म । केवलमासीत्तस्याश्चेतसि चिन्तेयमेव यत्— मुनिः समाधितो यदोत्तिष्ठेत्, तदा तस्य कृते न किञ्चिदपि कष्टं भवेदिति । किं च कायेन वाचा मनसा सा रात्रिन्दिवमपि विचारधारायामस्यामेव निमग्ना तिष्ठति स्म । यद्यप्यासीत् क्षुधापीडिता जनता, तथापि यावत्स मुनिर्ध्यानादुन्मीलयति स्म लोचने, तावत् "किमभिलष्यते पतिदेव ! जलमिदमस्ति । कन्दमूलफलान्यपि विद्यन्ते" इत्येव ब्रुवाणां बद्धाञ्जलिं पुरतः स्थितां तां पश्यति स्म ।

दुर्भिक्षस्य दुष्प्रभावेणानुदिनमेधन्ते स्म विविधा बाधाः । यस्मात् सलिलाशयात् सलिलं लभ्यते स्म, सोऽपि शुष्कतामयासीत् । अत एव तत्रत्या अन्ये मुनयस्तत्स्थानं परित्यज्यान्यत्र गताः ।'इदानीमहं पानीयं कुतः समानेष्यामी' ति महतीं चिन्तां बभाराऽनसूयापि । ऋषिः समाधेः समुत्थाय वारि याचिष्यते तर्हि कुतोऽहं दास्यामीति । तपस्विनी सा स्वयमपि बहूनि दिनानि यावत् पिपासापरिपीडितैवाऽस्थात् । अन्ते चैवं मुनिः समाधितः समुत्तिष्ठन्नेव जलमयाचत । परं तत्र तदानीं पानीयमासीदेव न । अतः किं दद्यात् कुतो वा दद्यात् सा वराकी ।

अधुना दुर्घटनायाश्चास्याः मुनेः कथनमनुचितं मन्वाना सा कमण्डलुमादाय जलमानेतुं ततो निरगात् परमाश्रमपरिसरात् सुदूरं यावत् नीरस्य नामापि नासीत् । अथ किंचिद् दूरंगता वृक्षमधः स्थित्वा सा रोदितुमारभत प्रभो ! दयालो ! दया विधेया । पिपासाकुलो मे स्वामी । जलाभावेन तत्पिपासामपनेतुमसमर्थाऽस्मि संप्रति । किं कुर्याम् क्व वा गच्छेयम् ? अधुना भवन्तमन्तरेण नान्यः कश्चन परित्रातेति ।

अथैवमनसूयाया रोदनध्वनिं दूरादेव श्रुत्वा यदा काचित् तपस्विनी तन्निकटमागत्यावोचत्—भगिनि ! किं ते कष्टमिति । तदाऽनुसूयाऽऽदितः सर्वं वृत्तान्तमवर्णयत् । तच्छ्रुत्वा सा प्रासीदत् । पुनरगादीच्च यद् धन्यासि त्वम् ? त्यज चिन्ताम् । चल मया सह । तव साहाय्यमाचरिष्यामि । कुतोऽपि त्वदर्थं जलस्यापि व्यवस्थां विधास्यामी'ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततः सा तपस्विनी यष्टिकामेकामादायेतस्ततो जलाशयस्यान्वेषणं कर्तुं प्रायतत। आश्रमान् नातिदूरे शुष्कमेकं स्थानमासीत्, तत्र तस्याः सा यष्टिका कम्पमानाऽभवत्। तदा तपस्विनी तां विहस्याऽवदत्—'भगिनि! गृह्यतामच्छं जलं यथेच्छमिति। एतदाकर्ण्याऽनसूयोक्तम्—महाभागे! नात्र वारिणो बिन्दुरपि दृश्यते, कुतो गृह्यताम्—इति। ततस्तपस्विन्यवोचत्—'स्थानमिदं खनं। अत्र महान् नीरस्य निर्झरो वर्तते। द्रुतं स निर्गमिष्यतीति। तथैवाचरितं तया। जलं निर्गतमभवत्। विचित्रा खलु लीला लीलापुरुषस्य भगवतः परमात्मनः। यत्र क्षणात्पूर्वं सलिलस्य लक्ष्मापि नासीत्, तत एवेदानीं निर्झरधाराऽऽविर्भावेन सर्वत्रापि जलमेव जलमभवत्। तदा सा तपस्विन्याश्चरणावभिवन्द्य, तदाज्ञां लब्ध्वा, जलेन कमण्डलुं च प्रपूर्य स्वाश्रमं प्रत्याजगाम। पतिं च पयः पाययामास। मुनेर्महदाश्चर्यमजायत—यदेतादृशमतिमधुरं अपीतपूर्वं कुतः समागतम्?। अतोऽतिमधुरपानीयप्राप्तेर्विलम्बस्य च कारणमनुसूयामपाक्षीन्मुनिः। सा यथावृत्तं सर्वमकथयत्। महदाश्चर्यं बिभ्राणो मुनिरपि तपस्विनी-संदर्शनायोदचलत्। तपस्विनी सा जलधारासमीपे समासीनिषण्णा। ऋषिस्तां प्रणम्याऽऽश्रमगमनाय प्रार्थयत। तदा तपस्विनी सलीलमलपत्—धन्या तवेयं धर्मपत्नी। अद्य बहोः कालाद् दुर्भिक्षस्य च दारुणः प्रकोपः सन्तापयति सर्वतः सर्वमपि जगत्। परमियं तथा समनोयोगं भवन्तं सेवते, येन न मनागपि क्लेशपरम्परा बाधितुं प्रभवन्ति। तथा चैतदपि नाचकथद् भवन्तं यत् देशोऽन्नं विना महती विपदमनुभवति। वापीकूपसरांसि शुष्काणि सन्ति सर्वाणि। पशुभिश्च भक्षणाय भूतले घासस्य न तृणमपि प्राप्यते। सर्वेऽपि जन्तवो बुभुक्षया भृशमुद्विग्नाः सन्ति। वस्तुतो धर्मपरायणा रमणीयाचरणा एतादृशी सती भार्या भूरिभाग्येनैव भुवनेऽत्र लभ्यते' इति। इत्थं महर्षिः स्वपत्न्याः श्लाघां श्रुत्वा परां प्रीतिमुद्वहन् तां तपस्विनीं स्वाश्रमे समानीय यथाकालं महता समादरेणातिथ्यमाचरत्।

अस्मादेव निर्झराद् या नदी प्रबभूव, साऽत्रिमुनिपत्नीत्मारकतया चात्रिगङ्गेतिनाम्ना प्रसिद्धिमाप। बहुकालं च तत्प्रान्तीया जनास्तस्या जलं पपुः। इदमपि च श्रूयते—यत्पुरा ऋषेर्नाम्ना एकः शिवालयोऽभूद् विनिर्मितः। तत्राऽत्रीश्वरशिवस्य मूर्तिरपि समस्थाप्यत। एतदप्युच्यते यद् अनुसूयायाः पतिभक्त्या प्रसन्ना साक्षात् स्वयं गङ्गा तपस्विनीवेषेण प्रादुर्भूय तस्यै दर्शनं ददाविति।

अनसूयाविषये एतदप्यनुश्रूयते—

एकदाऽनसूया मुनिपत्नीभिः सह शास्त्रचर्चां कुर्वाणाऽऽसीत्। नारदो योगी तदाश्रममाजगाम। अनसूयया सत्कृतः स आसनमग्रहीत्। कुशलप्रश्नानन्तरं नारदस्तां पप्रच्छ महाभागे त्रिलोक्यामस्यां कियत्यः सन्ति पतिव्रताः सन्नार्यः—इति। एतदर्थं परीक्षा क्रियतामित्युत्तरितं तया। 'सतीनां परीक्षा सा कथं कर्तव्या' इत्यपि भवत्यैव कश्चन तत्प्रकारः प्रदर्शनीयः इत्येवं नारदेन पृष्टया तयोक्तम्—महामुने! एते चणका गृह्यन्ताम् यदा यस्याः स्त्रियाः करस्पर्शमात्रेण चणका इमे भ्रष्टा चणकाः भवेयुस्तदा सा स्त्री पतिव्रता ज्ञातव्येति। नारदोऽपि तद्वचस्तथैवाङ्गीकृत्य तान् चणकानादाय प्रथमं वैकुण्ठे लक्ष्म्याः समीपं गतवान्। तत्रागतं नारदं वीक्ष्य लक्ष्मीः 'आगम्यताम्, अलंक्रियतामासनमिदम्। महती कृपा कृता भवता। भवादृशानां महात्मनामागमनं गृहं गृहमेधिनां पुनाति नूनम्। अपि कुशलं भवतः? निस्पृहस्यापि भवत आगमनं निष्प्रयोजनं न भवति' इति बभाषे। एतच्छ्रुत्वैव नारदो जगाद—रमे! वार्ता तु एवमेव वर्तते। गुरुतरेण प्रयोजनेनात्रागमनमद्य ममेति। लक्ष्म्योक्तम्—तर्हि त्वरितं भणतु भवान् मुने!। एवं लब्धावसरो नारदः शीघ्रमनसूयया दत्तान् तान् चणकान् पत्न्याः पुरतः कृत्वाऽवोचत् कमले! चणकानेतान् स्पृशतु भवतीति। रमयोक्तम्—किमर्थमेतदिति?। ततो नारदः—एते चणका यस्याः स्त्रियाः करस्य स्पर्शमात्रेणैव यदा भ्रष्टाचणका जायेरन्, तदा सा स्त्री पतिव्रताऽस्तीति विज्ञातुं शक्यते—इति प्रत्युक्तवान्। अस्यैतद्वचो निशम्य श्रीः स्वचेतसि चिन्त-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यामास—'यत् पतिव्रतानियमानुपालनमतिदुष्करम्' । अतो न जाने समानो योगमपि विष्णोः सेवामाचरन्त्या अपि मया कदाचित् तच्छ्रुत्वा रुषे चेतसश्चाञ्चल्येनापराद्धं स्यात्, यतो नेमे चरणका मदीयकरस्पर्शाद् भ्रष्टचरणका भवेयुस्तदाऽखिलेऽपि लोके मम महती दुष्कीर्तिः संपत्स्यते इति । 'ननु किमत्र चिन्त्यते ?, शीघ्रं स्पृष्टव्याश्चरणका एते !' इति पुनर्नारदेनैवं साग्रहमुक्ता कमला बभाषे—नाहमेतान् स्पृक्ष्यामीति । एवं निषेधात्मकं कमलायाः वचनं श्रुत्वा नारदस्ततः कैलासं ययौ ।

तत्र सुदुष्करेण तपसा स्थाणुरपि यया तोषितोऽभूत् तपोनियमानुपालनाच्चाऽपर्णेति संज्ञा संप्राप्ता, तां पार्वतीमपि नारदस्तथैव जगाद—शिवे ! चरणकानेतान् स्पृशतु भवतीति । 'महर्षे ! किं फलं स्यादेतेन कर्मणा' इति भवान्या साश्चर्यं पृष्टो नारदोऽगादीत्—यस्याः करस्पर्शमात्रेण स्पृष्टा एते चरणका भ्रष्टचरणका भवेयुस्तर्हि सा स्त्री पतिव्रतेति परीक्षणं जायते तस्याः इति । एतन्निशम्य चण्डिकापि मनस्यचिन्तयत्—शिवमनिशं सेवमानयाऽपि मया कदाचित् कापि त्रुटिः कृता स्यात् ? ततो यदि नेमे चरणका भ्रष्टचरणका जायेरन्, तर्हि ममाऽशेषमपि यशः क्षणाद्विलीनं भवेत्, इति विनिश्चित्य तया भणितं न स्पृक्ष्यन्ते चरणका एते इति । एवं ततोऽपि विफलमनोरथ एव नारदो ब्रह्मालोकमयासीत् । तत्र ब्रह्माणीमुपेत्य तथैवोक्तवान् । तयापि तथैव निषेधः कृतः तदा नारदो यद्येताः पतिव्रता मौलिमणिभूता अपि चरणकान् न स्पृशन्ति, तदा नान्या कापि पतिव्रता भवितुमर्हति—इति समवधार्य ततस्तूष्णीमेवानसूयाश्रममेव प्रत्यागतवान् अनसूयया पृष्टम्—अपि कृता परीक्षेति । आम्, कृतं परीक्षणम्, परं न कयापि स्पृष्टा एते चरणकाः—इति तेनापि प्रत्युक्तम् । क्षणानन्तरं तत्र स्थितस्यैव नारदस्य मनसि सन्देहोऽयमजनि—यदियमनसूयाऽपि स्वयमेतान् चरणकान् स्पृष्टुं शक्नोति न वेति । पातिव्रत्यप्रभावेण नारदमनोगतं सन्देहमिमं विज्ञायाऽनसूयोक्तवती—नारद ! एते चरणकास्त्वया भूमौ स्थाप्यन्ताम्, अन्यथा तव हस्तो दाहमवाप्स्यति—इत्युक्त्वैव सा यावत्तान् चरणकान् स्प्रष्टुं करमुत्थापयति तावदेव तत्करस्पर्शमनवाप्यैव तद्वतदेति ध्वनिपुरस्सरं चरणकास्ते भ्रष्टचरणकाः संजाताः । तदाऽतिविस्मितो नारदस्तन्माहात्म्यं भूरि भूरि प्राशंसत् विगतसन्देहश्चाऽजायत ।

अथानसूयां प्रति सञ्जाताऽसूयाः कमलाप्रभृतयस्तिस्रोऽपि शक्तयो निशि गेहान् प्राप्तान् स्व-स्वपतीनवाबोधयन्—यत् संप्रति पतिव्रतानामनेऽनसूया महान्तं गर्वमुद्वहति । यतोहि साऽस्मत्पतिव्रतात्वपरीक्षणाय नारदं प्राहिणोत् एवं तयाऽस्माकं महान् अनादरः कृत इति । ततोऽन्येद्युरेव प्रातः कान्तावचनश्रवणविलुप्तधैर्यधनाः कोपाविष्टास्ते विधिहरिमहादेवास्त्रयोऽपि तत्सतीत्वपरीक्षणार्थमनसूयाश्रमं प्रापुः । अनसूया तु तथाऽऽगतान् स्त्रीभिर्विरुद्धभावं गमितान् तान् विज्ञाय 'बाला भवत यूयम्' इति वाक्यमुवाच । तत्क्षण एव तद्वचनमात्रेण त्रयोऽपि देवास्ते स्तनन्धयाः शिशवोऽजायन्त । ततश्च सा तान् तान् पृथक्-पृथक् शय्यासु—अशाययत् । त्रयोऽपि ते स्वाङ्गुष्ठान् मुखेषु निधाय स्तनपानमिवाचरन्तः शिशुक्रीडां तन्वन्ति स्म । मध्याह्ने च क्षुत्पीडितान् देवांस्तान् सञ्जातदयोदया साऽनसूया पयोऽप्यपाययत् । एवं तद् दिनं व्यतीतमभूत् । रात्रिश्च यदा प्राप्ता, तदा लक्ष्मीप्रभृतीनां तिसृणामपि शक्तीनां मनस्सु चिन्ताऽजनिष्ट—यदनसूयाश्रमं गतास्ते कथं नाधुनाऽपि प्रत्यागताः इति । एवं स्वपमागमनमाकाङ्क्षमाणास्तास्तिस्रोऽपि महाशक्तयः स्वतिसस्वभवनद्वारेषु स्थिता एव तां रात्रीमत्यवाहयन् ।

अपरेद्युः प्रत्यूषे एव लक्ष्मीःपार्वतीमुपेत्यापृच्छत्-तव महादेवः समायातो न वेति । नागतः सः इत्युक्तं तयापि । ततस्ते द्वेऽपि बाहीं प्रापतुः । ब्रह्माण्यपि ते समागते विलोक्य तूर्णमपृच्छत्—सखि !'कमले ? शिवे ? अपि द्रष्टो युवाभ्यां मे पतिर्ब्रह्मा इति । नैवेति ताभ्यां सहैवोत्तरितम् ।

एवं भयाक्रान्तस्वान्ताश्चतुराननादिदेवानां कान्तास्ताः स्वकान्तान्वेषणायाऽनसूयाश्रमं प्रति प्रतस्थिरे । दूरादेव समागतास्ता विज्ञायाऽनसूया तान् त्रीनपि देवान् दुग्धं पाययितुमभवत् तत्परा । अस्मिन्नेव क्षणे शनैः—शनैस्तास्तिस्रोऽपि तदाश्रमद्वारमुपयाताः । तत्र च दूरत एव तान्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रीडतस्त्रीन् शिशून् ददृशुः । तदोनसूयाऽपि ता विलोक्योवाच—'अप्यागताः स्वपतीनन्वेष्टुं यूयम् ? दृश्यन्तां प्रत्यभिज्ञायन्ताञ्च स्वस्वपतयो भवतीभिरिति ।' इत्थं भाषमाणायां तस्यां तास्तिस्रोऽपि शिशूनामन्तिकमागत्यैवं स्वपतीन् प्रत्यभिज्ञातवत्यः कमलाऽलपत्--अयं मे पतिर्विष्णुरिति, दुर्गाऽप्यगादीदेष देवो मम महादेव इति,एवमेव ब्रह्माणी-अभाणीत्--अयं मम नाथश्चतुराननः इति। ततो महाभागे ! अनसूये दीयन्तामस्माकमेते पतयोऽस्मभ्यमिति तां तिस्रोऽपि ताः प्रार्थयामासुः । तयोक्तम्-यथेच्छं गृह्यन्तां स्वस्वपतय इति । सति ! शिशुभावमाप्तैरेभिर्नाः स्माकं मनोरथः सेत्स्यति । क्षमस्व तावत् विस्मयावहं तव प्रभावमजानतीनां महामोहमुपगतानामस्माकमपराधान् । प्रसीद पुनरेतान् पूर्वावस्थान् कर्तुमित्येवं ताभिः प्रसादिता साऽनसूया 'एवमस्तु' इति सस्मितमुवाच । तत्क्षणादेव ते त्रयोऽपि पूर्वशरीराकृतीः प्रापुः । एवं ते ब्रह्मादयो देवाः पतिव्रतायास्तस्या महिमानं मुहुर्मुहुर्गायन्तो लक्ष्म्यादिभिः स्वस्वपत्नीभिः सह स्वलोकान् ययुरिति । किंच सीतालक्ष्मणाभ्यां सह यदा लोकाभिरामो रामो वने निवासं कर्तुमयोध्यातः समागतवान्, तदा वनाद् वनं विचरन् महर्षेरत्रेराश्रममाययौ । तदा मुनिना तत्र प्राप्तानामेतेषामातिथ्यमाचरितम् । सीताऽनसूयाचरणौ सादरं ववन्दे । अनसूयाऽपि सीतां स्त्रीधर्मान् शशासेति ।

एकदाऽनसूया सोमवंशीयनृपराजधान्याः प्रतिष्ठाननगरमागता । तत्र नर्मदानाम्नी काचित् पतिव्रता मुनिपत्नी निवसति स्म । तस्याः पत्युः शरीरं रोगगलितमभूत् । परं नर्मदायाः पतिभक्त्या प्रसन्ना भूत्वाऽनुसूया तत्पतिं नीरोगं चकारेति ।

एवमनसूयाया सकलोऽपि स्वस्य जीवनकालः पतिसेवायामेव यापितः । पतिध्याननिमग्नमानसा च भूत्वा योगिवत् वर्ततेस्म सा । तस्या दत्तात्रेय-दुर्वासाप्रभृतयस्त्रयो विद्वांसः पुत्रा अपि जज्ञिरे । तस्याः पतिव्रतायाः प्रभावोऽखिलेऽपि देशे पतितः । नैतादृश्यः सन्ति बह्व्यः स्त्रियः, याः अनसूयायाः पवित्रं चरितं न जानन्ति । एवं भूयोऽपि भगवान् भूतभावनो विदध्यात् यदेताः सर्वा अपि भारतीयाः स्त्रियोऽनुसूयोपदिष्टमार्गमनुसरन्त्यः स्वपतिपुत्रादीन् पूतान् सुखिनश्च कुर्युरिति शम् ।

ओरियण्ट पेपर मिल्स

निम्नलिखितानि वस्तूनि निर्मीयन्ते

बन्धनायः—

(१) एम्. जी. रिब्ड क्राफ्ट
(२) एम्. एफ्. अनरिब्ड क्राफ्ट
(३) अक्लेद्य (वाटरप्रूफ) क्राफ्ट
(४) क्रेप क्राफ्ट

लेखनाय, मुद्रणाय चः—

(१) श्वेतपत्रम्
(२) क्रीमरङ्गस्य
(३) अर्धश्वेतीकृतपत्रम्
(४) अश्वेतीकृतं पत्रम्

आवरणाय—पेटकानां, पुटकानां च निर्माणाय कार्टनबोर्ड, ग्रेबोर्ड, जुप्लेक्स, ट्रिप्लेक्स, कार्त्रिज, टिकटबोर्ड, आवरणबोर्ड प्रभृतिवस्तूनि निर्मीयन्ते ।

ओरियण्ट पेपर मिल्स (सीमितम्)

प्रबन्धाभिकर्त्तारः—बिरलाबन्धवः [स्वतन्त्रम् सीमितम्] बजरङ्गनगर, (उडिसा)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

होलिका

ले० वैद्यः शङ्करलालशर्मा, भिषगाचार्यः फतेहपुरम्

दैत्यो हिरण्यकशिपुर्निज-पुत्रकाय
दत्वाऽपि कष्टबहुलन्न शशाक रोद्धुम् ।
भक्त्या हरेः मनसि चिन्तितवांस्तदा स
को मेऽरिभक्ततनयान्तकरो ह्युपायः ॥१॥

स्वार्थप्रणष्टमतिनीचनरेण नूनं
किं किं विगर्हितमिह क्रियते न कर्म ।
दैत्याधिपेन हरिभक्तिपरायणस्य
सूनोः वधाय मुमुचे शयनं क्षपासु ॥२॥

इत्थं दिवानिशममुष्य विचिन्तितस्य
होलीति नाम भगिनी सविधेऽनुयाता ।
भ्रातः कथन्नु भवता ह्यनुभूयते च
गात्रस्य शोषणकरी महतीह चिन्ता ॥३॥

तस्याः निशम्य वचनं निजगाद भूपः
प्रह्लादसूनुरपमानकरो मदीयः ।
रुद्धोऽप्ययं मम रिपुस्मरणं करोति
यत्ने कृतेऽपि मरणं समुपैति नो हि ॥४॥

ऊचे तया प्रियसहोदर ! नात्र कापि
चिन्ता, कृशानुविषहा मम शक्तिरस्ति ।
लब्धो वरः प्रथममेव मया प्रसादा-
दङ्के निधाय सहसा परिदाहयामि ॥५॥

इत्थं स्वसुः प्रियवचः परिहृष्टचेताः
श्रुत्वाऽथ तां प्रणिजगाद कुरु त्वमेवम् ।
प्राप्याग्रजस्य च नियोगमथ प्रसन्ना
सज्जा बभूव परिदाहयितुञ्च भक्तम् ॥६॥

अङ्कोपवेशितचतुर्भुजबालभक्ता
सा सञ्चितेन्धनचयोपरि चोपविष्टा ।
तत्राययावसुरवृन्दमवेक्षणार्थं
प्रह्लादभक्तरुचिरं चरितन्तदानीम् ॥७॥

प्रज्वालिता दितिसुतैस्तु चिता परन्तम्
भक्तार्तिनाशनसमीपगतो ह्यनन्तः ।
देवो ररक्ष, भगिनी दनुजस्य सद्यो
भस्मीबभूव खरवह्निशिखाप्रदग्धा ॥८॥

येषु प्रसीदति हरिः भुवि तस्य कोऽपि
व्यापादमात्रमपि चिन्तयितुन्न शक्तः ।
आकाशमारुतधनञ्जयवारिभूमि-
भूतानि सन्ति मधुसूदनमूर्तिमन्ति ॥९॥

वह्निस्थितो भगवतो ज्वलनस्वरूपो
भक्तं जुगोप सहसा दहनात् प्रचण्डात् ।
नाश्चर्यमेतदिह भक्तजनान् सदैव
गोपायति प्रबलकृच्छ्रसमागमाद्धि ॥१०॥

स्मरति यो मुरमर्दनमन्वह—
मभिमुखे स्थित एव सदा हि सः ।
सकृदिह स्मरणेन पुरा यमा—
नुचरभीतिरजामिलमत्यजत ॥११॥

प्रियहरिः खलु भक्तशिरोमणिः—
असुरपुत्रसमो भुवि दुर्लभः ।
प्रतिसमा अपि सम्प्रति फाल्गुने
धृतमनोरमवस्त्रसुभूषणैः ॥१२॥

रचितचित्रितवेशविभूषितैः
मुदितसम्मिलितैः शिशुमानुषैः ।
विविधनर्तनगायनवाद्यकैः
स्मृतिपथे क्रियतेऽत्र महोत्सवः ॥१३॥

नभसि यावदिनश्च निशाकरो
भुवि च भारतनाम महोज्ज्वलम् ।
जनगणेषु च तावदियं पदम्
ह्यधिकरिष्यति भारतवासिषु ॥१४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धारावाहिकं कथानकम्

★ जीवनस्य पृष्ठद्वयम् ★

—ले० मानसी

पूर्वकथाः—

(आत्मकथाया लेखिका बाल्यादेव संस्कृते रुचिमग्रहीत् । सा 'इण्टर' परीक्षायां संस्कृतविषयं गृहीतवती, किन्तु अध्यापनाय बालिकाविद्यालये समुचिता व्यवस्था नाऽऽसीत्, अतोस्याः पिता यो हि स्वयं सम्पन्नः, सम्भ्रान्तः एकस्याङ्गलविद्यालयस्याऽऽध्यक्षश्चासीत्—एकम् एम. ए. (संस्कृत) परीक्षार्थिनं एतां पाठयितुं नियुयोज । राकेशनामाऽयं युवकः सुशीलः, गम्भीरः, शान्तश्चाऽऽसीत् । तत्सकाशादियं कालिदासग्रन्थानामध्ययनमकरोत्—तस्मै च मनस्येव श्रद्धां समर्पितवती । बी० ए० परीक्षा अपि अनया तस्यैव प्रेरणया, अध्यापनेन च दत्ता । किन्तु परीक्षापरिणामस्य निर्गमनात्पूर्वमेव एका घटनाऽघटत । राकेशेन वृत्तिं गवेषयता तन्नगरं परित्यक्तम् । सोयमासीदस्या उपरि महानाघातः, तथाऽप्यनयाऽध्ययनं न परित्यक्तम् । तदानीमेव एतस्या विवाहस्य चर्चा प्राचलत् । जनकेनोक्तं यदस्मिन्नेव वर्षे तस्या विवाहो भवेत् । किन्तु एतद्विषये नैतया कापि जिज्ञासा प्रकटिता । शनैः शनैर्विवाहदिवसः समीपमागतः । तथापि नेयमजानात् क एतां परिणेतुमागच्छति । वाग्दानं सम्पन्नं, यस्मिन् श्वश्रूः श्वशुरं चेयं दृष्टवती । विवाहदिने लग्नपण्डपस्था इयं चिन्तितवती यदयं नरो यः कोऽपि भवतु—राकेशं विस्मृत्यैनमेव हृदये पूजयिष्यामि । अन्तःपटेऽपसृतेऽनया दृष्टं यद्यस्तां परिणीतवान् , स राकेश एवाऽभूत् । इयं चकिताऽस्थात् । अनया ज्ञातं यत्सोऽधुना प्रशासकीयसेवायाम् (I.A.S) अधिकारी वर्त्तते । विवाहानन्तरं राकेशेन निश्चितं यत्स देहरादूननगरे पत्न्या सह सप्ताहमतिवाहयेत् । तत्रैव राकेशेन जीवनस्य सर्वेऽपि वृत्तान्तोऽस्यै कथितः । कथं तेन प्रशासनिकपरीक्षा उत्तीर्णा—कथं च तत्पित्रा एतस्याः पितुः समीपे राकेशस्य विवाहप्रस्तावः प्रेषितः इत्यादि ।]

देहरादूननगरस्य साप्ताहान्तेनावासेन राकेशश्चाहं च एतावन्निकटमायातौ यन्नूनमावां जन्मजन्मान्तरसहचरौ । एतस्मिन् सप्ताहे न खल्वावां सुरापानगृहं गतौ न वा द्वन्द्वनृत्यालयम् । केवलमावासभवने – लम्बलम्बासु निर्जनवीथीषु – कालिदासं, भवभूतिममरुकं भारविं माघं, क्षेमेन्द्रं च स्मरन्तावावां सप्ताहमिमं सप्तक्षणानिव व्यत्यवाहयाव । न जाने कः खलु सोऽभूदावेशो यदहं व्यस्मार्षं यदस्मिन्नेव वर्षे मया परीक्षा प्रदेया, राकेशश्च व्यस्मरद्यत्स प्रशासनाधिकारी वर्त्तते । सेयमात्मविस्मृतार्त्रिलीना यदा सप्ताहः समाप्तः किन्तु किमहं कथयानि यदिमं सप्ताहं जीवनपर्यन्तमावां विस्मर्त्तुं शक्ष्यावः ?

मया मदीयानि संस्कृतकाव्यानि नाटकपुस्तकानि च पुनः पेटिकान्तःस्थानि विहितानि । सहसैव माधुर्या वाक्यं स्मृतिपथमारुरोह "उन्मत्तिके ! विवाहानन्तरं प्रथमे मासे किमध्ययनं क्रियते ?" मम चोत्तरं यत् "कालिदासीयकाव्यानि जीवनान्न भिन्नानि" कियत्सत्यमासीत् । मयाऽनुभूयज्ञातं यत्कालिदासेन भवभूतिना च यत्किमपि लिखितं तदेव प्राणितम्-तदेवोच्छ्वसितं, तदेव जीवितम्; यदेव जीवितम्—यदेव प्राणितं यदुच्छ्वसितं तदेव लिखितम् । जीवने च काव्ये च तयोर्न कोऽपि भेदोभूत् । अत एव वास्तविककवीनां काव्येषु मर्मस्पर्शिनी काचन अलौकिकी संवेदना वर्त्तते या चर्वणासमकालमेव हृदयस्य तासु तासु भावनासु तादात्म्यं सम्पादयति । आवाभ्यामिदमनुभूतम् ।

× × × ×

एतदनन्तरं तु जीवनस्य दिशा परिवृत्ता । राकेशो मासे दशदिवसान् प्रवासी एवास्थात् । तस्य प्रशासनसेवा सर्वमिदमावश्यकमकरोत् । किन्तु तस्य संस्कृतस्नेहः, कवितानुरागश्च न किंचिदपि अपक्षीणौ । किं भवन्तो विश्वसिष्यन्ति यत्सोऽद्यापि "कवयति ।" अहमपि "कवयामि ।" इदमेवावयोर्जीवनम् । इदमेव हृदयस्यान्नम् । प्रशासकस्य पत्नीति कृत्वा न जाने मदीयप्रदेशस्य नगरस्य च कतिकतिषु संस्थासु सदस्यात्वेन, पदाधिकारिणीत्वेन च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरस्कारप्रदानाय, भाषणाय चाहमामन्त्रिताऽस्मि । राकेशोऽपि तत्र गच्छति । किन्तु बहुधाऽध्यक्षत्वेन । यदा राकेशोऽध्यक्षतामवलम्बते, तदाऽहं पुरस्कारान् वितरामि । सेयं परम्परेव संजाताऽस्ति ।

जना विस्मयन्ते यद् राकेशो भाषणं संस्कृतपद्येनैवाऽऽरभते—संस्कृतपद्येनैवोपसंहरति । एतदधिकमाश्चर्यकरमिदमस्ति—यदहमपि संस्कृतपद्येन भाषणमारभे—संस्कृतेनैव चोपसंहरामि । ते मन्ये तदिदमपि जानन्ति यदावयोर्विवाहो गान्धर्वविवाहः (Love-Marriage) अस्ति । किन्तु मन्ये तदिदं ते न जानन्ति यदेतस्य गान्धर्वविवाहस्य सूत्रं संस्कृतमेवास्ति—विवाहस्य ऋचा संस्कृतकाव्यानि—मङ्गलहोमस्य च ऋत्विक् कालिदास एवाऽभूत् !!

विवाहस्य वर्षत्रयानन्तरं ललाटलिप्या यत्किमपि कृतं तेन कविकुलगुरोः रघुवंशतृतीयसर्गस्थं—

"शरीरसादादसमग्रभूषणा मुखेन साऽलक्ष्यत लोध्रपाण्डुना
तनुप्रकाशेन विचेयतारका प्रभातकल्पा शशिनेव शर्वरी ।"

पद्यमिदं प्रत्यक्षमनुभावितम् । राकेशो मामन्तर्वत्नीं विज्ञाय परिहासानां परां काष्ठां प्राप । दैनन्दिनेन "तव को दोहदः" इति प्रश्नेन स मामुपजहास । वस्तुस्थितौ न मे कोऽपि दोहदोऽभूत् । तथापि न जाने किमिदमासीत् । एकदा कार्यालयात् परावर्त्तमानेन राकेशेन स्वभृत्यस्य शिरसि एका महती पोट्टलिकाऽऽनीता ! किमस्यां पोट्टलिकायां भवेदित्यहं चिरं व्यचारयम् । मया पृष्टम्—"राकेश ! पोट्टलिकायामस्यां किं वा तादृशं बहुमूल्यं वस्तु वर्त्तते—यत्त्वं मदीये शयनकक्षे तां स्थापयितुं परिचारकमादिशसि ?" राकेशः केवलं मन्दहासं व्यसृजत्—"तत्त्वं स्वयमेव ज्ञास्यसि ।"

सायं शयनकक्षे गतया मया दृष्टं यत्पोट्टलिकायां वस्तुत एव बहुमूल्यं किंचन वस्तु वर्त्तते । तदिदं वस्तु जगतः सर्वेषां वस्तूनां, प्राणिनां च समवायिकारणमस्ति । सर्वेऽस्मादेव प्रादुर्भवन्ति—अस्मिन्नेव विलीयन्ते । आसीत् तदिदं वस्तु—"मृत्तिका ।" पोट्टलिकायां स्वच्छसुरभिमृत्स्नायाः बहूनि खण्डान्यासन् । एतदुपरि राकेशहस्तलिपीकृतं पद्यमासीत्—

"तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्राय न तृप्तिमाययौ"

प्रयत्नशतेऽपि कृतेऽहं हास्यं न रोद्धुमपारयम् । राकेशेनापि तस्मिन्नट्टहासे स्वकीयो योगः प्रदत्तः । तदैव मया ज्ञातं यद्यस्य कालिदासीयपद्यस्य वास्तविकं तात्पर्यमहं च, मत्सहपाठिन्यश्च विद्यालये पुनः पुनः प्रयत्यापि नाजानीम, तदेव पद्यमधुना जीवनस्य विद्यालयेन स्वत एव, अनायासमेव बोधितम् ।

मया प्रोक्तं यन्मया न कदापि मृद्भक्षणेच्छा कृताऽभूत्—न चाद्य सा वर्त्तते । भवेत्तादृशी काचनाभिलाषा सुदक्षिणायाः । अहं तु "दिवं मरुत्वानिव भोक्ष्यते भुवं दिगन्तविश्रान्तरथो हि मत्सुतः" इत्यपि न चिन्तयामि । अहमेव किमु—काऽपि माताऽद्य स्वकीयं सुतं दिगन्तविश्रान्तरथं न कल्पयति । कुत्राद्य रथाः, कुत्र दिगन्तसाम्राज्यम् ? मत्सुतस्य मरुत्तरशकटिः, वायुशकलं (Bicycle) वा विश्वस्य कस्मिन्नपि प्रदेशे नावरुद्धं भवेदिति कामं नवयुगीना मातर आशासन्ताम् !!

× × × ×

गच्छता कालेन "राजीवस्य" पदार्पणं मद्गृहाङ्गणे समभूत् । जीवनस्य बहवश्चिन्ताः, बहूनि कार्याणि समृद्धानि । शिशोः पालनम्, "कौमारभृत्या" शिक्षा च न तावत्सरलं कर्म । सप्तमं वर्षमुपेयुषि राजीवे नवीना खल्वेका समस्या उदिता । राकेशस्य प्रशासनसेवायां सुमहती समस्या खल्वेका सेयमभूत् यत् प्रतिवर्षद्वयं तस्य स्थानान्तरणमभूत् । समग्रमपि गृहं स्थानान्तरणीयमभूत् । किन्तु द्वावप्यावां नात्र किमपि काठिन्यमनुभूतवन्तौ पूर्वम् । अधुना सुमहती कठिनता राजीवस्य शिक्षाया अभूत् । शिक्षायाः प्रचलति सत्रे (Session) यदि राकेशस्य स्थानान्तरणं भवति, तर्हि राजीवस्य शिक्षायाः किं भावि ? किं स विद्यालयं मध्य एव परित्यजतु ? अन्यस्मिन् वा विद्यालये प्रवेशं विधाय—नवीनायां शिक्षापद्धतौ—नवीने वा वातावरणे प्रविश्य—मासद्वयं मासत्रयं वा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रामीण-उद्योगों से अधिक रोजगार



स्थानीय लोगों के उत्साह और कुशल संगठन द्वारा उड़ीसा के पुरी जिले के तेजपुर गांव में रोजगार की सुविधाएं बढ़ गयी हैं।

इस गांव के निवासी श्री अर्जुनदास ने एक बहुमुखी सहकारी समिति शुरू की। यह समिति बढ़ई का काम सिखलाती है। इसके कारखाने में मेज, कुर्सियां और खिड़कियों व दरवाजों की चौखटें बनाई जाती हैं, जिन्हें सरकारी या गैर सरकारी संस्थाएं खरीद लेती हैं।

साथ ही एक और उपयोगी धंधा इस समिति ने शुरू किया है—नारियल रेशे का उद्योग। इससे रस्से, रस्सियां, चटाइयां और अन्य चीजें तैयार की जाती हैं, जो आस पास के गांवों में बिक जाती हैं।

गांवों की दस्तकारियों को प्रोत्साहन दीजिये। इनसे रोजगार बढ़ता है और आय भी

योजना की सिद्धि आपकी समृद्धि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिचये एव यापयेत् ? यद्यपि स्थानान्तरितेष्वधिकारिषु-तदपत्यानां शिक्षाया विद्यालय—प्रवेशस्य च भूयसी सुविधा सर्वकारेण प्रदत्ताऽस्ति तथापि बालकानां शिक्षाया दृष्टिकोणेन अधिकारिणां स्थानान्तरणं हानिकरमेव भवति। किन्तु कः शृणोतु ?

सर्वमिदं विचार्य निश्चितं यद् राजीवस्य प्रचलति शिक्षासत्रे (Session) यदि राकेशस्य स्थानान्तरणं भवेत्तर्हि राजीवेन सहाहमपि तस्मिन्नेव स्थाने तिष्ठेयम्—केवलं राकेश एवाऽस्मिन्नगरे गच्छेत्। सोऽयं नवीन एवाऽनुभवोऽभूत्। मेघदूतस्य "शापेनास्तंगमितमहिमा वर्षभोग्येण भर्त्तुः" इति स्थितिः प्रत्यक्षमनुभूता। राजीवस्य सत्रान्तं यावत् सोऽयं यक्षस्य यक्षपत्न्याश्चेव शापोऽभूत्! मदीयो यक्षः रामगिर्याश्रमेऽस्थात्। अहमत्र राजीवेन सह अलकायां स्थिता—"शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ—शेषान्मासान् गमय चतुरो लोचने मीलयित्वा" इति राजीवस्य सत्रान्तं, परीक्षा-समाप्तिं च प्रतीक्षमाणाऽभूवम्। भेदस्त्वियानभूत् यन्मेघदूतस्य यक्षः--परिवहन (Communication) साधनाऽभावात्—स्वकीयं संदेशं मेघेन वाहयितुं विवशोऽभूत्, मदीयो यक्षस्तु भारतसर्वकारस्य प्रेषणा-विभागस्य (Post-Office) साहाय्यमेव पर्याप्तम-मन्यत। यदा-कदाचिदवकाशमादाय यक्षपत्न्या सह सङ्गन्तुं सुविधाऽपि मदीयस्य यक्षस्याऽभूत्।

किन्तु दौर्भाग्यमिदमेवाऽऽसीत् यत्कालिदासीयो यक्षः कुबेरेण सकृदेव वर्षभोग्येण शापेन शप्तोऽभूत्—सोऽपि जनानां कथनानुसारं—

"श्रुत्वा वार्त्तां जलदकथितां तां धनेशोऽपि सद्यः
शापस्यान्तं सदयहृदयः संविधायार्द्रचित्तः
संयोज्यैतौ विगलितशुचौ दम्पती हृष्टचित्तौ
भोगानिष्टानविरतसुखान् भोजयामास शश्वत्।" इति

सुखान्तपरिणतिं बुभुजे—परन्तु अत्र प्रतिवर्षद्वयानन्तरं वर्षत्रयानन्तरंवा मदीयो यक्षः विविधैः कुबेरायितैरधिकारिभिः विविधविभागानामाधिपत्यं प्रदाय विविधेषु स्थानेषु प्रेषितोऽभवत्। एवं तस्य रामगिर्याश्रमाः समये-समये परिवर्त्तन्ते स्म, मदीयाऽलकानगरी चापि यथासमयं परिवर्त्तिताऽभूत्। परन्तु आधुनिकयुगस्यार्वाचीनोऽयं शापः कुबेरशापादप्यधिकतरं दारुणो मयाऽनुभूतः।

—अग्रे समाप्यम्

पत्रस्य स्वामित्वसम्बन्धे अधिकृतं विवरणम्

पत्रकम ४ (नियमः ८)

१.	प्रकाशनस्थानम	जयपुरम
२.	प्रकाशने कालावधिः	मासिक पत्रम्
३.	मुद्रकस्य नाम	श्री शङ्कर आर्ट प्रिण्टर्स
	नागरिकता	राजस्थानी
	संकेतः	त्रिपोलिया बाजार, जयपुरम्
४.	प्रकाशकस्य नाम	श्री जयबहादुरसिंह
	नागरिकताः	भारतीयः
	संकेतः	भारती-भवन, गोपालजी का रास्ता, जयपुर
५.	संपादकस्य नाम	कविशिरोमणिभट्टश्रीमथुरानाथशास्त्री
	नागरिकता	भारतीय
	संकेतः	मञ्जुनिकुञ्ज, सी. स्कीम. जयपुर
६.	पत्रस्य संपत्तेः अधिकारिणां अधिकारस्याशभाजां वा जनानां संस्थाया वा नाम, संकेतश्च	'संस्कृत प्रचार परिषद्' जयपुर द्वारा प्रकाशितम

अहं श्रीजयबहादुरसिंहः घोषयामि यत् उपरिलिखितं विवरणं मद्विश्वासेन परिज्ञानेन च सत्यमस्ति।

दिनाङ्कः १५ जनवरी १९५८.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदा स्त्रियः पुरुषवेशधारिण्यो भवन्ति

ले० श्रीलक्ष्मीकान्त महादेव चक्रदेव, बी.ए. (आनर्स), एम्.एस्.सी., सी.आम्.आम्.एस्.सी.

(कार्यवाहः अ. भा. संस्कृत-राष्ट्रभाषाकारिणी सभा मुंबई ४)

[स्थलम्—भारत-राजधानी-स्थितस्य, "अशोक-हॉटल" नामकस्य महत्तम-अर्घयुतस्य (Costliest) वसतिगृहस्य, विविध-अद्यतन (Latest) केश-वेश-भूषान्वितायां प्रदर्शनस्थानमिव भव्यः उपाहार-मण्डपः ।]

पात्राणि—एकस्मिन् "टेबलोपरि" कॉफीपानं कुर्वन्तौ, परस्परं अपरिचितौ द्वौ पुरुषौ । संभाषणार्थं कमपि विषयमन्वेषयन् एकः पुरुषः अन्यं वदति, एकस्यां दिशि अंगुलिं प्रदर्श्य ।

एकः पुरुषः—किं भोः, दृष्टं भवता ! तत्रअनतिदूरस्थितः नवयुवकः अतीव सुन्द.....

अन्यः पुरुषः—न न, न सः युवकः, अपितु नवयुवती एव ।

प्रथमः—अहं न तथा मन्ये । तद् व्यक्तेः केशास्तु पुरुषवत् कर्तिताः सन्ति, सा पुरुषवत् कोटं पँटमपि धारयति, तस्याः मुखे धूमनलिका (Pipe) अपि वर्तते ! कथं न मयि विश्वासः ? न विश्वसिमि भवन्तम् ।

अन्यः—कथं न मयि विश्वासः ? सा तु ममैव पुत्री ।

प्रथमः—एवम् अहो आश्चर्यम् ! क्षंतव्यः अयं जनः । स नवयुवा वस्तुतः युवतिरेव इति तस्याः साक्षात् पितृपादाः एव कथयन्ति, तस्मात् विश्वासः विधातव्यः एव ।

हरिनगर सूगर मिल्स लि०

★★★ फेक्टरी ★★★

हरिनगर [एन० ई० रेल्वे] [चम्पारन जिला] उत्तर बिहार

दूरभाषयन्त्रम्—

मर्यादा—रामनगर [चम्पारन]

प्रधानकार्यालय—

२०७, कालबादेवी रोड, बम्बई—२

दूरभाषयन्त्रम्—

'क्रिसूगर' [बम्बई]

निर्मातारः—(अत्युत्तम-शुद्धशर्करायाः)

★ प्योअर, ★ फर्स्टक्लास, ★ क्रस्टल ★ फेन सूगर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विनोद-वाटिका

—सम्पादकः]

पत्रसंपादकः—सुकठिना नूनं मस्तिष्ककार्यकर्तॄणां दिनचर्या।

नवागन्तुकः—अहो! इयद् धनं, लोकेषु इयतीं प्रतिष्ठां चोपलभ्याऽपि दिनचर्यायामेषामियदालस्यम्, एवमकर्मण्यता !!

संपादकः—महाशय! मस्तककार्येण जीवतां जीवन-संकटं त एव जानन्ति। न शक्यं केनाप्यधिकं कालं निर्वोढुमिदं मस्तकस्य कार्यम्।

नवागन्तुकः—आश्चर्यम्! अहं तु दिनस्य द्वादश घण्टापर्यन्तमप्यनुतिष्ठामि मस्तककार्यम्। व्यतीतं च ममेदमायुस्तथा।

संपादकः—किमुक्तं भवता? समस्तं दिनं मस्तक-कार्यं कर्तुं समर्थो भवान्? अपि सत्यं ब्रवीषि?

नवागन्तुकः—सत्यं सत्यमिदम्। नात्र किञ्चि-दाश्चर्यम्।

संपादकः—अये भ्रातस्तर्हि निर्दिश किञ्चित्, किं करोषि समस्तं दिवसम्। संवादपत्रं संपादयसि, उत पुस्तकानामनुवादमारचयसि, आहोस्विन्निबन्धान् संकलयसि?

नवागन्तुकः—कथं भवान् मम वार्तया चकितोऽभूत्! अहमस्मि वंशपरम्परया नापितः। समस्तमपि दिवसं मस्तकस्य कार्यं करोमि। केशान् छिनद्मि, तान् प्रसाधयामि।

× × × ×

एकश्चित्रकारः स्वदेशं परित्यज्य प्रावात्सीद् विदेशान्। किन्तु तत्र चित्रणव्यवसायं त्यक्त्वा समाचरच्चिकित्सक-चर्याम्। अकस्मात् पूर्वाभिजननिवासिना सुहृदा केनचन समभवत्समागमः। स हि कुशलप्रश्नोत्तरमप्राक्षीत्—"संप्रति किमाचरसि?"

प्रत्यवादीदयम्—"वैद्यव्यवसायम्"

सुहृत्—'किमिति? पूर्वकार्यं कथमुपरित्यक्तम्?

चित्रकारः—मम पूर्वव्यवसाये यास्त्रुट्योऽभूवन् ताः समलक्ष्यन्त सर्वैः। अदीयत च ग्राहकेण मह्यमुपा-लम्भः। किन्तु संप्रति मे यास्त्रुट्यः ता नाऽस्मिन् लोके लक्ष्यन्ते। परलोके प्रयान्ति ताः परस्तात्।

मृत्योर्जवनिका ताः सुदृढं समाच्छादयति।

× × × ×

कश्चन ज्ञानी महात्मानमेकमप्राक्षीत्—'भवान् भूतप्रेतादिकं मानुषाणां शत्रुमभिप्रैति न वा?

स प्रत्यवोचत्—'मित्रस्य (ईश्वरस्य) संस्मरणादेव मे नास्त्यवकाशः। कथमहं शत्रुं जातुचित् संस्मरेयम्।'

अन्यः—अहो भवताम् मुग्धत्वं, पुराण-युगीनत्वं च। नाहं तस्याः पिता, अपितु माता। ज्ञातम्?

इदं वचनमाकर्ण्य स वराकः प्रथमः पुरुषः त्रिताडम् उत्पतितः (यथा मराठी भाषायाम् "तीन-ताडउडाला") तस्य हस्तात् कॉफीकपः पतितः, भग्नश्च।

टिप्पणी—टेबल, कोट, पँट, कप इत्यादयः आधुनिकाः शब्दाः संस्कृतभाषायां यथातथैव स्वीकरणीयाः तेभ्यः नपुंसक-लिंगं दत्वा। न तेषां भाषान्तरं कर्तुं शक्यं, न चावश्यकमपि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कूपे भङ्गा कथं प्रतिता ?

(सह सम्पादकः)

ममैकः सुहृदेकस्मिन् महाविद्यालये हिन्द्याः प्राध्यापको भूत्वाऽगच्छत् । रामचरितमानसे रामविवाहं पाठयताऽनेन दृष्टं यत् कतिपये विद्यार्थिनो नितरामन्यमनस्काः कक्षायां संलपन्ति । तेष्वेकमयं पप्रच्छ—"राकेश ! कथय । शंकरस्य धनुः केन भग्नम् ?"

राकेशः क्षणमेकमातङ्कितोऽस्थात् । तदनन्तरं नितान्तमसहायमुद्रयाऽयमुत्तरयामास—"श्रीमन् ! मया तु न भग्नम् ।" प्राध्यापकमहोदयः आश्चर्य--विनोद-विलक्षता--निराशादीनां भावशबलतायां पतितः ।

हिन्दीविभागस्य समितावयं सविनोदमिममेवं प्रसङ्गं विभागाध्यक्षाय न्यवेदयत् । किन्त्वत्र हिन्दीविभागाध्यक्षेन प्रोक्तं, "महोदय, राकेशमहं जानामि । स खलु सदाचारी सत्यभाषी चास्ति । यदि स वक्ति शंकरस्य धनुस्तेन न भग्नं तर्हि तेन सत्यमेव तत्र भग्नं स्यात् । किमिति भवान् शङ्कालुः ?"

अधिकेनाश्चर्येणाक्रान्तः प्राध्यापक एकदा महाविद्यालयस्याध्यक्षाय तदिदं न्यवेदयत् यदस्माकं विभागे एतादृश्यो विचित्रघटना घटन्ते । एतदुपरि विद्यालयाध्यक्ष उवाच—"महोदय, किमेवं कथनेन । कामं विद्यार्थी कीदृश एव भवेत् । तस्य विश्वासो न करणीयः । भवता किंचिद् दृढतया स्थितिः संभालनीया । राकेशः सुतरां दंडनीयो यावदयं न स्वीकुरुते यन्मयैव शंकरस्य धनुर्भग्नमिति । शिथिलतायां सत्यामेते विद्यार्थिनः कदाचन मदीयं शिरोऽपि भङ्क्ष्यन्ति ।"

अधुना तु प्राध्यापको वस्तुत एव चकितोऽभत् । अनेन शिक्षाविभागस्य सर्वोच्चस्याधिकारिणः कार्यालये गत्वा समग्राऽपि कथा श्राविता । राकेशस्योत्तरं, विभागाध्यक्षेण कृतां राकेशस्य प्रशंसा, किन्तु विद्यालयाध्यक्षस्य कठोरताया उपदेशः । श्रुत्वैव अधिकारिमहोदयेन प्रोक्तम् "नैवं, नैवं महाशय । कठोरतायास्त्विदं युगमेव न । जनतन्त्रमिदम् । शंकरस्य धनुः केनाऽपि भग्नं स्यात् । एतदर्थं दण्डस्यावश्यकतैव नास्ति । भवता नवीनस्य धनुषः अनुमानितव्ययः (एस्टीमेट) मत्समीपे प्रेषणीयः अग्रिमवर्षस्य 'बजट' मध्येऽहं तस्य स्वीकृतिं दास्यामि, क्षणेन नवीनं धनुरागमिष्यति । किमत्र काठिन्यम् ?"

सर्वमिदं ध्यायं--ध्यायं वराकः प्राध्यापक उन्मादरोगाद् भगवता चराचरनायकेन त्रातः परन्तु तस्मिन्नेव दिने तेन स्वकीयदैनन्दिन्यां (डायरी) लिखितम्—

"अरण्यरुदितं कृतं शवशरीरमुद्वर्तितं
स्थलेऽब्जमवरोपितं सुचिरमूषरे वर्षितम् ।
श्वपुच्छमवनामितं बधिरकर्णजापः कृतो
धृतोऽन्धमुखदर्पणो यदबुधो जनः सेवितः ।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नवयुगे किं किं न जातम्

(ले० विद्याभूषण काव्यतीर्थ श्रीपद्मादत्त ओझा "पद्म", शास्त्री, साहित्यरत्न, विद्याविशारद, व्यावर [राज०])

अयि जनाः ? पश्यन्तु सर्वे पूर्णवैचित्र्यं नवीनं
क दशा जाता युगेऽस्मिन् भारतं खलु आंग्ललीनं
किन्नु गात्रं मानवानां शीर्णतां खलु नैव यातम् ?
नवयुगे किं किं न जातम् ॥

सा व्यवस्था व्यपगता या शान्तिदा ननु मानवानां
आगता बहु दुःखदा बत, नव्यशासनपालितानाम् ।
किन्नु खलु भोजनाभावे, नेक्षते जन उदरपातम्
नवयुगे किं किं न जातम् ॥

वर्धिता गणना युगेऽस्मिन् मानवानां पापजानां
किन्तु कलिमलशोधकानां मन्यसे किं नावपातम् ।
ईश ? जानेऽहं न कीदृक् भूयते ते सृष्टिपातम
नव युगे किं किं न जातम् ॥

चित्रपटसंगीतशिक्षा, पञ्चवर्षे वोटभिक्षा
'अन्नराशन' शासनेऽस्मिन् धर्मिणां निरपेक्षदीक्षा
किन्न खलु धारासभायां राष्ट्रभाषावञ्चपातम् ?
नवयुगे किं किं न जातम् ॥

अयि विधे ? तव भारतेऽस्मिन् ज्योतिराभा व्यपगता किं
पश्य सीताद्रौपदीनां, नाट्यशालाकचनिपातं
शोक सतप्ता समस्ता, कामिनीकुल-अश्रु पातम्
नवयुगे किं किं न जातम् ?

साभिवादन

कानोड़िया कम्पनी
लिमिटेड़

६ ब्रेबार्न रोड़,
कलकत्ता १

फोन :—२२-२२६३-६४-६५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

राजस्थान- संस्कृत- साहित्य-सम्मेलनस्याष्टममधिवेशनम् अस्मिन् वर्षे भीलवाड़ानगरे समघटत। अध्यक्षो महामहोपाध्याय पं० श्रीगिरिधरशर्मा चतुर्वेदोऽभवत्। अनुमानतो द्विशतं प्रतिनिधयोऽत्र समवेताः। १३-१४-१५ फरवरी तारिकासु तदिदं ससमारोहं समपद्यत। १३-२-६० तारिकायामपराह्णेऽखिलभारतीयसंस्कृत-सम्मेलनस्य स्थायिसमितिरधिविष्टा यत्र राजस्थानस्य कृषिमन्त्री श्री भीखाभाई भाषणमकरोत्।

भारतकेन्द्रीयगृहकार्यमन्त्री श्रीबलवन्तनागेशदातार-महोदयः सम्मेलनस्योद्घाटनभाषणे भारते राजस्थाने च संस्कृतप्रगतिमुल्लिख्य संस्कृतोन्नयने स्वविचारान् प्रास्तौत्। म० म० श्रीगिरिधरशर्मचतुर्वेदानामध्यक्षीयं भाषणं नितरामोजस्वि समभूद्यत्र राजस्थाने संस्कृतस्यातीतं वर्तमानं भविष्यच्च सविश्लेषं समीक्षितानि।

सायं राजस्थानवित्तमन्त्रिणा श्रीहरिभाऊ उपाध्यायेन राजस्थानसर्वकारनियुक्तस्य राजस्थान-संस्कृत-परामर्श-मंडलस्य विधिवदुद्घाटनं विहितम्। एतस्याध्यक्षो राजस्थानजनसेवायोगाध्यक्षः श्रीलक्ष्मीलालजोषिमहाभागः सचिवश्च राजस्थानसंस्कृतशिक्षासंचालकः श्रीमाधवकृष्ण-शर्माऽस्ति। मण्डले २१ सदस्याः सन्ति। रात्रावभिज्ञान-शाकुन्तलं नाटकमभिनीतम्। अपरस्मिन् दिने प्रातः कलिकाता--विश्वविद्यालयेऽध्यापकानां पं० श्रीपट्टाभिराम-शास्त्रिणामाध्यक्ष्ये शिक्षापरिषदधिविष्टा, अपराह्णे च म. म. पं० परमेश्वरानन्दशास्त्रिणः सभापत्ये संस्कृतशिक्षक-सम्मेलनमध्यविशत्। सम्मेलनस्य प्रकाश्याधिवेशने बहवः प्रस्तावाः पारिताः। रात्रौ सार्धाष्टवादनतो महत् कवि-सम्मेलनमायोजितं यत्र संस्कृतकविभिः सह हिन्दीकवयोऽपि समवेता येषां कविताः परशतं जनैरास्वादिताः। भारती-

सधन्यवादम्

फोर्ट ग्लास्टर इन्डस्ट्रीज लिमिटेड

उत्तमप्रकारक जूट, टाट एवं बोरकवस्त्र

निर्माता

मैनेजिंग एजेन्टस् :--

केटलवेल बुलन एण्ड कम्पनी, लिमिटेड

२१ स्ट्रान्ट रोड,

टेलीफोन—२२-४९०१-५ कलकत्ता टेलीग्राम—केटबुलन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपदेशमालायां

सन्ध्योपासनम्

पंचमो मणिः

पूर्वानुवृत्तम् (ले० महोपाध्याय आशुकविः श्रीहरिशास्त्री दाधीच, जयपुरम्)

सन्ध्या येन न विज्ञाता सन्ध्या येनानुपासिता ।
जीवमानो भवेच्छूद्रो मृतः श्वा चाभिजायते ।१
तस्मान्नित्यं प्रकर्तव्यं सन्ध्योपासनमुत्तमम् ।
तदभावेऽन्यकर्मादावधिकारी भवेन्नहि ।२॥

सन्ध्योपासनं विना ब्राह्मणादिजनः अन्यकर्मणि पुण्यपूजाजपादेधिकारी न भवतीति परमावश्यककर्त्तव्या सन्ध्या निर्दिष्टा ।

सन्ध्यायां गायत्रीमन्त्रस्य जपः प्रोक्तः । गायत्र्या च भगवती महामायाशक्तिज्योतिःस्वरूपिणी भर्गशब्देन प्रोच्यते सा हि बुद्धिप्रेरयित्री अस्ति । एतदेवानुसन्धाय शास्त्रकारैरुक्तम्—न विष्णूपासना नित्या न शिवोपासना तथा । यथा भवेन्महादेव्याः गायत्र्याः श्रुतिचोदिता ॥१॥ तस्मात् सर्वे द्विजाः शाक्ता न शैवा न च वैष्णवाः आदिशक्तिमुपासन्ते गायत्रीं वेदमातरम् ॥२॥

इत्यादि बहवः श्लोका प्रमाणत्वेनोदाहरणविस्तरभयान्नोल्लिख्यन्ते ।

गायत्रीमन्त्रः सर्वेषां ब्राह्मणानां ब्रह्मत्वप्राप्तिकारणं ब्रह्मवर्चसप्रदायकत्वेन समुपवर्णितम् । अनेन हि मन्त्रेण उपनयनकाले बालादीक्षायन्ते येन मन्त्रेण ब्रह्मवर्चः प्राप्यते स हि मन्त्रश्रेष्ठः । सदोपासनीयश्च भवितुमर्हति । स मन्त्रः सर्वं कर्तुमकर्तुमन्यथा कर्तुं शक्तिं प्रददाति । नान्यस्य मन्त्रादेरयं मन्त्रराजोऽपेक्षां कुरुते, अन्ये च सर्वे मन्त्रा अस्यैवापेक्षां कुर्वते इति सर्वत्र सर्वे मन्यन्ते ।

जिसने सन्ध्या नहीं जानी, जिसने सन्ध्या उपासित नहीं की वह जीता ही शूद्र है और मर कर श्वान (कुत्ते) की योनि में जन्म लेगा । इसलिए नित्य सन्ध्योपासन करना चाहिए । बिना सन्ध्योपासना किये अन्य कोई कर्म का अधिकार नहीं है । इसलिए भी सन्ध्योपासना की परमावश्यकता बतलाई है ।

सन्ध्या में गायत्री मन्त्र का जप करने का आदेश है । गायत्री शब्द का (नामसे) भगवती महामाया महाशक्ति ज्योतिः स्वरूपिणी भर्ग शब्द से कही है । वही बुद्धि की प्रेरणा देने वाली है । इसको अनुसन्धान करके ही शास्त्रकारों ने लिखा है—

न विष्णूपासना नित्या न शिवोपासना तथा ।
यथा भवेन्महादेव्या गायत्र्याः श्रुति चोदिता ॥

अर्थात् न विष्णु की उपासना वैसी नित्य परमाश्यक है, न शिवकी उपासना जैसी वेद प्रतिपादित महादेवी गायत्री की उपासना नित्य और परमाश्यक है । तस्मात् सर्वे द्विजा शाक्ता न शैवा न च वैष्णवाः । आदिशक्तिमुपासन्ते गायत्री वेदमातरम् । इस कारण सभी द्विज (ब्राह्मण, क्षत्रिय और वैश्य)शास्त्र ही है न शैव है न वैष्णव है क्योंकि उन्हें आदिशक्ति महादेवी भगवती गायत्री वेदमाता की उपासना नित्य करनी होती है । इस विषय में अनेक प्रमाण और भी स्मृतिपथ में आरहे हैं पर विस्तार के भय से इतना ही समझाना समुचित होगा ।

गायत्री मन्त्र सभी द्विजों के लिए ब्रह्मत्व प्रदान करने वाला ब्रह्मतेज प्रदायक वर्णित किया है । इसही मन्त्र से उपनयन काल में गुरुओं आचार्यों द्वारा भारतीय बालक दीक्षा प्राप्त करते हैं । सच है कि जिस मन्त्र से ब्रह्मतेज की प्राप्ति हो वही मन्त्र श्रेष्ठतम है और वही सदा उपासना योग्य, जपने योग्य है ।

जो मन्त्र सब कुछ करने न करने और अन्यथा करने की सामर्थ्य देता है और यह मन्त्रराज अन्य मन्त्रों

सम्पादकानां कविशिरोमणिभट्टमथुरानाथशास्त्रिणामनुपस्थितौ कविसम्मेलनस्याध्यक्षता पं० श्रीजगदीशशास्त्रिभिः (जयपुरसंस्कृतकालेजसाहित्यविभागाध्यक्षैः) निर्व्यूढा ।

१५–२–६० दिवसे न्यायसाहित्यविषययोः शलाकापरीक्षाऽभूत् । अग्रिमकार्यकारिण्या निर्वाचनानन्तरं सधन्यवादं सम्मेलनं सम्पन्नतामगात् । ★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपयोगिनी लघुकथाः-

व्याघ्रचर्मावृतगर्दभः

श्री "शिशुप्रियः"
जयपुरम्

कस्मिँश्चिदधिष्ठाने शुद्धपटो नाम रजकः प्रतिवसति स्म। तस्यको गर्दभः अस्ति। सः अपि घासाभावात् अतिदुर्बलः। अथ तेन रजकेन क्वापि व्याघ्रचर्म प्राप्तम्। ततश्च अचिन्तयत्, "अहो, शोभनम् आपतितम्। एतत् चर्म परिधाप्य गर्दभं रात्रौ यावत् क्षेत्रेषु उत्सृजामि, ते व्याघ्रं मत्वा समीपवर्तिनः क्षेत्रात् न निष्कासयन्ति।" तथानुष्ठिते गर्दभो रात्रौ यथेच्छया यवभक्षणं करोति। रात्रिशेषे अपि भूयो रजकः स्वाश्रयं नयति। एवंगच्छता कालेन स गर्दभः पीवरतनुर्जातः। कृच्छ्रात् बन्धनम् अपि नीयते। अथ अन्यस्मिन्नहनि स दूरात् गर्दभशब्दं शृण्वन् तारस्वरेण शब्दायितुम् आरब्धः। अथ ते क्षेत्रपाः गर्दभः अयम् इति मत्वा लगुडप्रहारैः तं व्यापादितवन्तः।

किसी जगह शुद्धपट नामका धोबी रहता था। उसका एक गधा था वह घास के बिना दुबला हो रहा था। उस धोबी को कहीं से शेर की खाल मिल गई। उसने सोचा—"बड़ा अच्छा हुआ। इस चमड़े को उढा कर गधे को रात में किसी भी खेत में छोड़ दूंगा तो लोग शेर समझकर खेत से नहीं निकालेंगे।"

ऐसा करने पर रात में गधा आराम से जौ खाता था। रात बीतने पर धोबी फिर ले जाता था। इस प्रकार थोड़े दिनों में गधा मोटा होगया। उसके गले में रस्सी भी मुश्किल से आती थी पर एक दिन उसने दूर से गधों की रेंकने की आवाज सुन कर जोर-जोर से रेंकना शुरू किया। खेत वालों ने "यह गधा है" यह समझकर डंडों से मार गिराया।

सन्ध्याहीनो द्विजः सर्वत्रैवानादरणीयः प्रोक्तः। सन्ध्याकर्मणि गायत्रीमन्त्रद्वारा भगवती जगदम्बा महामाया महाशक्तिः सच्चिदानन्दरूपिणी उपासिता भवति। सा विद्यास्वरूपा सा हि बुद्धिः सा हि श्रीः, तस्या एव कृपया विद्यार्थिनो विद्यां प्राप्नुवन्ति अतस्तस्या एव उपासना युष्माभिः करणीया। सा हि पराशक्तिर्महामाया परमेश्वररूपिणी अस्ति परमः पुरुषो यो हि परमेश्वरो भगवान् ब्रह्मेत्यादिनामभिः प्रोच्यते स वै अनया महाशक्त्या युक्त एव प्रकटीभवति अनयोरैक्य ज्ञानं हि मुक्तये सिद्ध्यति। मायासंविलत ब्रह्मतत्त्वं भगवती महाविद्या मायाशक्तिरेव नानारूपेण नानावतारैः आविर्भूय धर्मरक्षणं साधुजनत्राणं दुष्कृत विनाशं दानवविध्वंसनं च करोति अर्थात् परमात्मनः सगुणं निर्गुणमिति द्वे रूपे भवतः। निर्गुणं तु अस्मद्दृष्टिगोचरं न भवति, तद् अनिर्वाच्यं अलक्ष्यं अपरिमेयं अनादि अनन्तं वर्ण्यते। सगुणं हि परमात्मनो रूपं श्रीभगवत्या गायत्र्याः पराम्बाया रूपम्। तच्च सन्ध्यायां ध्यानयोग्यं सर्वैर्ध्यानव्यम्।

की ऊपेक्षा भी नहीं करता हैं ऐसा सभी मानते हैं।

सन्ध्याहीन द्विज सर्वत्र अनादर योग्य है सन्ध्योपासना में गायत्री मन्त्र द्वारा भगवती जगदम्बा महामाया महाशक्ति सच्चिदानन्द स्वरूपिणी उपासित होती है।

वही विद्या स्वरूपा है वही बुद्धि है वही श्रीलक्ष्मी है उसी की कृपा से छात्र विद्या प्राप्त करते हैं। इस कारण उसी की उपासना ध्यान पूजा जपादि तुमको करना चाहिए। वही पराशक्तिमहामाया परमेश्वररूपा है। जो परमपुरुष परमेश्वर भगवान् ब्रह्म इत्यादि नामों से कहा जाता है वह निश्चय ही इसी महाशक्ति से समन्वित हुआ प्रगट होता है। इन दोनों का अद्वैत (ऐक्य) ज्ञान ही मुक्ति देता है।

माया संवलित ब्रह्म ही भगवती महामाया महाविद्या महाशक्ति से नानारूप नाना अवतार ले लेकर संसार में प्रगट हो धर्म रक्षा, दानव विनाश व साधु संरक्षण करती है। अर्थात् परमात्मा के सगुण और निर्गुण दो रूप हैं। निर्गुण तो हमारे दृष्टिगोचर नहीं होता है। वह अनिर्वाच्य अलक्ष्य अपरिमेय अनादि अनन्त है सगुण परमात्मा का रूप श्रीभगवती गायत्री पराम्बा महामाया का ही रूप हैं वही सन्ध्या में ध्यान योग्य है उसी का आप सब ध्यान करें।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

निमेषमात्रमपि ते वयो गच्छन्न तिष्ठति ।
तस्माद्देहेष्वनित्येषु कीर्तिमेकामुपार्जय ॥१

तुम्हारी आयु पल भर भी स्थिर नहीं। वह पल-पल भर में क्षीण हो रही है। इसलिये इन अस्थायी (नाश होने वाले) शरीरों से एक कीर्ति (प्रशंसा, बडाई) का संचय करो ॥१

सुखमापतितं सेव्यं दुःखमापतितं तथा ।
चक्रवत्परिवर्त्तन्ते दुःखानि च सुखानि च ॥२

अचानक आये हुए सुख का जिस तरह हम सेवन करते हैं, इस ही तरह आपड़े दुःख को भी सहन करना चाहिये। क्योंकि दुःख और सुख पहिये की तरह बदलते रहते हैं (मशीन, अथवा गाड़ी का पहिया जैसे पहले नीचे टिकता है, फिर ऊपर आता है। इसी तरह सुख दुःख बदलते रहते हैं) ॥२

अविधेयो भृत्यजनः शठानि मित्राण्यदायकः स्वामी।
अविनयवती च भार्या मस्तकशूलानि च चत्वारि ॥३

अविनीत (आज्ञा नहीं मानने वाला) नौकर, कपटी मित्र, मूंजी मालिक (नहीं देनेवाला स्वामी) ढीठ पत्नी (नम्रता नहीं रखने वाली स्त्री) ये चार बातें मस्तक पर शूल हैं (चारों बातें घोर दुःख देने वाली हैं) ॥३

अतिपरिचयादवज्ञा संततगमनादनादरो भवति ।
लोकः प्रयागवासी कूपे स्नानं समाचरति ॥४

अत्यन्त परिचय अर्थात् जान पहचान होने पर धीरे धीरे लापरवाही होजाती है, यानी पहले जैसा आदरभाव नहीं रहता। निरन्तर किसी के पास जाने पर अनादर होने लगता है। प्रयागमें रहनेवाले लोग कुए पर स्नान करते हैं। दूर दूर के लोग प्रयाग में जाके स्नान करते हैं और वे लोग वहीं रहने पर भी कुए में स्नान करते हैं ॥४

वारिजेनेव सरसी शशिनेव निशीथिनी ।
यौवनेनेव वनिता नयेन श्रीर्मनोहरा ॥ ५

कमल से जैसे सरोवर (तालाब), चन्द्रमा से जैसे शक्ति, जवानी से जैसे स्त्री सुशोभित होती है, वैसे नीति के द्वारा लक्ष्मी मनोहर प्रतीत होती है। अर्थात् लक्ष्मीवान् पुरुष जबतक नीतिपूर्वक व्यवहार करते हैं तब तक ही उनकी कीर्ति होती है। जब अनीति से व्यवहार करने लगते हैं तब उसकी बड़ाई जाती रहती है ॥५

कटुकं वा मधुरं वा प्रस्तुतवाक्यं मनोहारि ।
वामे गर्दभनादश्चित्तप्रीत्यै प्रयाणेषु ॥ ६

कडुआ हो अथवा मीठा हो, प्रसंग का वाक्य मनोहर होता है। मौके पर कही बात बुरी भी अच्छी लगती है। यात्रा के समय बांई तरफ हुआ गधे का शब्द भी चित्त को प्रीति करता है (शुभ शकुन गिना जाता है) ॥६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

और उद्योगों में भी



मेट्रिक की शुरूआत

१ अक्तूबर, १९५८ से मेट्रिक प्रणाली का आरम्भ हुआ था, तब से अनेक उद्योगों जैसे कि पटसन, लौह व इस्पात, वस्त्र, सीमेण्ट, कागज़, नमक, इंजीनियरी, कॉफी, अलौह धातुओं, कच्चे रबर आदि, ने मेट्रिक माप-तौल को अपनाना शुरू कर दिया था। तब से इस दिशा में और भी प्रगति हो रही है।

नारियल रेशे के उद्योग में मेट्रिक प्रणाली अपनाने की अक्तूबर, १९५९ से अनुमति दे दी गई थी, चीनी उद्योग ने इस प्रणाली का प्रयोग १ नवम्बर १९५९ से आरम्भ कर दिया।

अप्रैल, १९६० से इस काम में और भी गति आ जायेगी जब वनस्पति और रंग-रोगन उद्योग भी मेट्रिक प्रणाली अपना लेंगे।

१ अप्रैल, १९६० से पेट्रोल और पेट्रोल की वस्तुओं का समूचा वितरण लिटरों और मेट्रिक इकाइयों में ही होगा।

इस दिशा में एक और भी महत्वपूर्ण कदम अगस्त १९६० से उठाया जायेगा जब कस्टम और सैण्ट्रल एक्साइज़ विभाग भी मेट्रिक प्रणाली अपना लेंगे।

GURUKULA KANGRI LIBRARY

अपनाइये

मेट्रिक प्रणाली

सरलता व एकरूपता के लिए

भारत सरकार द्वारा प्रसारित

डी ए ५६/४३२

प्रकाशक:—जयबहादुरसिंह

पता:—गोपालजी का रास्ता, जयपुर (राजस्थान)

मुद्रक:—श्री शंकर प्रेस ट्रिस्टर्स, त्रिपोलिया बाजार, जयपुर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar